Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

3988

आगमोद्धारकग्रन्थमालायाः एकोनत्रिंशं रत्नम् ।

णमोत्थु णं समणस्स भगवओ महावीरस्स ।

आगमोद्धारक–कृतिसन्दोहस्य

पञ्चसूत्रतर्कावतारपञ्चस्तोत्रीरूपोऽयं

विभागः–

वीरसं. २४९१ वि. सं. २०२१ आगमोद्धारकसं. १६

मूल्यम्–

प्रकाशक–
शान्तिचन्द्र छगनभाई झवेरी
गोपीपुरा
सुरत, W. R.

संशोधकः–
परमपूज्य–आगमोद्धारक–आचार्यप्रवर–
श्रीआनन्दसागरसूरिपुङ्गवपट्टधरः
आचार्यश्रीमन्माणिक्यसागरसूरिः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ गुप्तवतीयुक्ता दुर्गासप्तशती प्रारभ्यते।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भूमिका ।

विश्वप्रसिद्धमेतद् यदध्यात्मिकादिदुःखमहार्णवनिमग्नप्रपन्नजनतोद्धरणक्षमं निखिलतन्त्रसिद्धान्तसिद्धं दुर्गाचण्डीत्याद्यपरपर्य्यायं सप्तशतीस्तोत्रमेवात्रधूमपोतायमानश्वरीवर्त्ति, समग्रे चास्मिन् भारतवर्षे प्रायः शान्तिकपौष्टिकाद्यखिलगृह्यकृत्येष्वेतदेव बहुलप्रचारञ्च, किन्त्विदानींतनोऽस्य यथेच्छप्रवृत्तः प्रमाणरहितो नानाविधपठनानुष्ठानप्रचारो मन्त्रविभागो वा दृश्यमानो महतामपि चेतांसि दुःखाकरोति, न चाद्य-पर्य्यन्तं तत् किञ्चिदपि व्याख्यानमस्य प्रकाशितं यस्मिंश्चण्डीपाठक्रमो वा मन्त्रविभागो वाऽन्यद्वा विधानं यथावल्लभ्येत, यद्यपि सन्त्यन्याष्टीकाः शन्तनुनागोजीत्यादिकृता मुद्रिताः दर्शितश्च तत्र चण्डीपाठविधि-र्मन्त्रभेदोऽपि क्वचित् क्वचित् तथापि युक्तिप्रमाणराहित्यान्न तदुक्तयो विदुषां चेतश्चमत्कारमावहन्ति, इयन्तु विद्वन्मनोमोदावहा युक्तिप्रमाणाद्यैः सर्वगुणैरुपेता विद्वद्वर्य्य श्रीमद्भास्कररायविरचिता गुप्तवती ताभ्यः प्रधान-मित्यालोच्यैतस्याः प्रचाराय मुद्रणाय च समुदयुञ्चि । तत्पाठानां सम्यङ्निर्णयाय च मया पुस्तकत्रयं गुप्तवत्याः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सम्पादि, तत्र प्रथममस्मत्प्रियमित्राणां भूतपूर्वप्रसिद्धसारसुधानिधिपत्रसम्पादकानामायुष्मतां श्रीसदानन्दमिश्राणां पुस्तकालयात् समानीतम्, इदमेव चादर्शपुस्तकम्, द्वितीयं श्रीजीवानन्दविद्यासागरभट्टाचार्य्यमहाशयानां किञ्चित्खण्डितं शुद्धञ्च, तृतीयं कलकत्ता धर्मसभापाठशालायां संस्कृताध्यापक-श्रीवेणीमाधवशास्त्रिभिर्वाराणसीतः समानीतम्, मूलपुस्तकानि च तत्तद्देशलिखितानि दशैवसंगृहीतानि, तदेतेभ्यः सम्यक्पाठान्निर्णीयपाठभेदांश्च सव्याख्यां सप्तशतीचरित्रान्ते संन्यवेशयं, कवचार्गलाकीलकेषु प्रदीपाख्यमधिकं व्याख्यानं गुप्तवतीदुरूहस्थलेषु बोधसौकर्य्याय क्वचिदल्पाल्पव्याख्यानञ्च टिप्पणीरूपेण समग्रहाम्, सर्वान्ते च गुप्तवतीमतेनान्यमतेन च द्वेधा विभक्तं मन्त्रविभागञ्चास्थपयम्, यावच्छक्यमादराच्चास्य शोधनेऽश्रमम् परं मनुजस्वभावसुलभदोषविरहाभावात् क्वचिदशुद्धमप्यत्रास्तीति निश्चिनोम्यभ्यर्थये च तदागः क्षान्त्यै विद्वज्जनान्, आशासे च यत् तदेतेन यत्किञ्चिदप्युपकारं सज्जनानामावहेयञ्चेदात्मानमवन्ध्यश्रममिति।

धर्मसभासम्पादको
देवीसहायशर्म्मा।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(१) अथ भवान् भास्करराय: प्रारीप्सितग्रन्थस्य निर्विघ्नपरिसमाप्तये विघ्नव्यूहविनाशाय वा श्रीपरमगुरुस्मरण-रूपमङ्गलमाचरति श्रीराममिति। विष्णुधर्मोत्तराख्य: प्रसिद्धो ग्रन्थस्तत्र भविष्यत्कथनप्रस्तावे श्रीशङ्कराचार्याविर्भावप्रकाशकमस्ति पद्यद्वयम्।

(२) यद्यप्याचार्यशिष्या बहवस्तथापि पादपद्मसुरेश्वरचित्सुखानन्दगिरिनामधेयाश्चत्वार एव मुख्या: स्पष्टं चैतद् दिग्विजयोपाख्याने अत आह शिष्यचतुष्टयेनेति।

श्रीगणेशाय नम:। श्रीकामाक्षी भगवत्यै नम:। श्रीजगदम्बा देव्यै नम:। श्रीरामं (१) प्रति पुष्कराभिध महायज्ञेण वेदत्रयव्याख्यानावसरे विशिष्य कथितं श्रीविष्णुधर्मोत्तरे। तां धेनुं समुपह्वयामि सुदुघामित्यृगगतं शङ्कराचार्यं शिष्यचतुष्टयेन (२) सहितं वन्दे गुरूणां गुरुम् ॥१॥ विधिविष्णुमुखामरोदयस्थितिनाशेषु शिवोऽप्यनीश्वर:। जगदम्ब! तव त्वयं क्रम: च्णमुद्दालकपुष्पभञ्जिका (३) ॥२॥ कवचार्गले च कीलकमादौ मध्ये त्रयोदशाध्यायी।

(३) भञ्जनं भञ्जिका भावे ण्वुल् उद्दालकपुष्पाणां भञ्जिका उद्दालकपुष्पभञ्जिका। पुष्पाणामिति कर्मणि षष्ठीति नित्यं क्रीड़ाजीवकयोरिति सूत्रे सि० कौ०। यद्वाऽधिकरणे ण्वुलो वाधकाभावत् अत्राधिकरणे ण्वुल् तथा च उद्दालकस्य बहुवारकस्य पुष्पाणि भज्यन्ते यस्यां क्रियायां सा उद्दालकपुष्पभञ्जिका क्रीड़ाविशेष इति संज्ञायामिति सूत्रे मनोरमा।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(१) प्राधानिकरहस्यं वैकृतिकरहस्यं मूर्त्तित्रयरहस्यं चेति रहस्यत्रयम् ।

(२) मूलभूतास्त्रयोदशाध्याया मार्कण्डेयपुराणे, षडध्यायाश्चाङ्गोपाङ्गरूपा अन्यत्रेत्यूनविंशतिरध्यायाः; विंश-त्याद्याः सदैकत्व इत्यनुशासनादूनविंशताविर्त्येकत्वम् ।

अन्ते प्राधानिकवैकृतिके मूर्त्तित्रयं रहस्यानाम् (१) ॥ ३ ॥ इति मार्कण्डेयपुराणाध्यायेषूनविंशती (२) गुप्तान् अर्थान् प्रकटीकुरुते भास्कररायोऽग्निचित् कतिचित् ॥ ४ ॥ सप्तशती लुप्तस्तुती(३)राप्तवती सत्यवतीव तप्तवती । मम तु मतीरचितवती गुप्तवतीनामविभ्रतीं विवृतिम् ॥५॥ काव्यव्याकृतितार्किकौपनिषदेष्वेकैकविज्ञैः कृताः टीकाः सन्ति चतुर्विधा अपि चमत्कारावहास्तद्विदां तास्वण्डीजपहोमतर्पणमुखानुष्ठानमात्रोपयोग्यर्थज्ञान-

(३) निजवंशप्रवर्त्तकविचित्रवीर्यादिनाशाल्लुप्तनिजवंशमार्गानाप्तवती सत्यवती (योजनगन्धा) यथा सन्तप्ता समासीत्, कर्मविद्योभयपरायणमर्मज्ञ सद्गुरूपदेशाभावात् यथाश्रुतग्राहिपण्डितम्मन्यैर्विभ्रंशितोचितप्रचारानाप्त-वतीयं सप्तशत्यपि तथैव तापवतीत्युत्प्रेक्ष्यते, यथा च तत्सन्तापापनयनाय देवव्रतादयो गुप्तां मन्त्रणां विरचय्य-लुप्तं तद्वंशम् पुनःप्रावर्त्तयिषत तथा मदीयामतिरपि गुप्तमन्त्रणास्थानीयामिमां रहस्यविषयपूर्णाम् अतएव गुप्तवतीं नाम बिभ्रतीं विवृत्तिं रचितवती, विद्वांसश्चैनया लुप्तान् सप्तशतीमार्गान् पुनःप्रवर्त्तयन्त्विति भावः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(१) किमिति प्रार्थनीयाः सामर्थ्यसत्त्वे अप्रार्थिता अपि भृङ्गवत् स्वत एवात्र प्रवर्त्स्यन्ति यद्यसमर्थास्तर्हि चम्पकाद् भृङ्गा इव अनपसारिता अपि निवर्त्स्यन्ति। इति श्लोकद्वयस्यैकत्वान्वयः (२) अर्द्धचन्द्रं गलहस्तम्।

मभीप्सतां न विदुषां चित्ते चमत्कुर्वते ॥ ६ ॥ एतद्ग्रन्थरसास्वादसामर्थ्यं विदुषां यदि। किमिति प्रार्थनीया(१) स्ते न चेत् प्रार्थनयापि किम् ॥ ७॥ कैः पुष्परक्षतान् दत्त्वा भृङ्गा भुवि निमन्त्रिताः। केन वा चम्पकेनार्धचन्द्रं (२) दत्त्वा निराकृताः ॥८॥ यत् सप्तशत्यायुषि (३) गुप्तवत्यामपेक्षणीयं तदवेक्षणीयं। चण्डीसपर्य्याक्रमकल्पवल्ल्यां (४) यत्तत्र गुप्तं तदिहास्ति क्लृप्तम् ॥ ९ ॥ तत्रादौ वक्ष्यमाणार्थानुक्रमणीश्लोकाश्चतुर्दशलिख्यन्ते। मङ्गलाचरणं ग्रन्थप्रतिपाद्यार्थसंग्रहः ततश्चण्डीति शब्दस्य तदर्थस्य च निर्णयः ॥ १ ॥ तन्मन्त्रस्य नवार्णस्योद्धारस्तस्यार्थवर्णनं चण्डीस्तवेऽपि हृल्लेखा वाग्भवं चेतनीरमा ॥२॥ कामः कामकला विघ्नो वाराही नारसिंहकाः परा प्रासादतद्‌योग सर्वमङ्गलकालिकाः ॥३॥ नवार्णश्चेति सर्वेषां मन्त्रोद्धारप्रवेशनं संक्षेपेण नवार्णस्य साधनक्रमवर्णनम् ॥४॥ अङ्गाङ्गीभावनिष्कर्षः चण्डीस्तवनवार्णयोः ततः सप्तशतीशब्दस्तदर्थस्तत्प्रशंसनम् ॥५॥ शापोद्धारोक्ती-

(३) सप्तशत्याः आयुःस्वरूपायामायुर्घृतमितिवद् गौणः प्रयोगः।

(४) चण्डीसपर्य्याक्रमकल्पवल्ली नाम चण्डीपूजनक्रमपरिचायको ग्रन्थविशेषः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लने च तत् स्तोत्रपठनक्रमः तत्पुरश्चरणं काम्यप्रयोगे बलिनिर्णयः ॥६॥ आवृत्तौ पाठवैचित्र्यमृत्विजान् दक्षिणाक्रमः कवचस्यार्गलायाश्च कीलकस्यार्थवर्णनम् ॥७॥ ततो रहस्यतन्त्रस्य गुरुकीलकलेखनं। तदर्थवर्णनं कात्यायनीतन्त्रस्य मुख्यता ॥ ८ ॥ तत्राद्यपटलव्याख्या परोक्ताभासखण्डनम्। ततस्तत्संग्रहशतश्लोक्या अंशेन लेखनम् ॥९॥ स्तोत्राद्यचरितव्याख्या द्वितीयपटलस्य च। तत्संग्रहांशो व्याख्यानं मध्यमेऽथ चरित्रके ॥१०॥ तृतीयपटलव्याख्या ततस्तत्संग्रहांशकः। तृतीयचरितेऽध्यायषट्कमन्त्रार्थवर्णनम् ॥११॥ चतुर्थपटलव्याख्या ततस्तत्संग्रहांशकः। एकादशादित्रितयमन्त्राध्यायार्थवर्णनम् ॥१२॥ अथ यामलतन्त्रोक्तः प्रकारस्तस्य संग्रहः। ततस्तन्त्रान्तरप्रोक्त संग्रहांशसमापनम् ॥१३॥ प्राधानिकरहस्यस्य व्याख्या वैकृतिकस्य च। ततो मूर्त्तिरहस्यस्येत्यनुक्रमणिका मता ॥१४॥ तत्र चण्डीनामपरब्रह्मणः पट्टमहिषीदेवता, चण्डभानुश्चण्डवाद इत्यादावियत्तानवच्छिन्नाऽसाधारणगुणशालिपरत्वेन चण्डपदस्य प्रयोगदर्शनात्, इयत्तायाश्च देशकालवस्तुकृतत्रैविध्येन तादृशपरिच्छेदत्रितयराहित्यस्य परब्रह्मैकलिङ्गत्वात्; यदापि चडिकोप इति धातोर्निष्पत्तिस्तदापि 'कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे' इत्यादिना (१) प्रसादो निष्फलो यस्य कोपोऽपि च निरर्थकः। न तं भर्त्तारमिच्छन्ति षण्ढं

(१) मूलरामायणे श्रीरामविषयकः प्रश्नः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(१) नमस्त रुद्रमन्यव उतो त इषवे नमः बाहुभ्यामुतते नमः। यजुर्माध्यं० मं० १ अ० १६

(२) यदिदं किञ्च जगत्सर्वं प्राण एजति निःसृतं महद्भयं वज्रमुद्यतं य एतद् विदुरमृतास्ते भवन्ति इति काठके। अस्यार्थः इदं सर्वं यत्किञ्चिज्जगज्जातं परमात्मनो निःसृतं प्राणे "चिदात्मति" प्रेरके सत्येव एजते कम्पते

पतिमिव स्त्रिय इत्यादिना च महाभयजनकत्वेनैव कोपस्य साफल्योक्तेस्तादृश एव कोपे चण्डिधातोर्मुख्यवृत्त्या प्रवृत्तेस्तद्वशादेव नमस्ते रुद्रमन्यव (१) इत्यादिना प्रथमं मन्यव एव नमस्कारदर्शनाद्भीषास्माद्वातः पवते भीषोदेति सूर्य्यः भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चम इत्यादिश्रुत्या वाय्वादिभयजनककोपस्यापि परब्रह्मलिङ्गत्वमक्षतमेव, अतएव महद्भयं वज्रमुद्यतमिति (२) श्रुतौ वज्रपदेन ब्रह्मैव उच्यते, मायुधविशेषो भयजनकत्वलिङ्गादित्युक्तमुत्तरमीमांसायां (३) कम्पनादित्यधिकरणे; तस्माच्छब्दात् पुंयोगलक्षणे ङीषि चण्डीति पदनिष्पत्तिः। तत्स्वरूपं चोक्तं रत्नत्रयपरीक्षायां दीक्षितैः। नित्यं निर्दोषगन्धं निरतिशयसुखं ब्रह्मचैतन्यमेकं, धर्मो धर्मीति भेदद्वितयमिति पृथग्भूय मायावशेन। धर्मस्तत्रानुभूतिः सकलविषयिणी सर्वकार्य्यानुकूला, शक्तिश्चेच्छादिरूपा

चेष्टत इति यावत् तच्च कम्पनहेतुप्राणशब्दवाच्यं वज्रं (वज्रवत्) उद्यतं किञ्चिन्महद्भयं (भयकारणम्) अस्ति, ये एतद्विदुस्ते अमृताः मुक्ता भवन्तीत्यर्थः।

(३) कम्पनात्। उत्तरमीमांसायाम्। अ० १। पा० ३। सू० १

For Private and Personal Use Only

भवति गुणगणस्याश्रयस्त्वेक एव ॥ कर्त्तृत्वं तत्र धर्मी कलयति जगतां पञ्चसृष्ट्यादिकृत्ये, धर्म्मः पुंरूपमाद्या सकलजगदुपादानभावं बिभर्त्ति । स्त्रीरूपं प्राप्यदिव्या भवति च महिषी स्वाश्रयस्यादि कर्त्तुः, प्रोक्तो धर्म्म-प्रभेदादपि निगमविदां धर्मिवत् ब्रह्मकोटी, इति । एकमेव ब्रह्मानादिसिद्धया मायया धर्मी धर्म्मश्चेति द्विविधमभूत् सृष्टयारम्भेयत् प्राथमिकमीक्षणं 'तदैक्षतबहुस्यां प्रजायेयेति' 'सोऽकामयत' तत्तपोऽकुरुतेत्यादि-त्रिविधश्रुतिसिद्धं ज्ञानेच्छाक्रियासमष्ट्यात्मकत्वं स एव ब्रह्मधर्म्मः स च धर्म्यभिन्न एव 'स्वाभाविकीज्ञानबलक्रिया च (१) इति श्रुतेः तस्यैव धर्मत्वाच्छक्तिरिति संज्ञा' अतएव अथातो धर्मजिज्ञासेति कौलोपनिषत् प्रथमसूत्रे जैमिनितन्त्रस्य प्रथमसूत्र इव न धर्मशब्दश्चोदनालक्षणार्थजड़वस्तुपरः अपितु ब्रह्मधर्मरूपचिच्छक्तिपर एव तेन तत्र धर्मपदमपनीय ब्रह्मपदप्रक्षेपस्त्वविदुषामेवेति समर्थितं तद्भाष्येस्माभिः । अस्यैव धर्मस्यान्या अपि संज्ञाः कथयता नागानन्दसूत्रेण धर्मस्वरूपमेव विशिष्यविवृतं, "एष एव विमर्शश्चितिः चैतन्यमात्मा स्वरसोदिता परावाव स्वातन्त्र्यं परमात्मौन्मुख्यमैश्वर्यं सत्तत्वं सत्ता स्फुरता सारो मातृका मालिनी हृदयमूर्त्तिः स्वसंवित् स्पन्द इत्यादिशब्दैरागमैरुद्घोष्यत" इति । तत्तत् प्रवृत्तिनिमित्तानि तद्भाष्ये एव विवृतानि । स एव धर्मो महाविष्णु

(१) न तस्य कार्य्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकीज्ञान-बलक्रिया च । श्वेता० ६।८

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भवानीभेदेन द्विविधो भूत्वा जगतः सृष्टिस्थितिलयतिरोधानानुग्रहात्मककृत्यपञ्चककर्त्ताभूत्, जवाकुसुमस्येव रञ्जनकर्त्तृत्वेऽपि रागाश्रयत्वेन मात्रा स्फटिकस्यैव शुद्धस्यापि धर्मिणः सान्निध्यमात्रेण कर्त्तृत्वव्यवहारः। तन्नतो धर्मोऽपि न जड़ो न जीवः अपि तु 'चितिः स्वतन्त्रा विश्वसिद्धिहेतु'रित्यादिशक्तिसूत्रोक्त स्वरूपं ब्रह्मैवेत्युपनिषत्सिद्धान्त इति श्लोकद्वयस्य पिण्डितो निश्चयोतितोऽर्थः। अस्मदादीनां हि स्रष्टव्यपदार्थालोचनात्मिका ज्ञानेच्छाकृत्तिरूपा वृत्तिर्घटमहं जानामीत्यादि(१)भाविघटविशयकज्ञानाद्याकारभेदेन परस्परविलक्षणा त्रिविधास्वयं जड़ाघना, जड़स्य घनस्यान्तःकरणस्य परिणामो, घनानामेव जड़ानां विषयीकाररूपसम्बन्धेनापि घनेनैव विशिष्टा, स्वयमपि परिच्छिन्ना, परिचारैरपि परिच्छिन्नैरेव युक्ता, परिच्छिन्नजड़घनाहङ्कारसम्बन्धेनाध्याससहिता च। शुद्धब्रह्मणः प्राथमिकी वीक्षा तु सर्वांशे कोमलत्वात् वृत्तिरूपाऽप्यास्माकीनवृत्तिधर्मराहित्याद्त्यन्तविलक्षणा सति ब्रह्मकोटावेव निविशते इति भावः॥ तदेतदुक्तं बृहद्वासिष्ठे उत्पत्तिप्रकरणे द्वादशे सर्गे सृष्ट्यारम्भकालिकं ब्रह्मसत्तामात्रं प्रक्रम्य "तदात्मनि स्वयं किञ्चिच्चेत्यतामधिगच्छति अगृहीतात्मकं संविदहं

(१) आदिशब्देन घटमहमिच्छामि घटमहं करोमीत्येतयोरिच्छाकृत्योराकारसंग्रहः तत्रापि घटपटाद्यनन्तविषयभेदेन परस्परवैलक्षण्यम्।

For Private and Personal Use Only

मर्शनपूर्वकम्। भाविनामार्थकलनैः किञ्चिदूहितरूपकं आकाशादणुशुद्धं च सर्वस्मिन् भाति बोधनम्। ततः सा परमासत्ता सचेतश्चेतनोन्मुखी चिन्नामयोग्या भवति किञ्चिल्लभ्यतया तदा। घनसंवेदना पश्चाद्भावि जीवादिनामिका सम्भवत्यात्मकलना यदोज्झति परं पदम्" इत्यादि। तट्टीकायामपि, सन्मात्रस्य ब्रह्मणः 'स ईक्षत लोकान्नु सृजा' इति श्रुतिसिद्धमीक्षणभावं दर्शयति तदिति त्रिभिः 'अगृहीतात्मकं' अहङ्काराध्यासरहितं अतएव संविन्मात्रेणाहंताविमर्शः 'सर्वस्मिन्नपि' सृज्यविशयीभाविनामरूपानुसन्धानांशेऽपि 'किञ्चि'देव संपृक्तमिव अतएव 'आकाशादण्वेव' न तु घनं 'अतएव' शुद्धमेव घनमालिन्याभावाद्ब्रह्मैव 'चेत्यतां' गच्छतीव सती 'सचेतश्चेतना' ईक्षणा वृत्त्यभिव्यक्तचैतन्यं त'दुन्मुखी' तत्प्रधाना सती 'किञ्चिल्लभ्यतया' वाक्यविषयधर्मलाभेन तदा 'चिन्नामयोग्या' ०
भवतीत्यर्थः पश्चात्तु सैव वृत्तिश्चिरावृत्त्या घनीभूता सम्यगेव 'आत्तकलना' सूक्ष्मप्रपञ्चात्मभावलक्षणपरिच्छेदग्राहिणी सती 'परं पद'मपरिच्छिन्नभूमानन्दात्मभावं यदा विस्मरति तदा भाविहिरण्यगर्भाख्यसमष्टिजीवादिनामिका भवतीत्याह घनेति। ईदृशेक्षणाद्यात्मकचण्डी चिदादिनामकसमष्टिवृत्तिरूपधर्मात्मकशुद्धब्रह्माभिन्नानां ज्ञानेच्छाक्रियाणां तिसृणां व्यष्टीनां महासरस्वतीमहाकाली महालक्ष्मीरिति प्रवृत्तिनिमित्तवैलक्षण्येन नामरूपान्तराणि। तादृशनामरूपविशिष्टदेवतात्रयसमष्टित्वं प्रवृत्तिनिमित्तीकृत्य धर्मे चण्डिकेति व्यवहारः। एवं व्यष्टीनां वामा ज्येष्ठाऽतिरौद्रीति, पश्यन्ती मध्यमा वैखरीति, ब्रह्माविष्णुरुद्र इति रूपभेदेन, समष्टेरपि अम्बिका शान्ता

परेत्यादि संज्ञा अनन्तास्तत्त्वान्तरादवगन्तव्याः। त्रितयसमष्टित्वादेवैषा तुरीयेति शक्तिरहस्यादौ निर्दिश्यते। आचार्य्यं भगवत्पादैरप्युक्तम्। गिरामाहुर्देवीं द्रुहिणगृहिणीमागमविदो हरेः पत्नीं पद्मां हरसहचरीमद्रितनयां; तुरीया कापि त्वं दुरधिगमनिःसीममहिमा महामाये! विश्वं भ्रमयसि परब्रह्ममहिषि! इति। अयमेव चार्थः प्राधानिकरहस्ये 'लक्ष्यालक्ष्यस्वरूपा सेत्यत्राऽलक्ष्यपदेन व्यक्तीकरिष्यते। इष्टशानामरूपोपाधिकस्य शक्तिरूपब्रह्मण उपासनाप्रकाशकेषु बहुषु मन्त्रेषु द्वावत्युत्तमौ, नवार्णः सप्तशती चेति; तत्राद्यस्य चतुर्विंशतिवर्णा(द्य)त्मत्वेऽपि व्यञ्जनानां स्वराङ्गत्वेन स्वातन्त्र्येणाक्षरसंख्या व्यवहारानुपयोगित्वेन 'एष वै सप्तदशः प्रजापतिर्यज्ञे न्वायत्त'(१)इत्यादाविवस्वरसंख्ययैव नवार्णता। अर्णशब्दोऽपि वर्णपरः सुवर्णे स्वर्णव्यवहारदर्शनात्, वर्णशब्द एव च्युतकालङ्कारेण वकारप्रतीकारादेशप्रयोगस्तन्त्रेष्वेवेति कश्चित्। तदुद्धारस्तु देव्यथर्वशीर्षोपनिषदि। तत्र हि 'सर्वे वै देवादेवीमुपतस्थुः कासित्वं महादेवि' इति देवानां प्रश्ने सति 'सा ब्रवीदहं ब्रह्मस्वरूपिणी'त्यादिना बहुप्रकारैः सगुणनिर्गुणस्वरूपभेदाभ्यां देवोत्तरिते सति 'ते देवा अब्रुवन्नित्युपक्रम्य'नमो देव्यै महादेव्यै' इति श्लोकमन्त्रेण ऋग्भिश्च नमस्कारादिकं

(१) आश्रावयेति चतुरक्षरम् अस्तु श्रौषडिति चतुरक्षरं यजेति द्व्यक्षरं ये यजामहे इति पञ्चाक्षरं वषडिति द्व्यक्षरम्। एष वै सप्तदशप्रजापतिर्यज्ञे न्वायत्त। श० अ० ४ ब्रा० ६। १६।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(१) श्रीविद्यान्तर्गतमेव ऐं क्लीं क्लौमिति वीजत्रयं त्रिकूटारहस्ये रुद्रयामले प्रसिद्धम्। बालेति देव्याः रूस्वप विशेषः

निर्वर्ण्य श्रीविद्यामुद्धृत्य, तत्रत्य कूटत्रयस्यैव रूपान्तरेषु वाक्कामशक्तिवीजेषु श्रुत्यन्तरेवाला(१)घटकत्वेन प्रसिद्धेषु शक्तिवीजमात्रं प्रकारान्तरेण 'वियदीकारसंयुक्त'मित्यादिना (२) हृल्लेखात्मकत्वेनोद्धृत्य, तादृशवीजत्रयघटितो नवार्णो मन्त्र उद्धृतः। तथा 'वाङ्मायाब्रह्मसूस्तस्मात् षष्ठं वक्त्रसमन्वितं सूर्य्यो वामश्रोत्रविन्दुसंयुक्तष्टात्तृतीयकः नारायणेन संमिश्रो वायुश्चाधरयुक्ततः विच्चे नवार्णकोऽणुः स्यान्महदानन्ददायक' इति। 'वाक्' वाग्भवबीजम्। (ऐं) 'माया' शक्तिः हृल्लेखैव (क्रीं) 'ब्रह्मसूः' कामः (क्लीं) 'तस्मात्' कामबीजात् तत्र प्रथमोपस्थितात् ककारात् 'षष्ठ'मक्षरं चकारः त'द्वक्त्रे ण' मुखवृत्तेन आकारेण समन्वितं (चा) 'सूर्य्यो' मः 'अवाम श्रोत्रं' पञ्चमस्वरः 'विन्दु'रनुस्वारः(मुं) 'टात्' टकारात् 'तृतीयको' वर्णो डकारः स च 'नारायणेना'ऽऽकारेण संमिश्रः(डा) 'वायु' र्यकारः स चा'धरेणा'ऽधरोष्ठेन द्वादशस्वरेण युक्तः (यै) 'विच्चे' इति स्वरूपम् 'अणु' र्मन्त्रः महतामुपासकानामानन्ददायकः ब्रह्मसायुज्यप्रद इति

(२) वियदीकारसंयुक्तं वीतिहोत्रसमन्वितम्। अर्द्धेन्दुलसितं देव्या वीजं सर्वार्थसाधकम्। वियत् हकारः वीतिहोत्रमग्निवीजं रेफः। देव्या वीजं क्रीं इत्याकारकम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तदर्थः। एतन्महिमातिशयो डामरादितन्त्रेषु द्रष्टव्यः। मन्त्रार्थश्च तत्रैव। निर्धूतनिखिलध्वान्ते! नित्यमुक्ते! परात्परे। अखण्डब्रह्मविद्यायै चित्सदानन्दरूपिणि! अनुसंदध्महे नित्यं वयं त्वां हृदयाम्बुजे। इत्थं विशदयत्येषा या कल्याणी नवाक्षरी। अस्या महिमलेशोऽपि गदितुं केन शक्यते। बहूनां जन्मनामन्ते प्राप्यते भाग्यगौरवात् एतमर्थं गुरोर्लब्ध्वा तस्मै दत्त्वा च दक्षिणाम्। आशिषं च परां लब्ध्वा मन्त्रसिद्धिमवाप्नुयादित्यादि। अत्र प्रथमश्लोके सम्बुद्धित्रयं ततः चतुर्थ्यन्तं ततः पुनः संबुद्धित्रयमिति सप्तभिः पदैः क्रमेण मन्त्रे सप्तधा परिच्छेदः पदानां तत्तद्विभक्त्यंतता तत्तदर्थाश्चेति कथितं, तदुत्तरार्धेनाकाङ्क्षितपदानामध्याहार उक्तः इतरत् स्पष्टम्। सच्चिदानन्दात्मकपरब्रह्मधर्मत्वादेव शक्तेरपि त्रिरूपत्वम्। तत्र चिद्रूपा महासरस्वती वाग्बीजेन सम्बोध्यते, ज्ञानेनैवाज्ञाननाशान्निर्धूतनिखिलध्वान्तपदेन तद्विवरणं युक्तमेव, नित्यत्वं त्रिकालाबाध्यत्वं अतएवमुक्तत्वं कल्पितवियदादिप्रपञ्चनिरासाधिष्ठानत्वं, एतेन सद्रूपात्मकमहालक्ष्मीरूपस्य हृल्लेखया सम्बोधनमिति व्याख्यातं, पर उत्कृष्टः सर्वानुभवसंवेद्य आनन्द एव, तस्यैव पुरुषार्थत्वात् 'आत्मनः कामाय सर्वं प्रियं भवती'ति (१) श्रुत्या तदितरेषामपि तदर्थत्वेनानन्दस्यैव सर्वशेषितया परत्वात् स च मानुषानन्दमारभ्योत्तरोत्तरं (२) शतगुणाधिक्येन

(१) स्पष्टं चैतद् बृहदारण्यके षष्ठाध्यायस्य पञ्चमब्राह्मणे याज्ञवल्क्य मैत्रेयीसम्वादरूपे।

(२) बृहदारण्यके षष्ठाध्याये तृतीयब्राह्मणे सयो मनुष्याणां राद्धः समृद्धो भवत्यन्येषामधिपतिः सर्वैर्मानुष्यै-

For Private and Personal Use Only

भोगैः सम्पन्नतमः स मनुष्याणां परम आनन्दोऽथ ये शतं मनुष्याणामानन्दाः स एकः पितॄणामित्यादि एष एव परम आनन्द एष ब्रह्मलोक इत्यन्तम्। (अयमेव क्रमस्तैत्तिरीयेऽष्टमानुवाके वर्णितः 'स एको ब्रह्मण आनन्द' इत्यन्तम्)।

श्रुतौ बहुविधो वर्णितः तेषु परमातिशायी स एको ब्रह्मण आनन्द इति परमावधित्वेनाम्नात एव परात्परः, स्वात्मानन्दलवीभूतब्रह्माद्यानन्दसन्ततिरिति पुराणं च। तेन आनन्दप्रधानेन महाकालीस्वरूपस्य कामबीजेन सम्बोधनमुक्तम्। चामुण्डाशब्दो हि मोक्षकारणीभूतनिर्विकल्पकवृत्तिविशेषपरः, तादर्थ्ये चतुर्थी, चमुं सेनां वियदादिसमूहरूपां डाति लडयोरैक्याल्लाति आदत्ते स्वात्मसात्कारेण नाशयतीति व्युत्पत्तेः पृषोदरादित्वात् सर्वं (१) सुस्थमित्याहुः। 'मया तवात्रोपहृतौ चण्डमुण्डौ महापशू' इत्यत्र पशूपदद्विवचनयोः स्वारस्येनतूलमूलभेदेनाविद्याद्वयकथनेन 'यस्माच्चण्डं चमुण्डं च गृहीत्वा त्वमुपागता चामुण्डेति ततो लोके ख्याता देवी भविष्यसि'-त्यत्रापि तूलमूलाविद्ययोरादानमेव गृहीत्वेति पदेनानूद्य निर्वचनकथनादखण्डब्रह्मविद्येत्येव चामुण्डापदस्यार्थो वर्णित इति सूक्ष्मदृशां रहस्यम्। विच्चे इति तु वित् च इ इति पदत्रयात्मकं बीजक्रमेणोक्तानां चित्सदानन्दानां वाचकं संबुध्यन्तम्, अस्य स्त्री ई इत्यस्य ह्रस्वे सति 'इ' हे आनन्दब्रह्ममहिषि! इत्यर्थः वित्पदं ज्ञानपरं प्रसिद्धमेव चकारोऽपि ८

(१) अकारस्य दीर्घत्वं मूकारस्य ह्रस्वत्वं विभक्त्यलोपश्चेत्यादि।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(१) त्वदीयं यत् तत्वं तद्विषयकं यद् ज्ञानं प्रमात्मकं तस्य सिद्धये निष्पत्त्यै। (२) ह्रीश्चेति तैत्तिरीयशाखायां

नपुंसकः सत्यपर इति योज्यं, अनुसंदध्महे इत्यादिः शेषः। इत्यञ्च हे महासरस्वत्यादिरूपे! चिदादिरूपे! चण्डिके! त्वां ब्रह्मविद्याप्राप्त्यर्थं वयं सर्वदाध्यायाम इति मन्त्रार्थः फलितः। तस्यायं संग्रहः। महासरस्वति चिते! महालक्ष्मि सदात्मके! महाकाल्यानन्दरूपे! त्वत्तत्त्वज्ञानसिद्धये (१) अनुसंदध्महे चण्डि! वयं त्वां हृदयाम्बुज इति। यद्यपि श्रीमित्येव वीजं महालक्ष्म्याः प्रसिद्धं न ह्रल्लेखा तथापि हकारशकारयोरूष्मत्वेन साजात्यान्नातीव भेदः अतएव ह्रीश्च ते लक्ष्मीश्च पत्न्याविति श्रुतौ (२) शाखान्तरे ह्रीपदस्थाने श्रीपदस्य पाठः। एवं स कामबीज एव लकारस्य स्थाने रेफयोजनेन कालीवीजतार(३)स्तयोश्चान्तस्थत्वेनैक्यान्नात्यन्तं भेदः। तन्त्रान्तरेषु कालीसरस्वत्यो-र्वास्तविकाभेदमभिप्रेत्य वीजयोर्वैपरीत्याद्भेद व्यवहारोऽपि दृश्यत(४)इति द्रष्टव्यम्। अयं चार्थः प्राचीनैर्वर्णितप्राय एव सम्यक्परिष्कृत्योक्तः। वस्तुतस्तु लक्षणविरोधस्य छान्दसत्वेन पृषोदरादिपाठकल्पनया च समाधानस्याविशेषा-

पाठः शाखान्तरे माध्यन्दिनीयादौ तु श्रीश्च ते लक्ष्मीश्च पत्न्याविति पाठः। (३) क्लीमिति कामवीजस्य क्रीमिति च कालीवीजस्य स्वरूपम्। (४) वक्ष्यमाणनवार्णसाधनप्रकारे चैतत्सूचयिष्यते।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(१) चम्यते अद्यते इति चामुः कर्मण्युण् पृषोदरादित्वात् आदि स्वरस्य वृद्धिश्च। (२) वेदान्तसूत्रेषु प्रथमाध्यायस्य-
द्वितीयपादस्य द्वितीयाधिकरणे। (३) तत्र हि अदनीयं जगत् अत्ता च परमात्मेति प्रतिपादितं तथाहि "यस्य ब्रह्म च ७
क्षत्रं च उभे भवत ओदनः मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः" इति कठवल्लीषु पठ्यते। अस्यार्थः "यस्य" ब्रह्म-
क्षत्रादिजगत् "ओदनः" ओदनस्वरूपमदनीयः पदार्थः "मृत्युः" सर्वप्राणिसंहारकश्च यस्य "उपसेचनं" संस्कारक-

दन्योऽपि प्रकारः सुवचः। चमु अदन इति धातोश्चामुरदनीयः पदार्थः (१) स च ब्रह्मातिरिक्तः सर्वोऽपि अत्ताचरा-
चरग्रहणादित्यधिकरणे (२) तथा निर्णयात् (३) तं डापयति उड्डापयति न विशयीकुरुते ब्रह्ममात्रविषयिणीति यावत्,
अथवा चकार एकाक्षरनिघण्टुरीत्या चन्द्रवाचक आह्लादप्रकाशगुणयोगादिह ज्ञानपर आनन्दपरो वा सन्
ब्रह्मैव वक्ति, तदासमन्तान्मुण्डयतीति चामुण्डा; मुण्डनं नामाधारापेक्षया न्यूनसत्ताकवस्तुनिरासः। शिरश्चर्मा-

घृतादिसामग्री, "इत्था" इत्थम्भूतं सर्वजगतामत्तारतङ्कः "वेद" जानातीति। अस्यां श्रुतौ कस्तावत् अत्ता अन्नादत्वेन
प्रसिद्धोऽग्निरत्ता कर्मफलभोक्तृत्वेन जीवो वा जगत्संहारकत्वेन परमेश्वरो वा। अत्रोत्तरम्। परमेश्वर एव 'अत्ता' कस्मात्
'चराचरग्रहणात्' श्रुतौ हि ब्रह्मक्षत्रपदेन चराचरं गृह्यते तदत्तृत्वं च नह्यीश्वरादन्यत्र सम्भवि सामर्थ्याभावात्। अदनं चात्र
न कवलवत् भक्षणं किन्तु स्वस्मिन् लयीकरणमेवेति तत्रत्यनिर्णयात्। ब्रह्मातिरिक्तं सर्वमेव जगददनीयमत्र चामुपदार्थः।

For Private and Personal Use Only

(१) यस्मिन् मन्त्रे या देवता तन्मन्त्रकरणकहोमे तद्देवतोद्देश्यक एव त्यागो विधीयते यथा "ये ते शत"मिति मन्त्रे सवित्राद्युद्देश्यकः तथात्र नवार्णहोमे स्वाहाशब्दान्ते सर्वोत्तमायै चरमवृत्तिरूपायै ब्रह्मविद्यायै इदमिति पेक्षया न्यूनतादात्म्यवतामेव केशानां वपने प्रयोगात्। गौड़पादीयभाष्ये तु शरीरराहित्यलक्षणमुण्डतायाः मुण्डकोपनिषत्प्रोक्त शरीरविशेषवत्ताया अमुण्डतायाश्च सत्त्वाच्चामुण्डात्वमित्यर्थ इत्युक्तम्। अथवा चानां बुद्धीनां मुखानां वा मुण्डमिव शीर्षमिव स्थिता, सर्वोत्तमा चरमवृत्तिरूपा ब्रह्मविद्येति यावत्। अथवा (१) चण्डिका-रूपदेवता पर एव चामुण्डाशब्दः अतएव मन्त्रान्ते वह्निजाया (२) योजनेन होमे चामुण्डाया इदमित्येव त्यागो विधिशब्दस्य मन्त्रत्वमित्यधिकरणन्यायसिद्धो युज्यते। चतुर्थीबलाच्च नमः शब्दस्यैवाध्याहारः। बीजत्रयमप्यव्यय-रूपं चतुर्थ्यन्तमेव व्यष्टिदेवतात्रयवाचकमभेदद्योतकं, तद्विशेषणं विच्चे इत्यप्यखण्डमव्ययं मोचनार्थकं, स्वरादेरा-कृतिगणत्वात्, मन्त्रस्य पदखण्डशो न्यासप्रकरणे अस्य युगलस्य विभजनं विनैव न्यासविधानात्। भगमालिनी नित्या मन्त्रादिषु बहुषु तस्य प्रयोगसत्वेन तन्त्रोक्तार्थरीत्या निर्वाहाभावाच्च। ततश्च हे अम्ब! बन्धनकारणीभूतामिमां ब्रह्मविद्योद्देश्यकस्त्यागो भवत्यतश्चामुण्डाशब्दोऽत्र देवता पर एव न ब्रह्मविद्या पर इत्याह अथवेति। (२) वह्नि-जाया स्वाहा।

(१) अलङ्कारः परिकरः साभिप्राये विशेषणे सुधांशुकलितोत्तंसस्तापं हरतु वः शिव इति चन्द्रालोके। (२) तव्यपदस्य सूपादिपरत्वं कर्णाटभाषायां नीतेर्दुःखपरत्वं द्राविड़भाषायां पृष्ठपदस्य योनिपरत्वं मञ्चीत्यस्य सुन्दरपरत्वं

रज्जुं ग्रन्थिविसर्जनादिनामोचयेति स्त्रीसम्बोध्यकमोक्षप्रार्थनारूपो विशिष्टस्तदर्थः। यद्यपि दक्षिणामूर्तिसंहितायां भगमालिनीति मन्त्रस्थदेवतागणनावसरे अमोघां चैव विद्यां च नधिशीं क्लिन्नदेवतामिति पाठात् विद्यानामिका काचिद्देवतैवेत्यालोच्यते तदापि परिकरालङ्कारेण(१)साभिप्रायं चामुण्डाविशेषणं, मोचयतीत्येव तदर्थः। तस्मिन्नेवार्थे कर्णाटभाषाविद्भिरान्ध्रभाषाविद्भिश्च शिष्टैः प्रयोगेण शक्तिग्रहसम्भवात्। पृणीयादि न्नाधमानाय तव्यानिति श्रुतौ तव्यपदस्य सूपादिभक्ष्यपरतायाः, नुवन्तं याञ्च यामुपेति श्रुतौ नीतेर्दुःखपरतायाः, तासां वायुः पृष्ठे व्यवर्त्ततेति श्रुतौ पृष्ठपदस्य योनिपरतायाः, पढमञ्ची हंसपदमिति प्राकृतपिङ्गलसूत्रे मञ्चीत्यस्य सुन्दरपरतायाः, अन्यत्र च कर्णाटद्रविड़ान्ध्रभाषाप्रसिध्यैव (२) शक्तिनिर्णयस्य बहुशोऽङ्गीकृतत्वात्, पिकनेमाधिकरण(३)स्यैतदर्थमेव विशिष्य प्रवृत्तेर्भट्टिचन्द्रोदयेऽस्माभिर्वर्णितत्वाच्च, भाषाणां संस्कृतापभ्रंशत्वेनापेक्षितार्थे

चान्ध्रभाषायां प्रसिद्धम्। (३) तदधिकरणसंग्रहश्लोकौ चेत्थमुदाजहार न्यायमालायां माधवः। कल्प्यः पिकादिशब्दार्थो ग्राह्यो वा म्लेच्छरूढितः कल्प्यो ह्यार्येष्वसिद्धत्वादनार्याणामनादरात्। ग्राह्या म्लेच्छप्रसिद्धिस्तु विरोधा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दर्शने सति पिकनेमादिशब्दानां कोकिलाद्यर्थता ततः। पिकमालभेतेत्यादि पिकालम्भनचोदनावाक्येषु कोऽसौ पिकशब्दार्थो यस्यालम्भनं श्रुत्वा विधीयते, न ह्यार्य्याः कस्मिंश्चिदप्यर्थे पिकशब्दं प्रयुञ्जते, म्लेच्छास्तु पिकं कोकिलमाचक्षते ते च न प्रमाणमतो निगमनिरुक्तादिरीत्या पिकशब्दार्थः कश्चित् कल्पनीयः 'यद्यपि कोशेषु पिकशब्दोऽपि कोकिलपर्य्याये पठ्यते तथापि म्लेच्छप्रसिद्ध एव स बहुतरव्यवहृतेस्तत्रोपनिबद्ध इत्यवधेयम्' शिष्टाशिष्टविरोधे

विरोधाभावे निर्णायकत्वसम्भवाच्च, तन्त्रोद्धृतमन्त्रेषु भाषामिश्रणस्यापि बहुशो दर्शनेन चरणायुधादिदैवत्यमन्त्रेषु पुंकोलीत्यादिशब्दानां कुक्कुटादिष्विव प्रवृत्तेश्चेति द्रष्टव्यम्। काल्यै लक्ष्म्यै सरस्वत्यै चण्डिकायै नमोऽस्तु ते अविद्यायापाशहृदयग्रन्थिं विस्रस्य मुञ्च मामिति तु मन्त्रार्थसंग्रहः। रहस्यतन्त्रे तु महावाक्यस्येव जीवब्रह्मणोरभेद एव मन्त्रस्यार्थ इत्युक्तं तन्निर्वाहे गुरुचरणाविव शरणमिति दिक्॥ अत्र प्राञ्चः। तिसृणा-

शिष्टप्रसिद्धिर्बलवती विरोधाभावे तु म्लेच्छप्रसिद्धोऽप्यर्थः स्वीकार्य्य एव, निगमनिरुक्तादिबलेनार्थकल्पनं तु तत्रैव सम्यक् यत्र म्लेच्छप्रसिद्धशाप्यर्थो न भासते। एवमत्रापि शिष्टा न हि कस्मिंश्चिदप्यर्थे विञ्चे पदं प्रयुञ्जते आन्ध्राद्राविड़ाश्च तं मोचनार्थकमाचक्षतेऽतः शिष्टप्रसिद्धेरविरुद्धा द्राविड़ान्ध्रप्रसिद्धिरप्यत्रार्थे प्रमाणं न तु विञ्चे पदस्यान्यरीत्यार्थान्तरकल्पनं युक्तमिति। अत्र शिष्टाः संस्कृतज्ञाः म्लेच्छाः संस्कृतातिरिक्तभाषाव्यवहारिणः।

For Private and Personal Use Only

(१) तथा च मन्त्रः। सन्त्वमग्ने! सूर्य्यस्य वर्चसागथाः इत्यादि यजुः सं० अ० ३ मं० १८ हे अग्ने! त्वं रात्री

मपि देवीनान्तुरीययासहाभेदाऽविशेषेऽपि महालक्ष्म्या एव प्राधानिकरहस्ये 'सर्वस्याद्या महालक्ष्मी'रित्यादिना तुर्यास्थाने गणनादितरयोः देव्योरेतज्जन्यत्वस्य कथनात्, महालक्ष्मीजननस्य पार्थक्येनाकथनाच्चोपास्य देवतायास्तुरीयत्वेपि तस्यां रजः प्राधान्येनेतरगुणयोर्न्यग्भावेनैव भावनमावश्यकमित्याहुः। तामेव च रीतिमाश्रित्य महालक्ष्मीबोधकहृल्लेखाया एव नवार्णे प्रधानबीजत्वादथर्वशीर्षेतावन्मात्रेण पुनः स्वातन्त्र्येणोद्धारस्यापि प्राधान्यध्वननार्थत्वात् सप्तशतीस्तोत्रेऽपि प्रथमश्लोके बिन्दुरहिताया अपि तस्या उद्धारेण समष्टिव्यष्टिभेदाच्चत्वारोऽपि मन्त्रा उद्धृतप्राया इति वदंतष्टीकाकारास्तदुद्धारप्रकारं देवीचन्द्रकलास्तवे दीक्षितैः प्रदर्शितमेव लिखन्ति। यथा 'सावर्णिः सूर्य्यतनयो यो मनुः कथ्यतेऽष्टमः निशामय तदुत्पत्तिं विस्तराद्गदतो मम'। अस्यार्थः, यः यकारादष्टमो हकारः सूर्य्यतनयोऽग्निः रेफः दिनान्ते सवितृतेजसोऽग्नौ निक्षेपेण(१)पितुरस्य धनस्य पुत्रे निक्षेपदर्शनेन तत्साहश्यादग्नौ सूर्य्यपुत्रत्वम्। वर्णैः सहिता सवर्णा अजामेकां लोहितशुक्लकृष्णामिति (२) श्रुतिप्रसिद्धामूलप्रकृतिः, तस्या वाचकत्वेन पुत्रत्वोपचारादिप्रत्यये सति

सूर्य्यस्य वर्चसा समगथाः सङ्गत इति तदर्थः। (२) अजामेकां लोहितशुक्लकृष्णां वह्वीः प्रजाः सृजमानां सरूपाः अजो

ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः । श्वेताश्वतरे अ० ४ मं० ५ अत्र अजामूलप्रकृतिः सा च रजः सत्वतमः स्वरूपरक्तशुक्लकृष्णवर्णत्रयसहिताऽतः सवर्णेत्युच्यते । (१) अङ्गीकृतं चैतन्मन्त्रमयीमेव देवतां ब्रुवद्भिर्मीमांसकैः । [२] वस्तुतस्त्वस्मिन् श्लोके सविन्दुकहृल्लेखाऽप्युद्धर्त्तुं शक्येत्याह वयन्त्विति । (३) पतिर्जायां प्रविशति

सावर्णि रीकारः तेन निर्विन्दुको ह्रींकारः सिद्धः, स मनुर्मन्त्रः कथ्यते ; देवीमन्त्रयोरभेदात् (१) तदुत्पत्तिं तदवतारान् गदतो मम मुखान्निशामयेति वर्णयन्ति । आर्षवाक्यानां सर्वतोमुखत्वादस्तु कथञ्चिद् युक्तमेवैतत् । (२) वयन्तु ब्रूमः अम् गत्यादिष्विति धातोर्निशाममतोति व्युत्पत्त्या निशाम् चन्द्रोविन्दुः, अयेत्येतावानेव धातुः इट्किट्कटीगतावित्यत्र प्रश्लिष्टस्येकारस्य रूपं, सूर्य तनयशब्द एव वाऽऽह्वत्याविन्दुपरोऽपि ; जलमण्डले सूर्य्यकिरणानां प्रवेशेनैव चन्द्रात्मतया परिणामेन 'पतिर्जायां प्रविशतीति (३) न्यायेन चन्द्रस्य सूर्य्यपुत्रत्वात् 'नवो नवो भवति जायमान' इत्यस्यामृचि योऽह्नां (४) केतुरुषसामग्र उदेति स एव देवेभ्यो भागं विदधत् पुनः पुनर्जायमानश्चन्द्रमा भवतीति कथनाच्च । (५) अपिच चतुर्थस्वरस्य वर्णे वामे स्त्रीलिङ्गा-

गर्भो भूत्वेह जायते एतद्धि जायाया जायात्वं यदस्यां जायते पुनः । (४) नवो नवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रम् भागं देवेभ्यो विदधात्यायन् प्रचन्द्रमास्तिरते दीर्घमायुरिति पूर्णा ऋक् । (५) ऐ वीजोद्धारमाह अपि चेति ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भावेन नदीसंज्ञाभावात् पञ्चम्यां य इत्येवंरूपम् ईकारादित्यर्थः दिग्योगपञ्चम्या ईकारात् परत इत्यर्थः। परित्यज्येति ल्यप्लोपे वा पञ्चमी तेन तत्परतोऽष्टमो द्वादशस्वरः, विन्दुः पूर्ववत् इति वाग्भवोद्धारः॥ अपिच (१) यः अष्टम इत्येतयोरन्यतरस्य हिरात्रत्येकारात्परोऽष्टम ईकारात्पूर्वः कार्य्य इति वा, ईकारादष्टमः तस्मादपि विलोमाष्टम इति वा व्याख्येयं, ततो मनुश्चतुर्दशस्वरः औकारः, तेनेयं त्र्यक्षरीत्रैपुरकं दाख्याविद्या; एतां प्रकृत्य तन्त्रराजे 'एषा त्रैपुरकं दास्या'दिति वचनात्। तन्त्रान्तरे त्वस्या एव चेतनोति नाम। एतदुद्धारो योगिनीतन्त्रे। शिवाष्टमं केवलमादिवीजं भगस्य पूर्वाष्टमवीजमन्यत् परं शिवान्तं मनुयुक् त्रिवर्णा संकेतविद्या गुरुवक्त्रगम्येति। 'शिवा' ईकारः शिव उकार इति वा तस्या 'अष्टमं' तत्परतस्तमारभ्य वाष्टमं द्वादशस्वरात्मकं 'केवलं' विन्दुरहितं 'भगस्य' ऐकारस्य एकारस्य वा 'पूर्वाष्टमं' ततः पूर्वेषु तमारभ्य वा विलोमाष्टमं चतुर्थस्वरात्मकं, शिवोऽनुस्वारोऽन्ते यस्य तत् ततो 'मनुयुक्' चतुर्दशस्वरयुक्ता त्र्यक्षरीविद्यास्तीदेवत्या 'संकेतगम्या' गोपनीयेति तद्व्याख्यातारः तेन, 'ऐं ह्रीं औं' इति विद्यासिद्धाति। अपिच, (२) अकारः सर्ववर्णाग्रः

(१) अत्रापि पञ्चमी दिग्योगे ल्यब्लोपे वा पूर्ववत् विन्दूद्धारोऽपि पूर्ववत् एवमग्रेऽपि। (२) श्रीं वीजसुद्धरति अपि चेति।

For Private and Personal Use Only

(१) ईमिति कामकलावीजम्। (२) यवर्गे लकारः शवर्गे चकारश्चेति कृत्वा कचटतपयशवर्गेषु प्रत्येकस्मिन् पञ्चपञ्चाक्षराणीति सप्तवर्गेषु पञ्चत्रिंशदक्षराणि भवन्ति नवभिर्भक्ते पुनरष्टावशिष्टानि, तत्र ककारमारभ्य नवकगणनायां प्रथमनवकादिः ककारः द्वितीयनवकादिर्ञकारस्तृतीयनवकादिर्धकारश्चतुर्थनवकादिर्लकारस्तमारभ्य

प्रकाशः परमः शिवः हकारोऽन्त्यकलारूपो विमर्शाख्यः प्रकीर्त्तितः अकारादि क्षकारान्तं मातृकामण्डलं त्विदमित्यादिव्यवहारात्क्षकारस्य लकारेऽन्तर्भावेन क्षकारस्य संयुक्तत्वेन पार्थक्याभावादूनपञ्चाशद्वर्णं मातृकामण्डलमिति पक्षे व्युत्क्रमेण गणनायां चतुर्थस्वरादष्टमः शकारः रेफेकारविन्दवः पूर्ववदिति रमावीजोद्धारः॥ अपिच यो मनुः यकाराच्चतुर्दश ईकारो विन्दुश्चेति कामकलोद्धारः (१) अष्टम इति कादिनवकादिपरिभाषयैकपञ्चाशदक्षरं (२) स च क्षकारः रेफौकारविन्दुभिर्योगे नारसिंहोद्धारः॥ (२) गदतो ममेत्यत्र गकारः स्वरूपं, दतो दकारं परित्यज्य 'मम' पञ्चकद्वयं दशमो लकारः औकारविन्दुयोगे वाराही-

क्षकारोऽष्टमः स च एकपञ्चाशद्वर्णं मातृकामण्डलमिति पक्षे सर्वान्तिमत्वादेकपञ्चाशतमः। सूर्य्यतनयो रेफः मनुरौकारः विन्दुः पूर्ववत् एवं नारसिंहस्य क्ष्रौंवीजस्योद्धारः। (३) ग्लौमिति वाराहीवीजं, क्लीमिति कामवीजं गमिति गणपतिवीजं च।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(१) मेधासि देवि ! विदितेति चतुर्थाध्यायस्थमन्त्रे क्रमश ऐं स्त्रौं श्रीं वीजानामुद्धारः। (२) अग्निमीले पुरोहितम्। इषे त्वोर्जेत्वा। अग्न आयाहिवीतये। एतानि ऋग्यजुः सामवेदानामाद्यमन्त्रप्रतीकानि। (३) साद्यस्क्रनामका ११

वीजोद्धारः॥ यो मनु रीकाराच्चतुर्दशः ककारः तस्य लकारेकारविन्दुयोगे कामवीजोद्धारः। ग इति स्वरूपस्य विन्दुयोगे गणपतिवीजोद्धारः। सवर्णः सकारः आत्मन एव पुत्रत्वविवक्षायां स्वार्थे पर्य्यवसन्न इञ्, सूर्य्यतनयो यमो हकारः मनुरीकारः तत्परतो विसर्गान्तस्याऽनक्षिचेति प्रश्लेषेण परायाः प्रासादस्य तयोर्योगयोरप्युद्धाराद्रष्टव्याः॥ एवमन्यत्रापि (१) 'मेधासि देवि ! विदिताखिलशास्त्रसारे'त्यत्र पादभेदेन वाक् सर्वमङ्गला लक्ष्मीणामुद्धारः। शास्त्रशब्दो वेदपरः शास्त्रयोनित्वादिति (वे० सू० २।३ अ० १ पा० १) व्याससूत्रादिषु व्यवहृतः (२) अखिलशब्देन त्रयी, कथ्यते तत्र व्यञ्जनानामविवक्षितत्वादाद्यंतयोरकारद्वयं मध्य इकारः सिद्धः, वेदत्रयाद्याक्षराण्यपि क्रमेण तथैव, तेषां मध्ये द्वयोः क्रमेण सन्धौ गुणे सत्येकारः अवशिष्टयोर्व्युत्क्रमेण सन्धौ वृध्या ऐकारः एवं साद्यस्क्रिय पशुत्रयालम्भसाहित्यन्यायेन (३) मध्यभागे मिलितैर्वेद-

एकसङ्घवर्त्तिनो बहवो यागाः श्रुतास्तत्र च "निकायिनां पूर्वस्योत्तरेषु प्रवृत्तिः स्यात्" ८।१।१८ इति जैमिनीयसूत्रेण पूर्वसाद्यस्क्रधर्माणां यथोत्तरेषु साद्यस्क्रेष्वति देशः क्रियते तथाऽद्यवर्णाकारनिष्ठस्य पूर्ववृत्तित्वरूपधर्मस्योत्तराकारे-

For Private and Personal Use Only

प्यति देशो बोध्य अतएव आद्गुण: सूत्रवद् वृद्धिरेचीत्यस्यापि प्रवृत्तौ अ ई अ इति वर्णत्रयस्य मध्यभागे मेलनम्। व्याकरणविरुद्धमप्येतदार्षवाक्योपोद्दलितत्वादाश्रीयते कथञ्चित्। (१) शन्नो देवीरभिष्टये इत्यथर्वणाद्यमन्त्रप्रतीकम्।

त्रयाद्याक्षरैरेव वाग्भववीजोत्पत्तेस्तन्त्रराजे स्पष्टं कथनात्, तदिदमखिलशास्त्रसारत्वम्। एतेन ऋक्-सामयोर्यजुषिसन्धिवशादुदीर्णं वीजं सरस्वति! सकृत्तव ये जपन्ति। ते सत्यवाक्यमुनिवद्विदितत्रयीका आथ-र्वणादिकमवाप्य सुखीभवन्तीति श्लोकोऽपि व्याख्यातः। सत्यवाक्यो नाम मुनिर्भेदैनैकारमात्रोच्चारणेन वेदचतुष्टयमङ्गानि चाधिगतवानिति भगवतीपुराणस्थाया आख्यायिकायाः पृथ्वीधराचार्य्यैर्निबन्धनात्, आथ-र्वणादिकमित्यस्य शमिति (१) तत्प्रथमाक्षरमित्यर्थः सुखीभवन्तीति निश्चितं मुक्ता भवन्तीति यावत्॥ दुर्गासि दुर्गभवसागरनौरसंगेति तद् द्वितीयचरणे भवः शिवः सकारः सागरो जलरूपो वकारः नौ असङ्गा व्यञ्जनसङ्गहीना इति च, तेन स्वौ इति सर्वमङ्गलाख्या दुर्गा। तदुत्तरार्द्धे 'श्रीः कैटभारि हृदयैककृता-धिवासा गौरि! त्वमेव शशिमौलिकृतप्रतिष्ठे'त्यत्र श्रीरिति कण्ठरवेणैवोद्धृत्य तद्देवताध्यानस्थं विशेषणद्वयं कैटभारीत्यादिना कथितं, भूयाद्भूयो द्विपद्माभयवरदकरा तप्तगाङ्गेयगौरी पद्माक्षीः पद्मनाभोरसिकृतवसतिः पद्मगा श्रीः श्रियै न, इत्यादितद्ध्यानश्लोकस्य प्रपञ्चसारादौ कथनात्; उद्धृतस्य बीजत्रयस्य विन्दुयोगं

(१) शशिना चन्द्रेण विन्दुनेति यावत् मौलौ चूडायां कृता प्रतिष्ठा स्थितिर्यस्याः यद्वा शशी चन्द्रोविन्दुः मौलौ यस्याः सा शशिमौलिः अतएव कृतप्रतिष्ठा इति वा। एतस्य पूर्वोक्तपादत्रयेऽपि सम्बन्धः तेनोद्धृतवीजत्रयेऽपि विन्दुयोगलाभः। १२

तन्त्रेणाह शशिमौलीति (१) स्पष्टोऽर्थः॥ अपिच, त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारस्वरात्मिकेत्यत्र 'का'ककारेण सह रः रेफः स्वरात्मिका स्वरेषु चतुर्थवती आत्माऽन्तरात्म-परमात्म-ज्ञानात्मनां चतुष्टयस्यात्मोप-निषदि पीठन्यासादौ च प्रसिद्धत्वात्॥ 'स्वधा त्वमक्षरे नित्ये' इत्यत्र तकाराविवक्षया वमिति सुधाबीजं, त्रिधामात्रात्मिकास्थितेति प्रणवमुक्त्वा अर्द्धमात्रस्थितानित्येत्यनेन क्रालीवीजप्रणवयोरर्द्धमात्रात्मकानुस्वारयोग-मुपदिश्य 'यानुच्चार्या विशेषत' इत्यनेन तदन्ते नादोऽप्युद्धृतः॥ (१) अपिच यस्याः प्रभा त्वमतुलं भग-वाननन्तो ब्रह्मा हरश्च नहि वक्तुमलं बलञ्च सा चण्डिकेत्यत्र नवार्णमन्त्रगतानां चतुर्विंशतिवर्णानामुद्धारः। मन्त्रे हि आकाराद्याश्चत्वारः स्वरा एकारादिद्वयञ्च, एतेष्वाकार ईकार ऐकारश्च द्विरावृत्ता इति नव स्वराः चत्वारो विन्दवः, कचडता मादिपञ्चकं हकारश्चेति दशव्यञ्जनानि, तत्र चकारो द्विरावृतः, विच्चे इति प्रथम-

(२) नवार्णमन्त्रगतचतुर्विंशतिवर्णानामुद्धारमाह अपिचेति।

For Private and Personal Use Only

(१) भगेन युतोवान् भगवान् इति विग्रहमङ्गीकृत्याह भग एकार इति। (२) द्विरन्वय इति तेन यकारादुत्तरस्याप्यैकारस्य लाभः वस्तुतस्तु त्रिरन्वयः तेन बलं तत्वञ्च वक्तुं नालमित्यत्रापि बक्तुमिति पदं संयोजयिष्यते। (३) आच-

चकारस्य तकाररूपत्वात् संहत्य चतुर्विंशतिः; तेषु वमतुलमित्यनेन व्यञ्जनचतुष्टयं पञ्चमस्वरो विन्दुश्चेति षस्मां निर्देशः, अकारा उच्चारणार्थाः, भग एकारः(१) वातीति वान् शत्रन्तः तेन वायुर्यकारः, अनन्त आकारः, ब्रह्मा ककारः, ह र इति स्वरूपं, चकारोऽपि स्वरूपं, वक्तुं वाग्भवम् ऐकारः तस्य द्विरन्वयः(२), आचण्डिकैः 'आकारादिभिरिकारान्तैः पञ्चभि(३)रीकाराभ्यां(४) च' सहिता साचण्डिका, चण्डिकापदद्वयस्य तुर्यस्वरवाचकस्य विरूपैकशेषः, इपदात्(५) स्वार्थे कप्रत्ययेनेकार एक एव, लं चं इति विन्दुद्वयस्य द्विर्द्विरन्वयः, इत्थं चतुर्विंशतिवर्णाः। अनन्तादिपदत्रयस्य नवार्णमन्त्रद्रष्टृऋषिपरत्वेनापि पुनरन्वयादक्षराणि ऋषयश्च यस्या देव्याः प्रभा किरणसमूहः; बलं तत्वञ्च वक्तुं नालं वाचामगोचरः, साखिलजगत्परिपालनाय आसुरभयनाशाय च मतिं करोतु इत्यन्वयः। एवं तृतीयचरित्रे त्रिपाद्गायत्रीमन्त्रा विभागानुषङ्गोद्भवास्त्रिस्त्रिरावर्त्यमाना वक्ष्यन्ते

ण्डिकैरिति आकार चकारानुस्वार डकारिकारैरित्यर्थः। (४) विरूपैकशेषप्रलुप्तचण्डिकापदद्वयोपस्थिताभ्याम्। (५) आचण्डीत्यत्रान्तिमात्।

(१) रुद्रयामले। सविशेषपरं साक्षात् चिच्छक्ति महिमाश्रयं, तात्पर्य्यगत्या तत्सर्वं निर्विशेष चिदाश्रयम्।

ते च कात्यायनीतन्त्ररीत्या द्वाविंशतिरेव, तन्त्रान्तरेषु धृतिपुष्ट्योरधिकयोराम्नानाच्चतुर्विंशतिः, ते प्रकृतमन्त्रवर्णानामेकैकस्योद्धारकाः परन्तु बहुकोशलेखनादिक्लेशसापेक्षत्वान्नेह तदायासः प्रदर्श्यते॥ एवमन्यत्राप्यस्वानुग्रहपात्रतातारतम्येन सर्वमिदं स्तोत्रं मन्त्रोद्धारगर्भितमेव दृश्यते। उक्तञ्च वेदागमे। निर्विशेषपरा मन्त्राः सविशेषपराश्च (१) ये प्रत्यध्यायं निगूढास्ते तेनेयं सर्वतः परेति। ईदृशबन्धाशयेनैव 'चक्षुष्मन्तोऽनुपश्यन्ति नेतरेऽतद्विदो जना' इति रहस्योक्तिर्द्रष्टव्येति दिक्॥ अयञ्च मन्त्रः, स्वतन्त्रोपास्यः सप्तशत्यङ्गं चेति, द्विप्रकारोपास्ति(२)मस्य केचिदाहुः वैपरीत्यात्, सप्तशत्यैव तु तद्विद्योपास्येति स्पष्टीकरिष्यतेऽनुपदमेव। उभयथापि नवार्णस्य संक्षेपेण साधनप्रकार इह वक्तव्य एवेत्युच्यते॥ नवाक्षरस्य ऋषयो ब्रह्मविष्णुमहेश्वराः। छन्दांस्युक्तानि मुनिभिर्गायत्र्युष्णिगनुष्टुभः॥ देव्यः प्रोक्ता महापूर्वाः काली लक्ष्मीः सरस्वती। नन्दाशाकम्भरीभीमाः शक्तयोऽस्य मनोः स्मृता॥ स्याद्रक्तदन्तिकादुर्गाभ्रामर्यो वीजसन्ततिः। अग्निर्वायुः सूर्य्यस्तत्वं (३) फलं वेदत्रयोद्भवम्॥ सर्वाभीष्टप्रसिध्यर्थे विनियोग उदाहृतः। ऋषिच्छन्दोदैवतानि

(२) स्वतन्त्रोपासनाम्। (३) वायूरविस्तत्वमिति पाठान्तरम्।

For Private and Personal Use Only

शिरो-मुख-हृदि न्यसेत् ॥ शक्तिवीजानिस्तनयोस्तत्वानि हृदये पुनः। क्लीं चण्डिकायै व्यस्तेन सर्वेण च षड़ङ्गकौ ॥ एते पञ्चवर्णाः समस्तश्चैक इति षड्भिरङ्गुष्ठादिन्यासो हृदयादिन्यासश्च कार्य्य इत्यर्थः। खड्गिनी शूलिनीत्यादि पठित्वा श्लोकपञ्चकं। आद्यं कृशानतरं वीजं ध्यात्वा सर्वाङ्गके न्यसेत् ॥ 'आद्यं' वाग्भवं, श्लोकास्तु सप्तशतीस्तोत्रस्थाः। विश्वातीतमहामन्त्रात् प्रोच्य श्लोकचतुष्टयम्। ध्यात्वा सूर्य्यनिभं वीजं द्वितीयं सर्वतो न्यसेत्। 'द्वितीयं' हृल्लेखा। क्वचित्तु चरण त्रयस्यान्यथा पाठः 'शूलेन पाहिनो देवीत्यादि-श्लोकचतुष्टयं पठित्वा सूर्य्यसदृशमिति' तेन तदेव विश्वातीतमहामन्त्रपदस्य व्याख्यारूपम्। सूर्य्यस्य द्वादशकला-स्तापिन्यादयः तासु ककारादीनां क्रमेण द्वादशानां भकारादीनां व्युत्क्रमेण द्वादशानां च वर्णानां युग्मशो योगस्तन्त्रेषु विहितः तासु नवम्यां विश्वाभाम्नां कलायां भकारतकारयोर्योगसत्वेपि प्रकृते विश्वापदेन तकार एव विवक्षितः (१) तेन तकारशून्यं श्लोकमारभ्येत्यर्थः। कयापि विधया सप्तशत्यां तादृशस्य श्लोक-मन्त्रान्तरस्याऽभावादेव नातिप्रसक्तिः, एकं जग्राह केशेष्विति श्लोके द्वात्रिंशदक्षरात् परतो व्यञ्जनरूपो वा श्रूयत एव, इत्थं निशम्य देवानां वचांसि मधुसूदन इति श्लोके थकारयोगेन श्रूयते, हन्यमानं महासैन्यं

(१) विश्वातीतपदस्यार्थस्तु विश्वया विश्वोपलक्षितेन तकारेण अतीतो रहितो यो महामन्त्रः श्लोकात्मक इति।

(१) द्वितीयाध्यायमन्त्रेषु मन्त्रत्वसामञ्जस्याय शूलं शूलाद्विनिष्कृष्येत्यतः प्राक् कैश्चित्पठ्यमानः ततो देवाददुस्तस्यै स्वानि स्वान्यायुधानि चेत्यर्द्धश्लोकोऽधिकः स्वीकरिष्यते, ततश्च चुक्षुभुः सकला लोकाः इति श्लोकस्य १४

विलोक्यामर्षमुद्वहन् अभ्यधावन्निशुम्भोथेत्यत्राभ्यधावदिति पदच्छेददशायां तकारव्यक्तिरस्त्येव, चुक्षुभुः सकला लोका इति श्लोकस्तु पूर्वोत्तरमन्त्रयोरुत्तरपूर्वार्द्धरूपत्वादखण्डो मन्त्र एव न भवतीति कयापि रीत्या तकाराभावः शूलेनेति श्लोकमन्त्र एव, ततो देवा ददुस्तस्याः इत्यर्द्धसद्भावपक्षे तु (१) चुक्षुभुरित्यस्य निरासः साम्प्रदायिकव्याख्यानत एवेति गुप्तं रहस्यम्। सर्वस्वरूप इत्यादिश्लोकानां पञ्चकं पुनः पठित्वा स्फटिकाभासं तृतीयं स्वतनौ न्यसेत्। 'तृतीयं' कामवीजम्। अत्र प्रथमतृतीययोर्वीजयोर्महासरस्वतो महाकालीरूपयोः श्वेतकृष्णरूपत्वेपि वैपरीत्येन रूपनिर्देशो वास्तविकाभेदसत्वेन रहस्ये (२) वक्ष्यमाणं सरस्वत्याः कृष्णाङ्गविष्णुजनकत्वं काल्याः श्वेताङ्गशिवजनकत्वं चाभिप्रेत्येति बोध्यम्। ततः षडङ्गं कुर्वीत विभक्तैर्मूलमन्त्रकैः एकैनैकेन चैकेन चतुर्भिर्युगले न च। समस्तेन च मन्त्रेण कुर्य्यादङ्गानि षट् सुधीः॥ अथ ध्यानं,

मन्त्रत्वमप्यव्याहतं सेत्स्यतीति कथं शूलेन पाहीत्यत्रैव तकारशून्यत्व मत आह ततो देवा इति। (२) प्राधानिकरहस्ये विंशत्यादिश्लोकत्रये।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(१) अस्यानि च पादाश्च आस्यपादम्, आस्यपादं दश यस्याः सा आस्यपाददशका, यद्वा आस्यपादस्य यद् दशकं तद् विद्यते यस्या इति अर्श आद्यच्; उभयत्रापि द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बन्ध्यते इति

खड्गं चक्रगदेषुचापपरिघान् शूलं भुशुण्डीं शिरः, शङ्खं संदधतीं करैस्त्रिनयनां सर्वाङ्गभूषावृतं, नीलाश्मद्युतिमास्यपाददशकां (१) सेवे महाकालिकां, यामस्तौत्स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम्। अक्षस्रक्परशुं गदेषुकुलिशं पद्मं धनुःकुण्डिकां, दण्डं शक्तिमसिं च चर्म जलजं घण्टां सुराभाजनं, शूलं पाशसुदर्शने च दधतीं हस्तैः प्रबालप्रभां, सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम्। घण्टां शूलहलानि शङ्खमुसले चक्रं धनुः सायकान्, हस्ताब्जैर्दधतीं घनान्तविलसच्छीतांशुतुल्यप्रभां, गौरीदेहसमुद्भवां त्रिजगतामाधारभूतां महापूर्वामत्र सरस्वतीमनुभजे शुम्भादिदैत्यार्दिनीम्। इति ध्यात्वा मनसाऽन्तर्यागं कृत्वा बहिर्यागमपि यन्त्रे कुर्य्यात्। यन्त्रं यथा। लिखेदष्टदलं पद्मं कुंकुमागरुचन्दनैः पद्ममध्ये लिखेच्चक्रं षट्कोणं चण्डिकामयम्। षट्कोणचक्रमध्यस्थमाद्यं वीजत्रयं न्यसेत् पूर्वादिकोणषट्केतु वीजान्यन्यानि विन्यसेत्।

परिभाषया दशेत्यस्यास्ये पादे चान्वयः तेन दशास्यां दशपादां चेत्यर्थः। दशवक्त्रा दशभुजा दशपादाञ्जनप्रभेति रहस्यात्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बीजानीत्यनेन अन्येषामपि बिन्दुयोगेनैव लेख उक्तः, लेखस्तु प्रादक्षिण्येन दक्षिणाद्वामान्तमिति ज्ञेयम्। एवं कृत्वा जपेल्लक्षचतुष्कं तद्दशांशतः पायसान्नेन जुहुयात् पूजिते हेमरेतसि। इदमेकं पुरश्चरणम्। अथवा आश्विनस्य सितेपक्षे आरभ्याग्नितिथिं सुधीः अष्टम्यन्तं जपेल्लक्षं दशांशं होममाचरेत्। अग्नितिथिः प्रतिपत् प्रथमां पिबते वह्निर्द्वितीयां पिबते रविरित्याद्युक्तेः। उभयत्र मन्त्रान्ते स्वाहायोजनेन होमः, तर्पणन्तु मन्त्रान्ते चण्डिका तृप्यत्विति योजनेन। अयमुभयविधोऽपि जपः सप्तशतीस्तोत्रेण संपुटीकृतो विधेयः। तदुक्तं डामरतन्त्रे। मार्कण्डेयपुराणोक्तं नित्यं चण्डीस्तवं पठन् पुटितं मूलमन्त्रस्य जपेनाप्नोति वाञ्छितमिति (१)। पुटितमिति पाठ क्रियाविशेषणं 'पुटितं' स्वसंपुटाकारता तथा च स्तवो यथा मूलमन्त्रजपस्य संपुटाकारो भवति तथा पठनान्मूलजपस्य यद्वाञ्छितं फलं तत्सिध्यतीत्यर्थः, ततश्च स्तवीय ऋष्यादिन्यासपूर्वकं चरित्रत्रयं पठित्वा मध्ये स्वसङ्कल्पितसङ्ख्याऽनुसारेण सहस्रादिसङ्ख्याकनवार्णं जपित्वा पुनश्चण्डीस्तवं पूर्ववत् पठेत् परन्त्वेतदन्ते पुनर्मूलमष्टोत्तरशतमात्रं जप्त्वा निवेदनादिकं कुर्य्यात् अयं जपोऽङ्गभूतो

(१) मार्कण्डेयपुराणोक्तं चण्डीस्तवं मूलमन्त्रस्य पुटितं सम्पुटाकारो तथा स्यात्तथा पठन् सन् जपेन पाठेन वाञ्छितं फलमाप्नोतीत्यन्वयः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(१) प्रयाजादयो हि दर्शपौर्णमास क्रतुस्वरूपपौष्कल्यायैव विधीयन्ते दर्शपौर्णमासफलेनैव च तेषां फलवत्वं, न

न प्रधानसंख्यायामुपयुज्यत इति विशेषः। तदप्युक्तं तत्रैव चरित्रत्रयस्य ऋष्यादीनुक्त्वा, एवं संस्मृत्य ऋष्यादीन् ध्यात्वा पूर्वोक्तमार्गतः सार्थस्मृतिपठेच्चण्डीस्तवं स्पष्टपदाक्षरं। समाप्तौ तु महालक्ष्मीं ध्यात्वा कृत्वा षडङ्गकं जपेदष्टशतं मूलं देवतायै निवेदयेदित्यादि। केचित्तु मूलमन्त्रस्यजपेन पुटितं चण्डीस्तवं पठन्निति प्रथमश्लोकं योजयन्तश्चरमश्लोके पुनर्विधानं संख्यामात्रपरमिति मन्यमानाः सप्तशतीस्तोत्रस्यैव मूलेन संपुटिताकारो विधीयत इत्यङ्गाङ्गिभाववैपरीत्यमिच्छन्ति। तदयुक्तम्। बहुषु तन्त्रेषु नवार्णं प्रकृत्य तत्प्रकरणे सप्तशती पाठविधानेन नवार्णजपस्य प्राकरणिकत्वेनान्याङ्गत्वायोगात्। तत्र विद्यमानाया अपि स्तोत्रफलश्रुतेः प्रयाजफलश्रुतेर्वसन्तमेवर्त्तुनाम च रुन्ध इत्यस्या इवाविवक्षितार्थकत्वात् (१)। मरीचिकल्पे रात्रिसूक्तं जपेदादौ मध्ये चण्डीस्तवं पठेत्। प्रान्ते तु जपनीयं वै देवी सूक्तमिति क्रमः। एवं संपुटितं स्तोत्रं पूर्वोक्त-

तु तेषां स्वतन्त्रं किञ्चित् फलमस्ति, फलवत्सन्निधावफलं तदङ्गमिति न्यायात्, तथाच यथा दर्शाद्यङ्गत्वात् तत्र वसन्त-मेवर्त्तुनाम चेत्यादिप्रयाजफलश्रुतिरविवक्षिता तथात्र नवार्णाङ्गभूतसप्तशतीस्तोत्रफलश्रुतिरप्यविवक्षितेति भावः।

For Private and Personal Use Only

(१) अत्रेदं तत्त्वम्। नवार्णसप्तशतीमन्त्रयोः प्रधानोपसर्जनभावेन प्रकारद्वयमस्ति, तत्र नवार्णस्य प्रधानत्वं सप्त-
शत्यास्तदङ्गत्वमित्येकः प्रकारः। सप्तशत्याः प्रधानत्वं नवार्णस्य च तदङ्गत्वमित्यन्यः, तत्र यः साधको नवार्णदीक्षां १६
गृह्णाति नवार्णमेव वा प्रधानतया स्वीकरोति तेन पूर्वोक्तविधानेन पूर्वोक्तमन्त्रे नवार्णदेवताः सम्पूज्य तदङ्गत्वेनाद्य-
न्तयोः सप्तशत्याः पाठः कर्त्तव्यः, यस्तु सप्तशती मालामन्त्र एव दीक्षितस्तामेव वा प्रधानतयोररीकरोति तेन

फलदायकमित्यनेन वैदिकसूक्तद्वयेन संपुटितायाः सप्तशत्याविधानाच्च (१) परन्त्वन्वारम्भणीयेष्टिव(२)न्नवार्णस्य स्तोत्रजपप्रारम्भमात्राङ्गत्वं जपाधिकारितावच्छेदकत्वं चेति (बोध्यम्)। रहस्यं तु कीलकाध्यायेस्पष्टी भविष्यति। अत्रापेक्षितः सामान्यविधिरन्ये विशेषा अपि कल्पवल्लीकारैरुक्ता इति तत एव सर्वमवगन्तव्यम्। इति नवार्ण-निर्णयः। द्वितीयस्तु चरित्रत्रयात्मिकः श्लोकसमूहरूपो मन्त्रः। स च वामनपुराणदेवीभागवतमार्कण्डेय-

रहस्योक्तप्रकारेण तदुक्तयन्त्रे नवार्णयन्त्र एव वा सप्तशती देवताः सम्पूज्य तदङ्गत्वेनाद्यन्तयोर्नवार्णमन्त्रं जपित्वा यथाविधानं सप्तशतीपाठः कार्य्य इति। (२) दर्शपूर्णमासावारप्स्यमाणोऽन्वारम्भणीयामित्याश्वलायनसूत्राद् दर्शपूर्ण-मासाभ्यां प्रागन्वारम्भणीयानामेष्टिः क्रियते तस्याश्च पूर्वोक्तयागप्रारम्भमात्राङ्गत्वमिति वृत्तिकृन्मतं, यागकर्त्तृपुरुष-संस्कारकत्वमिति च भाष्यकृन्मतमिति स्पष्टं नवमाद्यपादीयैकादशाधिकरणे मीमांसायाम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(१) इदानीन्तनमुद्रितपुस्तकेषु क्वचिदशीत्यध्यायोत्तरं देवीमहात्म्यमुपलभ्यते। (२) क्रतुस्वरूपपौष्कल्यायैव यो

पुराणादिषु लक्ष्मीतन्त्रादिषु च बहुविध उपलभ्यते तथापि मार्कण्डेयपुराणस्य एव त्रिसप्तत्यध्यायोत्तरं षडशीति तमाध्यायान्तमभिव्याप्तः(१) सावर्णिः सूर्यतनय इत्यारभ्य सावर्णिर्भविता मनुरित्यन्तस्त्रयोदशभिरध्यायैः परिच्छिन्नैः श्लोकसमूहात्मको मालामन्त्रत्वेन ग्राह्यः पूर्वोक्तडामरतन्त्रवचनात्। वाराहीतन्त्र-कात्यायनीतन्त्र-मरीचि-तन्त्र-हरगौरीतन्त्र-लक्ष्मीतन्त्रादीनां बहूनामैक्यकण्ठ्याच्च तस्यैवात्युत्तमत्वसिद्धेः तस्य पुरुषार्थत्वेन क्रत्वर्थत्वा-दिना (२) च पाठादिविधिर्मूल एव द्वादशेऽध्याये प्रदर्शयिष्यते, तन्त्रान्तरेषु च बहवो विधयः। अस्य सप्तशतीति व्यवहारस्तु न श्लोकसंख्यया तेषां षट्च्छतीतोऽपि न्यूनत्वात्। नापि कवचादित्रयरहस्यत्रययोर्मेलनेन। संख्याधिक्यापत्तेः। तस्माच्छकार सकारयोरभेदात् सप्तानां सतीनां देवीनां प्रतिपादनादेव तथा व्यव-हारो नेयः। तुरीयैका महाकाल्यादित्रयं तन्निर्मितमिथुनत्रये देवीत्रयं चेति सप्तानामेव प्राधानिक-रहस्ये प्रतिपादनादिति केचित्। तच्चिन्त्यम्। नन्दजारक्तदन्तीशताक्षीशाकम्भरीदुर्गाभीमाभ्रामरीत्येतेषामपि

विधीयते स क्रत्वर्थः। पुरुषप्रीतये विधीयमानो यः स पुरुषार्थः। बलिप्रदाने पूजायामित्यादिवाक्यैःसप्तशतीपाठस्य क्रत्वर्थत्वम्, न तेषां दुष्कृतं किञ्चिदित्यादिभिश्च पुरुषार्थत्वम्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सप्तानां रूपाणां मन्त्र एव प्रतिपादनेन विनिगमनाविरहात् संख्याधिक्यापत्तेः, तस्माज्जपे एकमन्त्रात्मकस्यापि मालामन्त्रस्य होमाङ्गेन सप्तशतधा विभजनाच्छतरुद्रियस्येवैकानेकमन्त्रात्मकत्वे विरोधाभावात्तथा व्यवहारोपपत्तिः (१) मन्त्रविभजनेऽपि यद्यामलवाराहीकात्यायनीतन्त्राणां वैमत्यं तत् तन्मन्त्रव्याख्यानावसरे परिहरिष्यते। यद्यपि कात्यायनीतन्त्रे पञ्चशतोत्तरमष्टसप्ततिः श्लोकाः यामलेत्वेकोनाशीतिः वाराह्यां तु सार्धाष्टाशीतिः कथिताः, उपपद्यते च वेदे शाखाभेदेनेव पुराणेषु कल्पभेदेन मनुपराशरहारीतादीनां वृद्धतरुणभेदेन तत्तत्स्मृतिवैलक्षण्यवत्पाठवैलक्षण्येऽपि प्रामाण्यं, ततश्च कवचस्य सार्द्धः पञ्चाशदर्गलायास्त्रयोविंशतिः कीलकस्य लघुगुरुभेदेन द्वैविध्यादाद्यस्य चतुर्दशांऽत्यस्य त्रयोविंशतिरित्येतेषां श्लोकानां वाराहीतन्त्रानुमतस्तोत्रश्लोकैः सह मेलनेनैकोनासप्तशतीसम्पद्यते, रहस्यत्रयस्याङ्गत्वे प्रमाणाभावेन तन्मेलनस्याप्रसक्तेः एकन्यूनाधिकभावस्यान्तरत्वेन तदनादरेण व्यवहारस्य पञ्चाशत्पीठरूपिणीति ललितानाम व्याख्यानावसरेऽस्माभिः समर्थितत्वात्, कात्यायनीतन्त्रोक्तविभागेऽपि द्वयोरन्त्ययोरेकैकस्य श्लोकस्यावृत्तेरपि सुवचत्वाद्वा ; तथापि जपेत्सप्तशतीं चण्डीं कृत्वा तु कवचं पुरेत्यादिना कवचमेलनाभावेऽपि सप्तशतीत्वप्रतीतेः

(१) सप्तशतीव्यवहारोपपत्तिः केचित्तु मेरुतन्त्रे दन्त्यतालव्योभयविशिष्टनामद्वयव्याख्यानादुभयमेव नाम वरमित्याहुः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कीलकद्वयप्रतिपाद्यस्यार्थस्याङ्गत्वेऽपि तयोरङ्गत्वे रहस्यवदेव मानाभावाच्चोक्त एव प्रकारो निर्दोषः। कवचं वीजमादिष्टमर्गलाशक्तिरिष्यते कीलकं कीलकं प्राहुः सप्तशत्या महामनोरिति गौड़पादधृतवचनादङ्गत्वेऽप्यदोष इति। यानि तु क्वचिद्देशे सार्द्धानि षट्शतानि क्वचित्तदधिकान्यपि श्लोकानां पठ्यन्ते तानि कात्यायनी भगवत्येव जानीते परन्तु तन्त्रत्रयेऽप्यदृष्टानीति दिक्। एतस्यैवोत्तमत्वं तु तन्त्रान्तरे। यथाश्वमेधः क्रतुषु देवानाञ्च यथा हरिः स्तवानामपि सर्वेषां तथा सप्तशतीस्तवः। तत्रापि कलावतिप्रशस्तः 'कलौ चण्डीविनायकाविति' वचनात्। वाराहीतन्त्रे। सर्वेषां स्तोत्राणां परशुरामशापमुक्ता तद्विरहितानि कतिचिद्गणितानि, भीष्मपर्वणि यागीता सा प्रशस्ता कलौ युगे। विष्णोर्नामसहस्राख्यं महाभारतमध्यगम्। चण्ड्यास्सप्तशतीस्तोत्रं तथा नाम सहस्रकमित्यादि, भार्गवाख्येन रामेण शप्तान्यन्यानि कारणादित्यंतेन, यद्यपि तन्त्रान्तरेऽस्यापि स्तोत्रस्य शिवशापः कीलनं चेति सिद्धिनिरोधकावुक्तौ तथापि तत्रैव शापोद्धारोत्कीलनयोः कर्म्मविशेषयोस्तदङ्गत्वेन सत्कारणविधानादकरणे सिद्धिविरहोक्त्या तदावश्यकत्वपरौ तावर्थवादौ, तत्र शापोद्धारो यथा; त्रयोदशप्रथमौ द्वादशद्वितीयौ एकादशतृतीयौ दशमचतुर्थौ नवमपञ्चमावष्टमषष्ठावध्यायौ पठित्वा सप्तममध्यायं द्विःपठेदित्याकारकः प्रयोगः। उत्कीलनं यथा। आदौ मध्यमचरित्रं पठित्वा ततः प्रथमचरित्रं, ततस्तृतीयचरित्रं पठेदित्याकारकः। अन्त्या१३द्या१र्क१२द्वि२रुद्र११त्रि३दिग१०ब्धं४के९ष्वि५भर्त्त८वः६।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(१) यस्यैकपाठाऽवसरो नास्ति तस्य मध्यमचरित्रमात्रपठनमप्यभ्यऽनुज्ञायते रहस्याध्याये यथा 'एकेन वा

अश्वो७ऽश्व७ इति सर्गाणां शापोद्धारे मनोः क्रमः। उत्कीलने चरित्राणां मध्याद्यान्त्यमिति क्रमः। अङ्गो नवकः। इषुः पञ्चमः। इभोऽष्टमः। ददाति प्रतिगृह्णाति नान्यथैषा प्रसिद्ध्यतीति विहितं दानप्रतिग्रहनामकं महोत्कीलनं तु कीलकाध्यायव्याख्यावसरे विशदीकरिष्यते(१)। एवं सम्प्रदायज्ञस्य निर्दोषमुत्तमं कलौ शीघ्रसिद्धिदमिदमिति सिद्धम्। एतद्वाचनक्रमो वाराहीतन्त्रे। यावन्न पूर्य्यतेऽध्यायस्तावन्न विरमेत्पठन्। यदि प्रमादादध्याये विरामो भवति प्रिये। पुनरध्यायमारभ्य पठेत्सर्वं मुहुर्मुहुः। अनुक्रमात् पठेदेव शिरःकम्पादिकं त्यजेत्। न मानसं पठेत् स्तोत्रं वाचिकन्तु प्रशस्यते॥ कण्ठतः पाठाभावे तु पुस्तकोपर्य्यपि वाचयेत्॥ तल्लेखनेऽपि विशेषः। न स्वयं लिखितं स्तोत्रं नाब्राह्मणलिपिं पठेत् इति। यत्तु। आधारे स्थापयित्वा तु पुस्तकं वाचयेत्ततः। हस्तसंस्थापनादेव भवेदर्द्धफलं ध्रुवमिति। तस्य व्यवस्थापि तत्रैव। पुस्तकेऽवाचनं हस्ते सहस्रादधिकं यदि। ततो न्यूनस्य तु भवेद्वाचनं पुस्तकं विना। सहस्राभ्यूनमन्त्रस्य पाठसत्वे तु पुस्तकं

मध्यमेन नैकेनेतरयोरिह' इति, न च तादृक् पुरुषः शापोद्धारोत्कीलने कर्त्तुं शक्नुयात्, अतः समग्रप्रयोगे तयोरादावेकवारमेवावश्यकत्वं न तु पुनः पुनः पठने इति बहवः, सर्वत्रैव नावश्यकत्वमिति नीलकण्ठः।

For Private and Personal Use Only

विनैव वाचनम्। तदभावे (१) आधारे पुस्तकस्थापनेनैव वाचनम्। सहस्राधिकस्य तु पाठसत्वेप्याधारस्थापि पुस्तकोपर्य्येव वाचनमिति वचनार्थः। प्रकृतस्तोत्रस्य सहस्राद्न्यूनत्वात्ततः कृताञ्जलिपुटः स्तुवीतचरितैरिमैरिति वैकृतिकरहस्ये विधानाच्च पाठाभावे पुस्तकस्याधारस्थापनेनैव वाचनं; कण्ठपाठीकृत्य पुस्तकं विनैव तु कृताञ्जलितया पठनमुत्तममिति द्रष्टव्यम्। अत्र सहस्रशब्देन द्वात्रिंशत्स्वरात्मिकस्यैकैकानुष्टुप्त्वकल्पनेन तादृशानुष्टुप् छन्दः सहस्रं ज्ञेयमितिस्पष्टं शक्तिसङ्गमतन्त्रराजे, द्वात्रिंशतास्वरैर्युक्त एको ग्रन्थो निगद्यते। स एव गदितः श्लोकस्तारानेत्रसमुद्भव! इत्यादिना, तेन गद्यात्मकमालामन्त्रेष्वप्यस्य नियमस्य प्रसरो ज्ञेयः। स्तोत्र पूर्वोत्तरभागपाठाभावे नैष्फल्यादिवचनानि शक्तिसङ्गम एव द्रष्टव्यानि॥ ऋषिच्छन्दोदेवतादि पठेत् स्तोत्रे समाहितः। यत्र स्तोत्रे न दृश्येत प्रणवन्यासमाचरेत्। डामरे। सप्तशत्याश्चरित्रे तु प्रथमे पद्मभूर्मुनिः। छन्दो गायत्रमुदितं महाकाली तु देवता॥ वाग्बीजं पावकस्तत्वं धर्म्मार्थे विनियोजनम्। मध्यमस्य चरित्रस्य मुनिर्विष्णुरुदाहृतः॥ उष्णिक्छन्दो महालक्ष्मीर्देवता बीजमद्रिजा। वायुस्तत्त्वं धनप्राप्त्यै विनियोग उदाहृतः। उत्तमस्य चरित्रस्य ऋषिः शङ्कर ईरितः॥ त्रिष्टुप्छन्दो देवतास्य महापूर्वासरस्वती। कामोबीजं रविस्तत्वं कामार्थे

(१) तदभावे कण्ठस्थपाठाऽभावे।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विनियोजनम्॥ क्लीं चण्डिकायै व्यस्तेन समस्तेन षड़ङ्गकौ। वाक् अद्रिजा काम इति नवार्णप्रथमवीजत्रयध्याना-
दिकं नवार्णवत्। अस्य पुरश्चरणस्वरूपं मरीचिकल्पे। कृष्णाष्टमीं समारभ्य यावत्कृष्णचतुर्दशी। वृद्धैकोत्तर- १९
याजाप्यं पूर्वसंपुटितन्तु तत्। एवं देवि मया प्रोक्तः पौरश्चरणिकः क्रमः। तदन्ते हवनं कुर्य्यात् प्रतिश्लोकेन
पायसम्। रात्रिसूक्तं प्रति ऋचं तथा देव्याश्च सूक्तकं, हुत्वांऽते प्रजपेत् स्तोत्रमादौ पूजादिकं मुने, इति 'पूर्वाभ्यां'
पूर्वोक्ताभ्यां रात्रिसूक्त देवीसूक्ताभ्यां संपुटितं, प्रतिश्लोकेनेति मन्त्रविभागोपलक्षणम्। कात्यायन्यादितन्त्रोक्तसप्त-
शतीविभागग्रन्थस्य हवनादिविधिं प्रतिवाक्यशेषत्वेन तेनैव वैधपदस्यार्थनिर्णयावश्यम्भावात्। यत्र दुःखेनेत्यादेः( )
स्थलान्तरस्थस्याप्यग्निहोत्रादिविधिशेषतास्वीकारेण स्वर्गपदार्थनिर्णयस्य वैदिकसम्मतत्वात्। होमसंख्या तु
स्तोत्रस्य त्रिरावृत्तिरूपेति वृद्धाः। रात्रिसूक्तदेवीसूक्ते ऋग्वेदशाकल्यसंहितायां प्रसिद्धे। तथेत्यनेन जपोक्तक्रमः
संपुटाकारो निर्दिश्यते, तच्छब्दस्य पूर्वपरामर्शित्वात्। तस्य श्लोकपूरणमात्रार्थत्वे तु द्वाभ्यामपि सूक्ताभ्यां
त्रिरावृत्त सप्तशती होमोत्तरमेव पाठक्रमानुसारेण होमः। विश्वेश्वरीं जगद्धात्रीमिति स्तवो रात्रिसूक्तम्।
नमो देव्यै महादेव्या इति स्तवो देवी सूक्तमिति कश्चित्, तन्न प्रतिश्लोकेन प्रति ऋचमिति प्रतिनियतनिर्देश-

(१) यत्र दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम् अभिलाषोपनीतं च तत्सुखं स्वः पदास्पदम्।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विरोधात्, ऋक् सूक्तादिशब्दानां वैदिकमन्त्रेष्वेव रूढ्या प्रसिद्धेः, मत्स्यसूक्तमित्यादिक्काचित्कतान्त्रिकव्यवहारस्य केवलयौगिकत्वेनोपपत्तेः, तेन ऋक्पदस्य श्लोके लक्षणैत्युक्तिरपि साहसमात्रं समुद्रमनोध्यानादिविधौ बृहद्रथंतरपदयोः प्रतिनियतनिर्देशबलादेव लक्षणाव्यवस्थाया इव प्रकृते क्लृप्ताया एव शक्तेर्व्यवस्थादार्ढ्यस्य कैमुतिकन्यायेनैव सिद्धेः। यदित्वेवमालोच्यते। विश्वेश्वर्य्यादिकं सूक्तं दृष्टं तद् ब्राह्मणा पुरा। स्तुतये योगनिद्राया मम देव्याः पुरन्दर! महिषान्तकरीसूक्तं सर्वसिद्धिप्रदं तथा। देव्याययादिकं दिव्यं दृष्टं देवैः महर्षिभिः। देवि प्रपन्नार्त्तिहरे! प्रसीदेत्यादिकं तथा। नारायणीस्तुतिर्नाम सूक्तं परमशोभनम्। अमुष्याः स्तुतये दृष्टं ब्रह्माद्यैः सकलैः सुरैः॥ नमो देव्यादिकं सूक्तं सर्वकामफलप्रदमिति विशकलितवेषेण(१) पाञ्चरात्रलक्ष्मीतन्त्रे व्यवहारदर्शनादेतेषां स्तोत्राणामपौरुषेयत्वसिद्धान्ताच्च सूक्तत्वव्यवहारो युज्यत एवेति; तदा कात्यायनीतन्त्रमते विश्वेश्वरीमिति श्लोकात् पूर्वं ब्रह्मोवाचेत्यस्य पाठाभावात्तदुत्तरमेव तत्पाठाच्च त्वं स्वाहेत्यारभ्यैव स्तोत्रारम्भः तस्य च योगनिद्रात्मकरात्रिदेवत्यत्वात् मरीचितन्त्रे रात्रिसूक्तपदेन निर्देश इति समाधेयम्। परन्त्वेतत् तन्त्रमनुसरता विश्वेश्वरीमिति श्लोकोऽङ्गहोमदशायां न होतव्यः, स्तोत्रान्तिमश्लोकस्य (२) द्वेधाविभागोऽपि

(१) स्पष्टतया। (२) प्रबोधञ्च जगत्स्वामी नीयतामच्युतो लघु बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ इत्यस्य।

For Private and Personal Use Only

न कार्य्यः, देवीसूक्तेऽपि त्रेधाविभागोऽङ्गहोमे न विधेयः, प्रधानविशेषस्याङ्गविधावनन्वयेन प्रति ऋचमिति पदे लक्षणाकल्पने(१)मानाभावादित्यवधेयम्। एवं सिद्धमन्त्रस्य क्रोड़तन्त्रे। प्रत्येकावर्त्तनं देवि ! हयमेधेन सम्मितम्। २०
त्रिरावृत्त्यालभेत्कामान् पञ्चावृत्त्यारिपून् जयेत्। काम्ये तु प्रयोगे विशेषः। कात्यायनीतन्त्रे। एकावृत्त्यादिपाठानां प्रत्यहं पठतां नृणाम्। संकल्पपूर्वं संपूज्य न्यस्याङ्गेषु मनून् सकृत्। पश्चाद्बलिप्रदानेन फलं प्राप्नोति मानवः। बलिश्च ब्राह्मणादिभेदेन व्यवस्थयोक्तः कालिकापुराणे द्रष्टव्यः, तत्राशक्तानामपि तत्रैव। कूष्माण्डमिक्षुदण्डञ्च मद्यमासवमेव च। एते बलिसमा प्रोक्तास्तृप्तौ छागसमाः सदा। छागसमाः पञ्चविंशतिवर्षावस्थायितृप्ति-जनकाः, अजाविकानां रुधिरैः पञ्चविंशतिवार्षिकीम्। तृप्तिमाप्नोति परमां शार्दूलरुधिरैस्तथेति तत्रैवोक्तेः। वस्तुतस्तुनहिंस्यादिति निषेधस्य संकोचमन्तरेणैव छागसमानतृप्तिसम्भवे छागबलिर्ब्राह्मणैर्न कार्य्य एव। एवं मद्यासवे अपि न देये, वरं प्राणाः प्रगच्छन्तु ब्राह्मणो नार्पयेत् सुरामिति, ब्राह्मणो मदिरां दत्वा ब्राह्मण्यादेव हीयत इति च बृहत्सङ्गमतन्त्रवचनात्। अतएव तत्प्रतिनिधिरपि कालिकापुराणे स्मर्य्यते। अवश्यं विहितं यत्र मद्यं तत्र द्विजः पुनः नारिकेलजलं कांस्ये ताम्रे वा विसृजेन्मध्विति। कात्यायनीतन्त्रे

(१) ऋक् पदस्य मन्त्रे लक्षणाकल्पने

एव, उपसर्गोपशान्त्यर्थं त्रिरावृत्तं पठेन्नरः। ग्रहदोषोपशान्त्यर्थं पञ्चावृत्तं वरानने। महाभये समुत्पन्ने सप्तावृत्तमुदीरयेत् इत्यादिना फलभेदेन संख्याभेदाननेकानुक्त्वोपसंहृतम् अथवा बहुनोक्तेन किमनेन वरानने। चण्ड्याः शतावृत्तिपाठात् सर्वाः सिध्यन्ति सिद्धय इति। इतोऽप्यधिकाः सहस्रचण्ड्यादयोऽन्यत्र द्रष्टव्याः। हरगौरीतन्त्रे। श्रीकामः पुत्रकामो वा सृष्टिमार्गक्रमेण तु। जपेच्छक्रादिमारभ्य शुम्भदैत्य-बधावधि। आदिमारभ्यप्रजपेत्पश्चाच्छेषं समापयेत्। शान्त्यादिकामः सर्वत्रस्थितिमार्गक्रमेण तु। सावर्णिः सूर्य्यतनयः सावर्णिर्भविता मनुः। संकटे चान्त्यमारभ्य पश्चादादिसमापयेत्। इत्यादिकस्य कामनाभेदेन पाठवैचित्र्यस्य, कतिपयश्लोकमात्रपाठेन तत्तत्प्रयोगवैचित्र्यस्य च विस्तरो डामरादितन्त्रस्थो ग्रन्थान्तरेभ्य एवा-वगन्तव्यः। केरलास्तु एकैकस्मिन् दिवसे एकैकमेव चरित्रं पठेदिति दिनत्रयेणैकावृत्तिरित्येकः पक्षः। चन्द्रा१ऽक्षि२भू१वेद४करे२न्दु१दस्र२सङ्ख्याकानध्यायात् क्रमेण दिनभेदेन पठेदिति सप्तभिर्दिनैरेकावृत्तिरित्यन्यः पक्ष इत्याहुः। अत्र द्वितीयमेव पक्षं 'पाठोयंविप्रकार' इति समाचर्या संग्रहन्तो बहवस्तदनुयायिनोऽनुतिष्ठन्ति च। कटपयवर्गभवैरिह पिण्डान्त्यैरक्षरैरङ्काः नेञे शून्यं ज्ञेयं तथा स्वरे केवले कथित इति प्रसिद्धपरिभाषया पकार यकार ककारा एकस्मिन्, ठप्ररेफा द्वयोः, विशब्दश्चतुर्षु सङ्केतित इति। तत्र मूलतन्त्राणित एव जानन्तु सन्त्यपि तानि तन्त्रवचनानि एकदिनेनैकावृत्त्यशक्तपराणि। अस्ति हि तादृशोऽप्यस्य प्रयोगः कात्यायनीतन्त्रे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(१) एकमुपचारं सर्वत्राऽनुष्ठायतेनैव क्रमेण द्वितीयाद्युपचारा अनुष्ठेया इत्ययं पदार्थानुसमयः।

मन्त्रविभजनान्ते, होमे स्वाहान्तिमा एते पूजायान्तु नमोऽन्तिमाः तर्पणे तर्पयाम्यन्ता जुहनीया बुधैर्मता इति वचनात् सप्तशतब्राह्मणभोजने प्रतिव्यक्त्यैकैकमन्त्रेण काण्डानुसमयेन(१)षोड़शोपचाराणां पदार्थानुसमयेन (२) च पञ्चोपचाराणां वा कर्त्तुमशक्यतया स्वेच्छयाध्यायभेदेनवानेकदिनसाध्यैकप्रयोगप्रसक्तौ उक्तवचनैर्विभजन-नियमो विधीयत इति। अत्र स्वयं पठितुमसमर्थस्य प्रभोर्ब्राह्मणद्वारापि प्रयोग इष्टः। तत्पक्षे दक्षिणानियमः तन्त्रेषु, पञ्चस्वर्णाः शतावृत्तेः पञ्चावृत्तेस्तु तत्त्रयम्। पञ्चावृत्तेः स्वर्णमेकं त्रिरावृत्तेस्तदर्द्धकम्। एकावृत्तौ पादमेकं देयाद्वा शक्तितो बुध इति सर्वं शिवम्। इति श्रीमद्भारत्युपाह्वयगम्भीररायदीक्षितसूरि-सूनुना भास्कररायदीक्षितमहाग्निचिता रचितायां सप्तशतीटीकागुप्तवतीसमाख्यायामुपोद्घातप्रकरणं संपूर्णम्।

(२) एकत्रैव सर्वोपचारान् समाप्य तत् क्रमेणान्यत्र सर्वोपचाराणामनुष्ठानं काण्डाऽनुसमयः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ पुरश्चरणप्रयोगः। दुर्गाप्रदीपे। जपेद् बिल्वं समाश्रित्य मासमेकन्तु यो नरः। हुत्वा विल्वदलैर्मासं मधुरत्रययोगतः॥ हुत्वा दशांशतो वापि कमलैः चीरसंयुतैः। धनदेन समां लक्ष्मीं प्राप्नुयादुत्तमां भुवम्॥ इति। अथ प्रयोगान्तराणि कात्यायनीतन्त्रोक्तानि, प्रतिश्लोकमाद्यन्तयोः मन्त्रं जपेन्मन्त्रसिद्धिः। स प्रणवमनुलोमव्याहृतित्रयमादौ अन्ते तु विलोमं तदित्येवं प्रतिश्लोकं कृत्वा शतावृत्तिपाठे अतिशीघ्रं सिद्धिः। प्रतिश्लोकमादौ जातवेदस इति ऋचं पठेत् सर्वकामसिद्धिः। अपमृत्युवारणायादावन्ते शतं त्र्यम्बकमन्त्रं जपेत्, प्रतिश्लोकं तन्मन्त्रजप इति वा। प्रतिश्लोकं शरणागतेति श्लोकं पठेत् सर्वकार्य्यसिद्धिः। प्रतिश्लोकं करोतु सानः शुभेत्यर्द्धं पठेत् सर्वकामावाप्तिः। स्वाभीष्टवरप्राप्त्यै एवं देव्या वरमिति श्लोकं प्रतिश्लोकं पठेत्। सर्वापन्निवारणाय प्रतिश्लोकं दुर्गे स्मृतेति पठेत्, अस्य केवलस्यापि श्लोकस्य कार्य्यानुसारेण लक्षमयुतं सहस्रं शतं वा जपः। सर्वाबाधेत्यस्य लक्षजपे श्लोकोक्तं फलम्। इत्थं यदा यदेति श्लोकस्य जपे महामारीशान्तिः। ततो वव्रे नृपो राज्यमिति मन्त्रस्य लक्षजपे पुनः स्वराज्यलाभः। हिनस्ति दैत्यतेजांसीत्यनेन सदीपवलिदाने घण्टावादने च बालग्रहशान्तिः। आद्यावृत्तिमनुलोमेन त्रयोदशाध्यायं पठित्वा ततो विपरीतक्रमेण द्वितीयां कृत्वा पुनरनुलोमेन तृतीयेत्येवमावृतित्रये उक्तेषु प्रकारेषु शीघ्रं कार्य्यसिद्धिः। सर्वापत्तिनिवारणाय दुर्गे स्मृतेत्यर्द्धं, ततो यदन्ति यच्च दूरके इत्यृचं, तदन्ते दारिद्र्य-

For Private and Personal Use Only

दुःखेत्यर्द्धमेवं कार्य्यानुसारेण लक्षमयुतं सहस्रं शतं वा जपः। कांसोऽस्मीत्यृचं प्रतिश्लोकं पठेल्लक्ष्मीप्राप्तिः। मारणार्थमेवमुक्त्वा समुत्पत्त्येति श्लोकं पठेन्मारणोक्तावृत्तिभिः फलसिद्धिः। ज्ञानिनामपि चेतांसीति श्लोकस्य २२
जपमात्रेण सद्यो मोहनमित्यनुभवसिद्धम्। प्रतिश्लोकं तच्छ्लोकपाठे त्ववश्यम्। रोगानशेषानिति श्लोकस्य प्रतिश्लोकं पाठे सकलरोगनाशः, तन्मन्त्रजपेऽपि सः। इत्युक्त्वा सा भगवतीगम्भीरेति श्लोकस्य प्रतिश्लोकं पाठे पृथक् जपे वा विद्याप्राप्तिर्वाग्विकारनाशश्च। भगवत्याकृतं सर्वमित्यादि द्वादशोत्तरशताक्षरो मन्त्रः सर्वकामदः सर्वापन्निवारणश्च। देवि प्रपन्नार्त्तिहरे प्रसीदेति श्लोकस्य यथाकार्य्यं लक्षायुतसहस्रशतान्यतमजपे प्रतिश्लोकं तन्मन्त्रपाठे वा सर्वापन्निवृत्तिः सर्वकामसिद्धिश्च। एषु प्रयोगेषु प्रतिश्लोकं दीपाग्रे केवलमेव वा नमस्कारकरणेऽतिशीघ्रं सिद्धिः। प्रतिश्लोकं कामबीजसंपुटितस्यैकचत्वारिंशद्दिनं त्रिरावृत्तौ सर्वकामसिद्धिः। एकविंशतिदिनपर्य्यन्तमुक्तरीत्या प्रत्यहं त्रयोदशावृत्तौ वशीकरणम्। मायाबीजपुटितस्य फट्पल्लवसहितस्य सप्तदिनपर्य्यन्तं त्रयोदशावृत्तौ उच्चाटनसिद्धिः। तादृशस्यैव दिनचतुष्टयमेकादशावृत्तौ सर्वोपद्रवनाशः। एकोनपञ्चाशद्दिनपर्य्यन्तं प्रतिश्लोकं लक्ष्मीबीजसंपुटितस्य पञ्चदशावृत्तौ लक्ष्मीप्राप्तिः। प्रतिश्लोकमैं बीजसंपुटितस्य शतावृत्त्या विद्याप्राप्तिरिति प्रत्येकमन्त्रस्य प्रयोगाः। इति सप्तशतीप्रयोगविधिः॥

For Private and Personal Use Only

ॐ श्रीगणेशाय नमः । ॐ श्रीदुर्गादेव्यै नमः । ॐ सत्सम्प्रदायप्रथनातिथ्ये शिष्यैश्चतुर्भिः सहयोऽवतीर्णः उक्तो बृहत्सङ्गमतन्त्रराजे श्रीशङ्कराचार्य्यगुरुं तमीड़े १ ब्रह्मामार्कण्डेयं प्रति वक्ति, मार्कण्डेयस्तु क्रौष्टुकिं भागुरिं प्रति वक्तीति पञ्चिरूपैर्द्रोणमुनिपुत्रैर्जैमिनिमुनिं प्रत्युच्यत इति संवादस्थितिः । तत्र कवचांशे ब्रह्माणं प्रति मार्कण्डेयस्य प्रश्नमाह । यद्गुह्यमिति । सर्वस्मिन् सर्वावयवावच्छेदेन रक्षाकरं कवचमित्यर्थः लोके वर्म्मणः सर्वतनुत्रत्वदर्शनात् ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ (अथ कवचादित्रयेषु प्रदीपाख्याऽपरा व्याख्या)

मार्कण्डेय उवाच । यद्गुह्यं परमं लोके सर्वरक्षाकरं नृणाम् । यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह ! ॥ १ ॥

प्र० । ॐ नमो भगवत्यै । अङ्गहीनो यथा देही सर्वकर्म्मसु न क्षमः । अङ्गषट्कविहीना तु तथा सप्तशती-स्तुतिः ॥ तस्मादेतत्पठित्वैव जपेत् सप्तशतीं पराम् । अन्यथा शापमाप्नोति हानिं चैव पदे पदे ॥ रावणाद्याः स्तोत्रमेतदङ्गहीनं निषेविरे । हता रामेण ते यस्मान्नाङ्गहीनं पठेत्ततः ॥ इति कात्यायनीतन्त्रे कवचादित्रय-रहस्यत्रयरूपाङ्गषट्कयुतस्यैव सप्तशतीस्तोत्रस्य पठनीयत्वं श्रूयते तत्प्रामाण्याच्च कवचादित्रयं रहस्यत्रयं च तन्त्रान्तरस्थमेवाङ्गं भवति । तत्र कवचांशे ब्रह्माणं प्रति प्रश्नं करोति मार्कण्डेयः । यद्गुह्यमिति ।

'लोके' 'यत्परम'मुत्कृष्टं 'गुह्यं'रहस्यमस्ति 'तन्मे ब्रूहि' तत् किं ब्रह्मरूपं नेत्याह 'सर्वरक्षाकरं' येन सर्वेषामपि रक्षाभवति। 'नृणां' पामरप्रभृतीनामपि तादृशमित्यर्थः ब्रह्म तूत्तमाधिकारिणामेव रक्षकं न सर्वेषामित्यर्थः,
ब्र०क० ननु सन्त्यन्यानि कवचानि लोके इति चेत्सत्यं सन्ति तथापि यद्भवत. 'कस्यचित्' कस्यापि 'नाख्यातं' निधिबुद्ध्या-
१ स्थापितमस्ति तदित्यर्थः तेन च निःसंशयमेव रक्षणं झटिति स्यादिति भावः अन्यथा निधिबुध्या तस्य रक्षणं

ब्रह्मोवाच। अस्तिगुह्यतमं विप्र ! सर्वभूतोपकारकम् । देव्यास्तु कवचं पुण्यं तच्छृणुष्वमहामुने ! ॥ २ ॥

निरर्थकं स्यादिति। ननु किमित्युत्कृष्टं वस्तु मया देयमिति चेत् तत्राह। हे पितामह ! स्वसन्तति रक्षणार्थं पितामहेनावश्यं देयमित्यर्थः ॥१॥ उत्तरमाह। ब्रह्मोवाच। अस्ति गुह्यतमं विप्रेति। हे विप्र! त्वया यत्पृष्टं तादृशं 'देव्यास्तु' देव्या एव 'कवचं पुण्य'मेकं निधिबुध्यास्थापितमस्ति 'तन्महामुने ! शृणुष्व' सर्वभूतोपकारार्थं प्रवृत्तत्वान्महामुने इति सम्बोधनम् ॥ २ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्र० । परन्तु सा देवी नवमूर्त्यात्मिकाध्येयेत्यभिप्रायेण तासां मूर्त्तीनां नामान्याह । प्रथमं शैलपुत्रीति । नामज्ञाने जाते तद्वाच्याकारस्य प्रसिद्धत्वादेव ज्ञानं भविष्यतीति भावः सर्वोत्तरैश्वर्य्यवत्यपि भगवती शैलेन भक्तेनातितपश्चर्य्यया प्रार्थिता सती कारुण्यवशादतिनीचमपि पुत्री त्वं स्वीकृतवतीत्यहो ! भक्तवात्सल्यं कियद्वर्णनीयं भगवत्या इति कूर्म्मपुराणे प्रसिद्धम् । ब्रह्मचारिणीति, ब्रह्म सच्चिदानन्दरूपं तच्चारयितुं प्रापयितुं शीलमस्याः सा ब्रह्मचारिणी ब्रह्मरूपप्रदेत्यर्थः । चन्द्रघण्टेति चन्द्रो हस्तगतायां घण्टायां यस्याश्चन्द्रवन्निर्मला

प्रथमं शैलपुत्रीति द्वितीयं ब्रह्मचारिणी । तृतीयं चन्द्रघण्टेति कूष्माण्डेति चतुर्थकम् ॥ ३ ॥

वा घण्टा यस्या इत्यर्थः यद्वा आह्लादकारिणी देवी चन्द्रघण्टेति कीर्त्तितेति रहस्यागमोक्तेश्चन्द्रं घण्टयति प्रतिवादितया भाषते स्वस्याह्लादकारित्वाभिमानेनेति चन्द्रघण्टा चन्द्रापेक्षयाप्यतिशयेन लावण्यवतीत्यर्थः पटपुटेति दण्डकपठितस्य चुरादेर्घटिधातोर्भाषार्थस्य पचाद्यचिरूपं; चन्द्रस्य घण्टा चन्द्रघण्टा वा । कूष्माण्डेति कुत्सित ऊष्मासन्तापस्तापत्रयरूपो यस्मिन् संसारे स संसारो अण्डे मांसपेश्यामुदररूपायां यस्याः त्रिविध-तापयुक्तसंसारभक्षणकर्त्रीत्यर्थः । अण्डः पेशी च मुष्कं चेति मेदिनी । ३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्र० । स्कन्दमातेति । सनत्कुमारस्य भगवतीवीर्य्यादुद्भूतस्य स्कन्द इति संज्ञा 'भगवान् सनत्कुमारस्तं स्कन्द इत्याचक्षत' इति छान्दोग्यश्रुतेः तथा च ज्ञानिभिरपि यदुदरे जन्माभिलषणीयमित्यतिशुद्धेत्यर्थः । कात्यायनीति

ब्र०का० देवकार्य्यार्थं कात्यायनाश्रमे आविर्भूता तेन कन्यात्वेन स्वीकृतेति कात्यायनीति नाम भगवत्याः, अस्या निरन्तरं कुमारीत्वेन पत्यनधीनतया स्वतन्त्रत्वम् । कालरात्रीति सर्वमारकस्य कालस्यापि रात्रिर्नाशिकेत्यर्थः

२ प्रलये कालस्यापि नाशात् । कृदिकारादक्तिन इति ङीप् । महागौरीति इयं च महामानिनी, नर्मोक्त्या

पञ्चमं स्कन्दमातेति षष्ठं कात्यायनीति च । सप्तमं कालरात्रीति महागौरीति चाष्टमम् ॥ ४ ॥ नवमं सिद्धिदा प्रोक्ता नवदुर्गाः प्रकीर्त्तिताः । उक्तान्येतानि नामानि ब्रह्मणैव महात्मना ॥ ५ ॥

शिवेन कालीत्युक्ते तपसा गौरवर्णस्य सम्पादितत्वात् कालीपुराणे स्पष्टमेतत् ॥४॥ सिद्धिदेति । मोक्षदेत्यर्थः इतीति शेषः सिद्धिदेति नवममित्यन्वयः । नवदुर्गा इति, योगिनः कायव्यूहवदेकस्या एव दुर्गाया एते नवभेदा ये शास्त्रे ध्येयत्वेन प्रोक्तास्ते मया कीर्त्तिता इत्यर्थः अतएव देव्यास्तु कवचमित्येकवचनं सङ्गच्छते नाम्नां स्वकल्पितत्वशङ्काव्युदासार्थमाह उक्तान्येतानीति 'महात्मना' सर्वज्ञेन 'ब्रह्मणैव' वेदेनैवैतान्युक्तानीत्यर्थः ॥५॥

For Private and Personal Use Only

अग्निनेति। यो नवनामानि पठेदिति शेषः पठन्तमेकमपि बहवोऽन्ये ये शरणं गताः तेषां तस्य चानिष्ट-निवृत्तिरिति श्लोकद्वयार्थः॥ ६॥ ७॥

अग्निना दह्यमानस्तु शत्रुमध्ये गतो रणे। विषमे दुर्गमे चैव भयार्त्ताः शरणं गताः॥ ६॥ न तेषां जायते किञ्चिदशुभं रणसङ्कटे। नापदं तस्य पश्यामि शोकदुःखभयं न हि॥ ७॥

प्र०। इत्थं कवचपाठे ध्येयं देवतास्वरूपं प्रदर्श्य तत्फले अविश्वासो नैव कर्त्तव्य इति कैमुतिकन्यायेनाह। अग्निनेति। योऽग्निना दह्यमानो रणे शत्रुमध्ये च गतः सन् शरणं गत इति शेषः। अथ ये विषमे दुर्गमे चातिसङ्कटे भयार्त्ता भयपीड़िताः सन्तः शरणं गताः॥ ६॥ तेषां तस्य च भक्तिरहितेन स्मरण-मात्रेणापि तज्जन्यं भयादिकं न भवतीत्याह। न तेषामिति॥ ७॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आर्त्तभक्तिफलमुक्त्वा जिज्ञासुभक्तेः फलमाह । यैस्त्विति । सिद्धिर्ज्ञानम् आर्त्तानिष्टनिरासानुगुण एव सप्तमातॄणां सार्वदिक उद्योग इत्याह । प्रेतसंस्थेत्यादिना ॥८॥९॥१०॥११॥ (१) तेषां सिद्धिरिति पाठान्तरम् ।

यैस्तु भक्त्या स्मृता नूनं तेषामृद्धिः (१) प्रजायते । प्रेतसंस्थातुचामुण्डा वाराही महिषासना ॥ ८ ॥ ऐन्द्रीगजसमारूढ़ा वैष्णवी गरुड़ासना । माहेश्वरी वृषारूढ़ा कौमारी शिखिवाहना ॥ ९ ॥ ब्राह्मीहंससमारूढ़ा सर्वाभरणभूषिता । नानाभरणशोभाढ्या नानारत्नोपशोभिताः ॥ १० ॥ दृश्यन्ते रथमारूढ़ा देव्यः क्रोधसमाकुलाः । शङ्खं चक्रं गदां शक्तिं हलञ्च मुसलायुधम् ॥ ११ ॥

प्र० । यैस्तु भक्त्या स्मृता भवति तेषां पूर्वोक्तं फलम्, ऋद्धिः धर्मार्थकाममोक्षाणां च भवतीत्यत्र किमु वक्तव्यमित्याह यैस्त्विति । इदानीं देव्या अतिवात्सल्यं दर्शयति भक्त्युत्पादनार्थं प्रेतसंस्थेति तत्र सप्तमातॄणां वर्णनं श्लोकद्वयेन ॥८॥९॥ नानेति । वक्ष्यमाणा देव्यः दृश्यन्त इति, सप्तमातृभिन्नायाश्च देव्यस्ता अपि भक्तरक्षणार्थं क्रोधसमाकुला रथमारूढ़ा जात्यैकवचनं रथानारूढ़ा दृश्यन्ते अर्थात् देवादिभिरिति ॥१०॥११॥

For Private and Personal Use Only

॥ १२ ॥ १३ ॥ इत आरभ्यभक्तः प्रार्थयते महाबल इत्यादिना ॥ १४ ॥

खेटकं तोमरञ्चैव परशुं पाशमेव च। कुन्तायुधं त्रिशूलञ्च शार्ङ्गायुधमनुत्तमम्॥१२॥
दैत्यानां देहनाशाय भक्तानामभयाय च। धारयन्त्यायुधानीत्थं देवानाञ्च
हिताय वै ॥ १३ ॥ महाबले महोत्साहे महाभयविनाशिनि। त्राहि मां
देवि दुःप्रेक्ष्ये शत्रूणां भयवर्द्धिनी ॥ १४ ॥

प्र०। तासामायुधान्याह। शङ्खमिति ॥१२॥ दैत्यानिति। ताः सप्तमातरश्च शङ्खं चक्रमित्यादिश्लोकोक्तानीत्थमायुधानि धारयन्ति, किमर्थं दैत्यानां देहनाशार्थं, भक्ताभयार्थं देवहितार्थं चेत्यर्थः। अयं भावः अप्रार्थिता अपि एतामहत्यो देवताः जगद्रक्षणे वत्सलतयैव प्रवृत्ता मातृवत्, ताः कुतो न मन्दभाग्येन स्वरक्षणार्थं प्रार्थ्यन्त इति ॥ १३ ॥ कवचपाठस्यादाविमं प्रार्थना मन्त्रं पठित्वा पश्चात्कवचं पठनीय इत्यभिप्रायेणाह। महाबलेति। महद्बलं मायाशक्तिरूपं यस्याः, महानुत्साहो जगद्रक्षणे यस्याः, महाभयं मृत्युरूपं तस्य ज्ञानदानेन नाशिनी, दुःप्रेक्ष्ये दुर्दर्शनीये, न संदृशे तिष्ठति रूपमस्येति श्रुतेः 'शत्रूणां' कामक्रोधादिकानाम्॥१४॥

प्राच्यां रक्षतु मामैन्द्रीत्यादौ यत्र प्रथमान्तं देवीनाम लोटः प्रथमपुरुषश्च, दक्षिणे रक्षवाराहि! इत्यादौ यत्र सम्बुध्यन्तं नाम मध्यमपुरुषश्च, तत्र निर्विवाद एवाऽन्वयक्रमः तत्तदुत्तरचरणे यथायोग्यं तत्तत् क्रियापदयो-
 रेवानुवृत्तिश्च, यत्र तूर्ध्वं ब्रह्माणि! मे रक्षेदित्यत्र सम्बुद्धिः प्रथमपुरुषश्च तत्र भवती इत्यस्याध्याहारः, तुल्य-
 न्यायेन प्रथमान्तमध्यमपुरुषयोः सत्वेऽध्याहृतस्य त्वमित्यस्य विशेषणत्वेन प्रथमान्तपदं योजनीयम्॥१५॥१६॥१७॥

प्राच्यां रक्षतु मामैन्द्री आग्नेय्यामग्निदेवता। दक्षिणे रक्ष वाराहि नैर्ऋत्यां खड्गधारिणी ॥ १५ ॥

प्र०। प्राच्यामिति। प्राच्यां दिशि स्थिता ऐन्द्रीन्द्रशक्तिर्मां रक्षत्वित्यर्थः प्राच्यां स्थितं मामिति वा एवमुत्तरत्रापि शक्तिशक्तिमतोरभेदादग्निरूपादेवताग्निशक्तिरित्यर्थः। अत्र रक्षत्वित्यनुवृत्तिः। 'वाराही' वराना हन्ति सवराहो यमः आर्षः प्रयोगः तस्य शक्तिर्वाराही अणंतान् ङीप्। यमशक्तिरित्यर्थः दशदिक्पालप्रकरणात्, सप्तमात्रन्तर्गता वा वाराही। हे वाराहि! दक्षिणे देशे स्थिता त्वं मां रक्षेत्यर्थः स्थितं मामिति वा। खड्ग-धारिणी, निर्ऋति शक्तिरित्यर्थः रक्षत्वित्यस्य मध्ये विच्छेदादध्याहारः ॥ १५ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्र० । 'मृगवाहिनी' वायुदेवताया मृगवाहनत्वाद्वायुशक्तिरित्यर्थः रक्षेदित्यनुवृत्तिः 'कौमारी' कुत्सितो मारो मदो यस्य सकुमारः कुवेरः तस्येयं शक्तिः कौमारी दिक्पालप्रकरणात्, कौवेर्या रक्षणस्थानमग्रे वक्ष्यमाणमस्ति तथाप्येकस्या एव स्थानद्वयरक्षकत्वे बाधकाभावः, सप्तमात्रन्तर्गता वा कौमारी, 'शूलधारिणी' ईशान-

प्रतीच्यां वारुणी रक्षेद्वायव्यां मृगवाहिनी। रक्षेदुदीच्यां कौमारी ईशान्यां शूलधारिणी ॥१६॥ ऊर्ध्वं ब्रह्माणि ! मे रक्षेदधस्ताद्वैष्णवी तथा। एवं दशदिशो रक्षेच्चामुण्डाशववाहना ॥ १७ ॥

शक्तिरित्यर्थः ॥ १६ ॥ ब्रह्माणीति। ब्रह्माणमानयति जीवयतीति कर्म्मण्यण्। हे ब्रह्माणि ! ऊर्ध्वं स्थिता भवती मे मां रक्षेदित्यर्थः मे ऊर्ध्वं भागमिति वा, एवमिति दशदिक्पालदेवतावदेव; मे इति शेषः मे मत्सम्बन्धिनीर्दशदिशश्चामुण्डारक्षेदित्यर्थः दशदिक्षुस्थिता चामुण्डा मां रक्षेदिति पर्य्यवसितोऽर्थः अन्यथा केवलदिशां रक्षणे प्रयोजनाभावः ॥ १७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्थातु तिष्ठतु ॥१८॥ शिखामिति। उद्योतिनीनामिका देवी मम शिखायां स्थिता सती मच्छिखां रक्षेदिति रीत्या प्रत्यवयवं योजनीयम्, एवमुभयविधस्य मध्ये यदेव यत्र नोच्यते तदन्यतरत्तत्राध्याहार्य्यं, यथाऽत्रैव प्रथम-
 चरणेऽवस्थापनस्य द्वितीयचरणे रक्षणस्याध्याहारः एवं सर्वत्र ॥ १९ ॥

जया मे चाग्रतः स्थातु विजया स्थातुपृष्ठतः। अजिता वामपार्श्वे तु दक्षिणे चापराजिता॥१८॥ शिखामुद्योतिनी रक्षेदुमामूर्ध्निव्यवस्थिता। मालाधरी ललाटे च भ्रुवौ रक्षेद् यशस्विनी ॥ १९ ॥

प्र०। 'जया' शक्तिः 'स्थातु' तिष्ठतु आर्षः प्रयोगः मत्संरक्षणार्थम्॥१८॥ शिखामिति उद्योतिनीनामिका देवी मम शिखायां स्थिता सती मच्छिखां रक्षेदिति प्रत्यवयवं सर्वत्रयोजनीयम्, उमा मूर्ध्नि व्यवस्थिता सती-मूर्धानं रक्षेदित्यर्थः एवं सर्वत्र यथायोग्यमध्याहार्य्यम् ॥ १९ ॥

For Private and Personal Use Only

॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ नलिकां कण्ठनालम् ॥ २४ ॥ २५ ॥

त्रिनेत्रा च भ्रुवोर्मध्ये यमघण्टा च नासिके। शङ्खिनी चक्षुषोर्मध्ये श्रोत्रयोर्द्वारवासिनी ॥२०॥ कपोलौ कालिका रक्षेत्कर्णमूले तु शङ्करी। नासिकायां सुगन्धा च उत्तरोष्ठे च चर्चिका ॥२१॥ अधरे चाऽमृतकला जिह्वायान्तु सरस्वती। दन्तान् रक्षतु कौमारी कण्ठमध्ये तु चण्डिका ॥२२॥ घण्टिकां चित्रघण्टा च महामाया च तालुके। कामाक्षी चिबुकं रक्षेद्वाचं मे सर्वमङ्गला ॥ २३ ॥ ग्रीवायां भद्रकाली च पृष्ठवंशे धनुर्धरी। नीलग्रीवा बहिःकण्ठे नलिकां नलकूवरी ॥२४॥ खड्गधारिण्युभौ स्कन्धौ बाहू मे वज्रधारिणी। हस्तयोर्दण्डिनी रक्षेदम्बिका चाङ्गुलीषु च ॥२५॥

प्र०। 'नासिके' नासिकापुटे इत्यर्थः, उत्तरत्रनासिकाशब्देन नासिकादण्ड इति॥२०॥२१॥ 'अधरे' अधरोष्ठ इत्यर्थः ॥२२॥ कण्ठस्य बहिर्भागो बहिःकण्ठः। नलिकां कण्ठनालम् ॥ २४ ॥ स्कन्धमारभ्य कूर्परपर्य्यन्तो भागो बाहुस्तदारभ्याङ्गुलिपर्य्यन्तो हस्तः ॥ २५ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ २६ ॥ २७ ॥ २८ ॥ जङ्घे इति। प्रोक्ता आगमादिषु प्रसिद्धेत्यादिर्देव्याविशेषणं महाबलायाः ॥ २९ ॥
पादाध इति । भिन्नं पदं, तलवासिनी पातालवासिनी ॥ ३० ॥

अं०क० नखांश्कूलेश्वरी रक्षेत्कुक्षौ रक्षेन्नलेश्वरी । स्तनौ रक्षेन्महादेवी मनःशोक-
६ विनाशिनी ॥२६॥ हृदयं ललिता देवी ह्युदरे शूलधारिणी । नाभिं च कामिनी
रक्षेत् गुह्यं गुह्येश्वरी तथा ॥ २७॥ भूतनाथा च मेढ्रञ्च गुदं महिषवाहिनी ।
कट्यां भगवती रक्षेज्जानुनी विन्ध्यवासिनी ॥ २८ ॥ जङ्घे महाबला प्रोक्ता
जानुमध्ये विनायकी । गुल्फयोर्नारसिंही च पादपृष्ठेऽमितौजसी ॥ २९ ॥
पादङ्गुलीः श्रीधरी च पादाधस्तलवासिनी । नखान् दंष्ट्राः कराली च
केशांश्चैवोर्ध्वकेशिनी ॥ ३० ॥

प्र० । कुक्षाविति सप्तम्यन्तपाठः प्राचीनसम्मतः ॥ २६ ॥ २७ ॥ जानुनी विन्ध्यवासिनीति पाठः ॥ २८ ॥
प्रोक्तागमादिशास्त्रेषु या महबला सेत्यर्थः ॥२९॥ पादाध इति भिन्नं पदं, तलवासिनी पातालतलवासिनीत्यर्थः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ ३१ ॥ पद्मं हृदयादिरूपमेव कोशो निवासस्थानं यस्य श्वासस्य तस्मिन् वाते स्थिता सती वातं रक्षत्विति यावत् ॥ ३२ ॥

रोमकूपाणि कौवेरी त्वचं वागीश्वरी तथा। रक्तमज्जावसामांसान्यस्थिमेदांसि-पार्वती ॥ ३१ ॥ आन्त्राणि कालरात्रिश्च पित्तञ्च मुकुटेश्वरी। पद्मावतीपद्मकोशे कफे चूड़ामणिस्तथा ॥ ३२ ॥

प्र० यद्यपि नखांश्छूलेश्वरी रक्षेदित्यत्र नखरक्षणमुक्तं तथापि यथैकस्या अपि देवतायाः स्थानद्वयरक्षकत्वं न विरुध्यते तथैव देवताद्वयस्यैकस्थाननिरूपितरक्षकत्वे बाधकाभाव इत्यभिप्रायेण नखान् दंष्ट्राः कराली चेत्युक्तम् ॥२०॥२१॥ आन्त्राणीति अम्धातोस्त्रेऽनुनासिकस्य क्वीति दीर्घः 'पद्मकोशे' पद्मं हृदयादिरूपमेव कोशो वासस्थानं यस्य श्वासस्य तस्मिन् वाते स्थिता सती तं रक्षत्विति यावदिति केचित्, अग्रे प्राणानां रक्षणकथनात् पद्मकोशप्रतीकाशं हृदयं चाप्यधोमुखमिति श्रुत्युक्तं हृदयमेव पद्मकोशशब्देन ग्राह्यमित्यपरे। ड़ामणिनाम्नी देवता रक्तासुरवधे प्रसिद्धा ॥ ३२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥२३॥ अहङ्कारमिति। अत्र मनःशब्दश्चित्तपरः अन्तःकरणस्य मनसा सह चतुर्विधत्वात् तेन मनःशोकविनाशिनीत्यनेन न गतार्थता, अथवा मनसः शोकं विनाशयतीति व्युत्पत्त्यास्तनौ रक्षेन्महादेवीत्यस्य तदेव

ब्र०क० विशेषणत्वेन योज्यम्। व्यानसमानोदानमिति समाहारे द्वितीयान्तम् ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥

७

ज्वालामुखी नखज्वालामभेद्यासर्वसिन्धुषु। शुक्रं ब्रह्माणि मे रक्षेच्छायां छत्रेश्वरी तथा॥२३॥ अहङ्कारं मनोबुद्धिं रक्ष मे धर्मचारिणि!। प्राणापानौ तथा व्यान समानोदानमेव च ॥ २४ ॥ यशःकीर्त्तिञ्च लक्ष्मीञ्च सदा रक्षतु चक्रिणी। गोत्रमिन्द्राणि मे रक्षेत्पशून्मे रक्ष चण्डिके !॥ २५ ॥

प्र०। 'नखज्वालां' नखनिष्ठं तेजः। अभेद्यानाम्नी देवता सर्वसन्धिषु स्थिता सती सर्वसन्धीन् रक्षेदित्यर्थः हे ब्रह्माणि! भवतीमे शुक्रं रक्षेदित्यर्थः॥ २३॥ हे धर्मचारिणि! अत्र त्वमित्यध्याहारः रक्षेति मध्यमपुरुषात् ॥ २४ ॥ हे इन्द्राणि! भवतीत्यध्याहारः ॥ २५ ॥

For Private and Personal Use Only

कवचधारणस्य फलमाह। पदमेकमित्यादिना अद्भुतकवच इति शेषः ॥३८॥३९॥४०॥४१॥४२॥४३॥

पुत्रान् रक्षेन्महालक्ष्मीर्भार्य्यां रक्षतु भैरवी। मार्गं क्षेमकरी रक्षेद्विजया सर्वतः स्थिता ॥ ३६ ॥ रक्षाहीनन्तु यत्स्थानं वर्जितं कवचेन तु। तत्सर्वं रक्ष मे देवि! जयन्ती पापनाशिनी ॥ ३७ ॥ पदमेकं न गच्छेत्तु यदीच्छेच्छुभमात्मनः। कवचेनावृतो नित्यं यत्र यत्र हि गच्छति ॥ ३८ ॥

प्र०। ३६ ॥ रक्षाहीनमिति। यत् स्थानं रक्षयाहीनं भवति कुत इति चेत् कवचेन तु वर्जितं कवचे तस्य स्थानस्योक्तो न कृतोऽतः तत्सर्वं रक्ष मे देवि! यतस्त्वं जयन्ती सर्वोत्कृष्टा पापनाशिनी भवसि ॥ ३७ ॥ अथ पितामहः फल स्तुतिं वक्तुमधिकारिणं प्रथममुपदिशति पदमेकमिति। यदि शुभमात्मनः इच्छेत् तर्हि सपुरुषः कवचेन रहितमेकं पदमपि न गच्छेत् इति, क्षणमात्रमपि देवीस्मरणं विना न क्षपणीयमिति तात्पर्य्यम्। तदुक्तं पुराणेषु। स्वपन् तिष्ठन् व्रजन् मार्गे प्रलपन् भोजने रतः कीर्त्तयेत् सततं देवीं स वै मुच्येतबन्धनादिति। इत्युपदिश्यफलं कथयति कवचेनेति ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्थावरं वत्सनाभादि, जङ्गमं सर्पादि, कृत्रिमं परस्परयोगजन्यं यथा तुल्यपरिमाणयोः मधुसर्पिषोर्योगादिजम्॥४४

ब्र०क० तत्र तत्रार्थलाभश्च विजयः सार्वकामिकः। यं यं चिन्तयते कामं तं तं प्राप्नोति
८ निश्चितम्॥ ३९॥ परमैश्वर्य्यमतुलं प्राप्स्यते भूतले पुमान्। निर्भयो जायते मर्त्यः संग्रामेष्वपराजितः॥ ४०॥ त्रैलोक्ये तु भवेत् पूज्यः कवचेनावृतः पुमान्। इदन्तु देव्याः कवचं देवानामपि दुर्लभम्॥ ४१॥ यः पठेत् प्रयतो नित्यं त्रिसन्ध्यं श्रद्धयान्वितः दैवीकला भवेत्तस्य त्रैलोक्ये चापराजितः॥ ४२॥ जीवेद्वर्षशतं साग्रमपमृत्युविवर्जितः। नश्यन्ति व्याधयः सर्वे लूताविस्फोटकादयः॥ ४३॥ स्थावरं जङ्गमं चापि कृत्रिमं चापि यद्विषम्। अभिचाराणि सर्वाणि मन्त्रयन्त्राणि भूतले॥ ४४॥

प्र०। दैवीकलाचित्कला॥ ४२॥ ४३॥ 'अभिचाराणि' परकृतानि॥ ४४॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुलजादयो दुष्टदेवता जातिभेदाः ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ जपेदिति । अत्र कवचं पुरा कृत्वासप्तशतीं जपेदिति विधौ कृत्वेति सप्तशत्यङ्गत्वस्यानुवादः कवचसमाख्यया वचनान्तरैश्च कवचस्य चण्डीपाठाङ्गत्वसिद्धेः,

भूचराः खेचराश्चैव जलजाश्चौपदेशिकाः। सहजाः कुलजा माला डाकिनी शाकिनी तथा ॥ ४५ ॥ अन्तरिक्षचराघोरा डाकिन्यश्च महाबलाः । ग्रहभूतपिशाचाश्च यक्ष-गन्धर्वराक्षसाः ॥ ४६ ॥ ब्रह्मराक्षसवेतालाः कूष्माण्डा भैरवादयः । नश्यन्ति दर्शनात्तस्य कवचे हृदि संस्थिते ॥ ४७ ॥ मनोन्नतिर्भवेद् राज्ञस्तेजोवृद्धिकरं परम् । यशसा वर्द्धते सोऽपि कीर्त्तिमण्डितभूतले ॥ ४८ ॥

जपेत्सप्तशतीं चण्डीं कृत्वा तु कवचं पुरा। यावद्भूमण्डलं धत्ते सशैलवनकाननम्॥४९

प्र० । कुलजादयो दुष्टदेवता जाति भेदाः 'औपदेशिकाः' उपदेशेन तन्मात्रेण ये सिद्ध्यन्ति ते क्षुद्रदेवता-भेदाः । राज्ञः सकाशादित्यर्थः ॥ ४५ ॥ ॥ ४६ ॥ ४७ ॥ ४८ ॥ अधुना सप्तशत्यङ्गत्वं कवचस्य विधत्ते जपेदिति 'पुरा' प्रथमतः । धत्त इति अनन्तनागो यावद्भूमण्डलं धत्ते धारयति तावदित्यर्थः ॥४९॥

For Private and Personal Use Only

पूर्वं (१) फलान्तरकथनं त्ववेष्टिन्यायेन बहिःप्रयोगान्तरस्वीकारान्न दुष्यति। यावद्भूमण्डलमित्यादिस्तु पूर्णताफलश्रुतिवदर्थवादः। पुरेति पूर्वकालमात्रविधिः ततश्चाव्यवधानांशस्यात्राकथनात् सूक्तपुटितत्वस्य
अ०क० तु रात्रिसूक्तं पठेदादावित्यनेन विवरणात्, आदिमध्यान्तपदैः क्रमपदेन च विहृतस्य श्रौतक्रमत्वेन (२)
८ तद्बाधायोगाद्रात्रिसूक्तात् पूर्वमेव नवार्णस्य निवेशः। एवमर्गलास्तुतेरपीदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः

---

(१) यथा राजसूयप्रकरणे समाम्नाताप्यवेष्टीष्टिर्द्विविधा राजसूयाङ्गभूता स्वतन्त्रा च। तत्राद्या राजसूय एव प्रयुज्यते सा च केवलक्षत्रियकर्त्तृका, राजा राजसूयेन यजेतेति श्रुतेः। द्वितीया च यागाद् वहिरेव प्रयुज्यते सा च सर्वद्विजसाधारणा ; तां प्रकृत्य यदि ब्राह्मणो यजेत वार्हस्पत्यं मध्ये निधायाहुतिं हुत्वा तामभिघारयेत्, यदि राजन्य ऐन्द्रम्, यदि वैश्यो वैश्वदेवमिति विधानात्। तथा सप्तशतीप्रकरणे समाम्नातोऽप्ययं कवचो द्विधा सप्तशत्यङ्गभूतः स्वतन्त्रश्च, आद्यः सप्तशतीपाठ एव प्रयुज्यते तस्य च न फलान्तरम्, फलवत्सन्निधावफलं तदङ्गमिति न्यायात्, द्वितीयस्तु स्वतन्त्रतया वहिरेव प्रयुज्यते तस्यैव फलान्तरकथनमुपयुज्यत इत्याह पूर्वमिति।

(२) क्रमावबोधकेषु श्रुत्यऽर्थ-पठन-स्थान-मुख्य-प्रवृत्याख्येषु प्रमाणेषु श्रुतिरेव बलीयसी, सा चात्र रात्रिसूत्रमित्यादिवचनरूपा तद्बोधितोऽयं क्रमः इत्यस्य श्रौतक्रमत्वम्।

इत्यनेनाङ्गाङ्गिभावमात्रबोधनादव्यभुक्ताख्यो व्रजतीतिक्त्वाप्रत्ययस्य व्यवधानेऽपि प्रयोगादुक्तश्रौतक्रमाविरोधेन व्यवधानेऽपि तदुपपत्तेः (१) कवचार्गलयोस्तु पाठादेव क्रमबोधनाद् दशहोतृव्याहृतिहिङ्कारसामिधेनीनां दशहोतारं वदेत् पुरस्तात् सामिधेनीनां सामिधेनीरनुवक्ष्यन् व्याहृतीः पुरस्तान्निदधाति हिङ्कृत्य सामिधेनीरन्वाहेत्युक्तानामिवसङ्कर्षणोक्तक्रमन्यायेन कवचार्गला नवार्णरात्रिसूक्तचण्डीस्तवानां क्रम उन्नेयः; स्तवजपसंख्यानन्तरमपि देवीसूक्तनवार्णरहस्यानां क्रम इति ज्ञेयम् (२) ॥ ४९ ॥ ५० ॥ ५१ ॥

इति श्रीगुप्तवत्यां देवीकवचव्याख्या प्रथमोऽध्यायः ।

तावत्तिष्ठति मेदिन्यां सन्ततिः पुत्रपौत्रिकी । देहान्ते परमं स्थानं यत् सुरैरपि दुर्लभम् ॥ ५० ॥ प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः ॥ ५१ ॥

इति देवीकवचं समाप्तम् ।

प्र० । परमं स्थानं मोक्षरूपं ज्ञानद्वारा प्राप्नोति 'नित्यं' नियमेन 'महामाया' सर्वकारणमायाशबलब्रह्मरूपा

---

(१) पदार्थबोधकवाक्यानां यः क्रमः स पाठक्रमः ।

(२) वह्ववस्तु रात्रिसूक्तोत्तरं नवार्णजपस्ततश्चण्डीस्तवस्तदुत्तरं पुनः नवार्णजपो देवीसूक्तपाठश्चेति क्रममाहुः

जयन्तीति । मङ्गलेति मत्वर्थीयोऽच् ॥ १ ॥

अ. स्तु मार्कण्डेय उवाच । जयन्ती मङ्गला काली भद्रकाली कपालिनी । दुर्गा क्षमा
१० शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते ॥ १ ॥

प्र० । तस्याः प्रसादतः यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्माविवृणुते तनुं स्वामिति श्रुतेः, य एतां मायाशक्तिं वेद सम्मृत्युं जयति सपाप्मानं तरति सोऽमृतत्वं च गच्छतीति श्रुतेः, अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत-मानुषेभिरिति श्रुतेश्च । पार्वती परमा विद्या ब्रह्मविद्याप्रदायिनी । विशेषेणैव जन्तूनां नात्र सन्देहकारणम् इति सूतसंहितोक्तेश्च ॥ ५० ॥ ५१ ॥ कवचेऽस्मिन् सार्द्धपञ्चाशत्संख्यश्लोकसंग्रहः ।

अथार्गलाव्याख्यानम् । तत्र प्रथमतो देवताया उद्देश्याया गुणान् ध्यानोपयोगिन आह । जयन्तीति । जयन्ती सर्वोत्कृष्टेत्यर्थः, गुणत्रयसाम्यावस्थोपाधिकब्रह्मरूपिण्या भगवत्याः सर्वकारणत्वात् 'मङ्गला' मङ्गं जननमरणादिरूपं सर्पणं भक्तानां लातिगृह्णाति नाशयति सा मोक्षप्रदा मङ्गलेत्युच्यते, न तस्य प्राणा उत्क्रामन्तीति श्रुतेः

प्र०। 'काली' कलयति भक्षयति सर्वमेतत् प्रलयकाले इति काली, ब्रह्म क्षत्रं चोभे भवत ओदनः मृत्युर्यस्योपसेचनमिति श्रुतेः 'भद्रकाली' भद्रं मङ्गलं सुखं कलयति स्वीकरोति भक्तेभ्यो दातुमिति भद्रकाली, भद्रकाली सुखप्रदेति रहस्यागमेऽर्थकथनात् 'कपालिनी' कपालोऽस्त्रीशिरोऽस्थि स्यात् घटादेः शकलेषु च इति मेदिनी कोशात् ब्रह्मादीन् निहत्य तेषां कपालं गृहीत्वा प्रलयकाले अटतीति, प्रपञ्च रूपाम्बुजं हस्ते यस्या इति वा कपालिनी मत्वर्थीय इनिः। प्रपञ्चाम्बुजहस्ता च कपालिन्युच्यते परेति रहस्यागमात्। 'दुर्गा' दुःखेनाष्टाङ्गयोगसर्वकर्मोपासनारूपेण क्लेशेन गम्यते प्राप्यते सा दुर्गा, तां दुर्गां दुर्गमां देवीमिति देव्यथर्वशिरसः 'क्षमा' भक्तानामन्येषां वा सर्वानपराधान् क्षमते सहते जननीत्वात् सातिशयकारुण्यवती क्षमेत्युच्यते। 'शिवा' चिद्रूपिणीत्यर्थः चिन्मात्राश्रयमायायाः शक्त्याकारे द्विजोत्तमाः अनुप्रविष्टाया संविन्निर्विकल्पा स्वयं प्रभा॥ सदाकारा सदानन्दा संसारोच्छेदकारिणी। सा शिवा परमा देवी शिवाऽभिन्नाशिवङ्करी॥ इति सूतसंहितोक्तेः, 'धात्री' सर्वप्रपञ्चधारणकर्त्री, अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुतविश्वदेवैः अहं मित्रावरुणोभा विभर्म्यहमिन्द्राग्नी अहमश्विनोभेत्यादिश्रुतेः 'स्वाहा' देवपोषिणी 'स्वधा' पितृपोषिणी एतादृशपूर्वोक्तमहागुणवती या त्वमसि ततस्ते तुभ्यं नमो नमस्कार एवास्तु केवलं न तु तादृश्याः परिचर्य्यायां सामर्थ्यमस्तीति भावः॥ १॥

For Private and Personal Use Only

मध्विति। विद्राविणी च साविधातृवरदा चेति विग्रहः। रूपं स्त्रीयानां मोहनं द्विषां भीषणं लावण्यं वा॥२॥
महिषेति। निर्नाशविधात्रीत्येकं पदम्॥३॥४॥

अ॰ स्तु मधुकैटभविद्राविविधातृवरदे नमः। रूपं देहि जयं देहि यशो देहि द्विषो जहि॥२॥

११ महिषासुरनिर्नाशविधात्रीवरदे नमः। रूपं देहि॰ ॥ ३ ॥

वन्दिताङ्घ्रियुगे देवि! देवि सौभाग्यदायिनि!। रूपं देहि॰ ॥ ४ ॥

प्र॰। मधुकैटभयोर्विद्राविणीनाशिनी च सा विधातुर्वरदा चेत्यर्थः मधुकैटभनाशार्थं ब्रह्मणा स्तुता सतीतस्मै वरं ददाविति कथा देवीभागवते प्रथमस्कन्धे प्रसिद्धा 'रूपं' रूप्यते ज्ञायते इति रूपं परमात्मवस्तु, रूपं भवेदिन्दुरमन्दकान्तिरित्यागमात्तद्देहि मह्यं मत्कृतनमस्कारेणैव प्रसन्ना सती तथा 'जयं' जयत्यनेन परमात्मनः स्वरूपमिति जयो वेद स्मृतिराशिः ततो जयमुदीरयेदित्यत्र प्रसिद्धस्तं देहि 'यशो देहि' सहनौ यश इति श्रुतिप्रसिद्धं तत्वज्ञानसम्पादनजन्यं यशस्तद्देहि 'द्विषो जहि' कामक्रोधादीन् शत्रून् जहि नाशय॥२॥ महिषासुरेति। महिषासुरस्य निर्नाशस्तस्य विधात्री कर्त्रीत्यर्थः वरदे इति पृथक् पदम्॥३॥ वन्दितेति। ब्रह्मविष्ण्वादिभिर्वन्दितमङ्घ्रियुगं यस्यास्तेषामेतदपेक्षया न्यूनोपाधिकत्वात्, भक्त्यतिशयेन देवीत्यस्य पुनरुक्तिः॥४॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रक्तबीजस्य बधो यस्याः सकाशात् सेति विग्रहः ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥

रक्तबीजबधे देवि चण्डमुण्डविनाशिनि ! । रूपं देहि० ॥ ५ ॥
अचिन्त्यरूपचरिते ! सर्वशत्रुविनाशिनि ! । रूपं देहि० ॥ ६ ॥
नतेभ्यः सर्वदा भक्त्या चण्डिके ! प्रणताय मे । रूपं देहि० ॥ ७ ॥
स्तुवद्भ्यो भक्तिपूर्वं त्वां चण्डिके व्याधिनाशिनि ! । रूपं देहि० ॥ ८ ॥

प्र० । रक्तबीजेति । रक्तबीजस्य बधः कर्त्तव्यतयास्ति यस्याः सा अर्शआद्यजन्तं रक्तबीजबधकर्त्रीत्यर्थः । रक्तबीजस्य बधो यस्याः सकाशादिति वा, अत्र शुम्भासुरेति श्लोकपाठोपपाठः प्राचीनैरव्याख्यानात् प्राचीनपुस्तकेष्व पाठाच्च ॥ ५ ॥ अचिन्त्येति । यतो वाचो निवर्त्तन्तेति श्रुतेः यो अस्याध्यक्षः परमे व्योमन् सो अङ्गवेद यदि वा न वेदेति श्रुतेः ॥ ६ ॥ नतेभ्य इति । सदासर्वदा भक्त्या नतेभ्यः प्रणतेभ्यो मे प्रणताय च रूपं देहीत्यन्वयः ॥ ७ ॥ एवं स्तुवद्भ्य इत्यत्रापि ॥ ८ ॥

For Private and Personal Use Only

ये त्वामर्चयन्ति तेभ्य इति शेषः ॥ ९ ॥ १० ॥ ११ ॥ १२॥ जनं भक्तजनं माम् ॥ १३ ॥ १४ ॥ १५ ॥

चण्डिके सततं ये त्वामर्चयन्तीह भक्तितः । रूपं देहि० ॥ ९ ॥

देहि सौभाग्यमारोग्यं देहि देवि ! परं सुखम् । रूपं देहि० ॥ १० ॥

विधेहि द्विषतां नाशं विधेहि बलमुच्चकैः । रूपं देहि० ॥ ११ ॥

विधेहि देवि ! कल्याणं विधेहि विपुलां श्रियम् । रूपं देहि० ॥ १२ ॥

विद्यावन्तं यशस्वन्तं लक्ष्मीवन्तं जनं कुरु । रूपं देहि० ॥ १३ ॥

प्रचण्डदैत्यदर्पघ्ने चण्डिके ! प्रणताय मे । रूपं देहि० ॥ १४ ॥

चतुर्भुजे चतुर्वक्त्रसंस्तुते परमेश्वरि ! । रूपं देहि० ॥ १५ ॥

प्र० । चण्डिके सततमित्यत्रापि तथैव ये त्वामर्चयन्ति तेभ्य इति शेषः ॥९॥ देहि सौभाग्यमिति अर्थान्मह्यम्॥१०॥ विधेहीति । उच्चकैः अतिशयेनोच्चं बलं मम विधेहि ॥ ११ ॥ १२ ॥ विद्यावन्तमिति । ब्रह्मविद्यावन्तं जनं स्वभक्तजनं कुरु अथच रूपं देहीत्यर्थः ॥ १३ ॥ १४ ॥ १५ ॥

॥१६॥१७॥१८॥ इन्द्राण्या पतिसद्भावस्य पतिसत्तायाज्ञानार्थं पूजिते, इन्द्रेण कालविशेषे क्वचित् सरसि कमल-विसान्तश्चिरं स्थितं तदा देव्याराधनेन पौलोम्या तत्स्थलं लब्धमिति पुराणेषु प्रसिद्धेः (१) इन्द्राणीपतिमा सद्भावेन पूजिते इति वा ॥ १९ ॥

कृष्णेन संस्तुते देवि ! शश्वद्भक्त्या तथाऽम्बिके । रूपं देहि० ॥ १६ ॥
हिमाचलसुतानाथ-पूजिते परमेश्वरि ! । रूपं देहि० ॥ १७ ॥
सुरासुरशिरोरत्ननिघृष्टचरणेऽम्बिके ! । रूपं देहि० ॥ १८ ॥
इन्द्राणीपतिसद्भावपूजिते परमेश्वरि । रूपं देहि०॥ १९ ॥

प्र० । कृष्णेन संस्तुते इति । इयं च कथा देवीभागवते प्रसिद्धा ॥१६॥ हिमाचलसुतानाथः शिवस्तेन पूजिते॥१७॥ सुरासुरेति । अनेन च देवी स्वरूपदर्शनेन निर्वैरताऽद्वैतभावो भवतीति ध्वनितं सुरासुरयोः सामानाधिकरण्यकथनात् ॥ १८ ॥ इन्द्राणीति इन्द्राणीपतिनासद्भावेन पूजिते ॥ १९ ॥

(१) उद्योगपर्वणीन्द्रविजयोपाख्याने भारते प्रसिद्धमेतत् ।

॥ २० ॥ भक्तजनेषु ये उद्दामास्तेभ्यो दत्त आनन्दोदयो मोचो यया ॥ २१ ॥ 'तारिणी' मार्कण्डेयपुराण-प्रसिद्धयामदालसया वाशिष्ठरामायणप्रसिद्धया चूड़ालया च तुल्याम्, आद्यया पुत्रस्तारितोऽन्यया पतिरेव तारित इति तत्राख्यानात् ॥ २२ ॥

अ. स्तु

१२

देवि प्रचण्डदोर्दण्डदैत्यदर्पविनाशिनि !। रूपं देहि० ॥ २० ॥
देवि ! भक्तजनोद्दामदत्तानन्दोदयेऽम्बिके !। रूपं देहि० ॥ २१ ॥

पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीम्। तारिणीं दुर्गसंसारसागरस्य कुलोद्भवाम् ॥ २२ ॥

प्र० ॥ २० ॥ भक्तजनेषु य उद्दामास्तेभ्यो दत्त आनदोदयो मोचो यया ॥ २१ ॥ तारिणीमिति। मार्कण्डेय-पुराणप्रसिद्धया मदालसया वाशिष्ठरामायणप्रसिद्धया चूड़ालया च तुल्या, आद्यया पुत्रस्तारितो द्वितीयया पतिरेव तारित इति तत्राख्यानात् ॥ २२ ॥

'महास्तोत्रम्' एतत् प्रधानभूतं सप्तशतीस्तोत्रं 'सप्तशतीसंख्यावरं' तज्जन्यपुण्यस्य यत् संख्या वरमानन्त्यरूपं तदेव सम्पदामप्याप्नोतीत्यर्थः ॥ २३ ॥ इति गुप्तवत्यामर्गलास्तोत्रं संपूर्णम् ।

इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः । स तु सप्तशतीसंख्या वरमाप्नोति सम्पदः ॥ २३ ॥ इति देव्या अर्गलास्तुतिः समाप्ता ।

प्र० । महास्तोत्रं सप्तशत्याख्यम् अनेन चार्गलास्तुतेरपि सप्तशत्यङ्गत्वं बोधितं य एवमर्गलास्तुतिं पठित्वा सप्तशतीस्तोत्रं जपति स तु स एव सप्तशत्याः संख्या जपसंख्या तया यज्जायमानं वरं फलं तत् प्राप्नोति नान्यः 'सम्पदः' सम्पदश्च प्राप्नोति तस्मादवश्यमर्गलास्तोत्रं पठनीयमिति भावः सिद्धिप्रतिबन्धकं पापमर्गला सदृशत्वादर्गला तन्नाशकस्तोत्रस्यापि लक्षणयार्गलेति संज्ञा ॥ २३ ॥

त्रयोविंशतिसंख्यानां श्लोकानामत्र संग्रहः इत्यर्गलाविवरणम् ।

विशुद्धेति । अयं च श्लोकस्तर्कचरणमीमांसा वार्त्तिके प्रथमः अत्रापि बहुभिः पठ्यते, शिवस्य सोमयागस्य चेह श्लेषः । 'विशुद्ध' निर्विषयकम् अध्ययनसिद्धञ्च 'ज्ञानं' चैतन्यं वेदार्थस्य च 'त्रिवेदी' वेदत्रयमैष्टिकपाशुक-

स.की सौमिकवैदिकात्रयं च 'श्रेयो' मोक्षः स्वर्गश्च 'सोमार्द्धः' चन्द्रोऽभिसुत-सोमरसश्च ॥ १ ॥

१४ ऋषिरुवाच । विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे । श्रेयःप्राप्तिनिमित्ताय नमः सोमार्द्धधारिणे ॥ १ ॥

प्र० । अथ कीलकविवरणम् । तत्र मार्कण्डेय ऋषिः शिष्यानुपदिदेश ससंवादस्तन्त्रेषु कथित इति तन्त्रस्थमेवैतत् ऋषिरुवाच । मार्कण्डेय ऋषिः स्वशिष्यान् प्रतीत्यर्थात् । कीलकं वक्तुं मङ्गलमाचरति मार्कण्डेयः विशुद्धेति । निर्मलज्ञानरूपायेत्यर्थः त्रिवेदी वेदत्रयरूपं दिव्यं चक्षुर्यस्य तस्मै श्रेयः प्राप्तेः कल्याणप्राप्तेर्निमित्ताय कारणाय सोमार्द्धधारिणे नम अस्त्वित्यर्थः अत्र केचिदयं श्लोकस्तर्कचरणमीमांसा वार्त्तिके प्रथमोऽत्रापि बहुभिः पठ्यते परन्त्वनार्ष इत्याहुः वयं तु ब्रूमोऽत्रत्य एव स श्लोको मङ्गलार्थं वार्त्तिककारैर्गृहीत इति कुतो न स्यान्न हि कुत्रचित् स्थितः श्लोको मङ्गलार्थमन्यत्र न गृहीतव्य इति राजाज्ञास्ति तस्मात् सर्व-पुस्तकेषूपलम्भादार्ष एव श्लोक इति ॥ १ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

'सर्वमेतत्' कर्म्मकाण्डो ब्रह्मकाण्डस्तन्त्राणि वैद्यकादीनि कलाश्च 'कीलकं' दानप्रतिग्रहाख्यकर्म्मविशेषादिरूपं च विना, जाप्ये चण्डीस्तवमात्रजपे तत्परः 'क्षेमं' नानाविधप्रत्यवायानां रोगाणां च परिहारम् ऐहिकामुष्मिकफलसमूहं च, एतदेव विन्दतीति सिध्यन्तीति 'एतेन' चण्डीस्तवेन। नित्यमित्यादिभिन्नं वाक्यं, परब्रह्मापि स्तोत्रमात्रेणैव सिध्यतीत्यर्थः ॥ २ ॥

सर्वमेतद्विजानीयान्मन्त्राणामभिकीलकम् (१)। सोऽपि क्षेममवाप्नोति सततं जाप्यतत्परः ॥ २ ॥

प्र०। किमुवाच। सर्वमेतदिति। 'मन्त्राणां' सर्वेषा'मभिकीलकं' वक्ष्यमाणरीत्या सर्वमन्त्रसिद्धिप्रतिबन्धकशापरूपकीलकनाशकत्वाल्लक्षणया सप्तशतीस्तोत्रमभिकीलकं त'त्सर्वं विजानीया'दुपासीतेत्यर्थः नन्वन्यमन्त्रोपासनाभिः किं क्षेमं न भवति यतोऽत्रैवाग्रहः क्रियत इति चेद्भवत्येवेत्याह। सोऽपीति। तत् सप्तशतीस्तोत्रं विना सततं जाप्य तत्परः नानामन्त्राणां जपरूपे कर्म्मणि निरन्तरं निष्ठा यस्य स तत्परो यस्तु पुरुषः सोऽपि 'क्षेमं' सर्वं क्षेमं कल्याणं प्राप्नोतीत्यर्थः ॥ २ ॥

---

(१) सर्वमेतद् विना यस्तु मन्त्राणामपि कीलकमिति गुप्तवतीसम्मतः पाठः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ ३ ॥ तस्माल्लघूपायात्मकचण्डीस्तवातिरिक्तानां प्रयाससाध्यानां सर्वविद्यानां वैयर्थ्यं प्रसक्तमित्याह । न मन्त्रमिति 'विद्यते' लोकैस्तासामनादरेणोच्छिन्नत्वादिति भावः । विनेति । मन्त्राद्यन्वयि ॥ ४ ॥

स.की
१५

सिध्यन्त्युच्चाटनादीनि वस्तूनि सकलान्यपि। एतेन स्तुवतां देवी (२) स्तोत्रमात्रेण सिद्ध्यति ॥ ३ ॥ न मन्त्रो (३) नौषधं तत्र न किञ्चिदपि विद्यते। विना जाप्येन सिद्ध्येत सर्वमुच्चाटनादिकम् ॥ ४ ॥

प्र० । सिध्यन्त्युच्चाटनादीनीति । एवं जप तत्परस्य पुरुषस्योच्चाटनादीन्यपि कर्माणि सिध्यन्ति तथा सकलानि वस्तून्यलभ्यानि सिध्यन्तीति एवं सप्तशतीपाठरहितानामपि पुरुषाणां केवलमन्त्रजपेन सिद्धिमुक्त्वा मन्त्रजप-रहितानामपि पुरुषाणां केवलसप्तशतीपाठेनापि सर्वां सिद्धिमुपदिशति । एतेनेति । एतेन प्रकृतेन स्तोत्र-मात्रेण सप्तशत्याख्यस्तोत्रपाठमात्रेण स्तुवतां स्तोतॄणां देवी भगवती सच्चिदानन्दरूपिणी सिद्ध्यति प्रसीदति ॥३ तस्य पुरुषस्य नान्यमन्त्राद्युपयोग इत्याह । न मन्त्रो नौषधमिति । तत्र तस्य पुरुषस्य कार्य्यसिद्धौ न मन्त्र

(२) नित्यं स्तोत्रमात्रेणेति गु० सं० पाठः । (३) न मन्त्रमिति गु० सं० पाठः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विद्यमानविद्याजातवैयर्थ्यशङ्कां 'निमन्त्रयामास' विचारयामास विचारमभिनीयदर्शयति सर्वमिति । 'एवं' कीलकनिर्माणे कृते सति सर्वमिदं विद्याजातं शुभं सार्थकं स्यादिति । चण्डीस्तवमात्रपाठेन कृतार्थाः सन्तो लोकाः सर्वाणि धर्मार्थकाममोक्षशास्त्राण्यत्यजन् । अतः कीलननिर्माणेन स्तवमात्रजन्यानां सिद्धीनां प्रतिबन्धः शिवेनेतरविद्यासार्थक्यार्थं कृत इति श्लोकचतुष्काशयः ॥ ५ ॥

समग्राण्यपि सेत्स्यन्ति लोकशङ्कामिमां हरः । कृत्वानिमन्त्रयामाससर्वमेवमिदं शुभम् ॥ ५ ॥

प्र० । उपयुक्तो भवति तथा नौषधं तथा न किञ्चिदन्यदपि योगसिद्ध्यादिरूपं साधनं विद्यते उपयोगाय किं तु जाप्येन विना तत्तन्मन्त्रजपरूपकर्माभावेऽपि सर्वमुच्चाटनादिकमाभिचारिकं कर्म्म तथा समग्राण्यभ्यभिलषणीयाणि कार्य्याणि सिध्यन्ति केवलस्तोत्रमात्रेणेति, एतावत्पर्य्यन्तं सप्तशत्युपासनया केवलया सर्वं कल्याणं भवति तथा सप्तशत्यन्यमन्त्रोपासनयापि सर्वं कल्याणं भवतीति पक्षद्वयमुपपादितम् ॥ ४ ॥
इत्थं पक्षद्वयमपीदमस्तीति या पक्षद्वयविषयिणीलोकानां शङ्का तां प्रथमतो हरः कृत्वा तच्छङ्कानिरासार्थं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्तोत्रमिति। चण्डिकायाः 'स्तोत्रं गुह्य'मप्रचरदवश्यं चकार क्वचित् प्रचारमात्रेण यत्नात् तल्लाभेऽपि तस्य 'पुण्यस्य', तज्जन्यफलातिशयस्य या 'नसमाप्ति'रनन्तता तामपि 'नियन्त्रणां' नियन्त्रितां निगूढोपायां चकार॥६

ल.की

१६ स्तोत्रं वै चण्डिकायास्तु तच्च गुह्यं चकार सः। समाप्तिर्न च पुण्यस्य तां यथावन्नियन्त्रणाम् ॥ ६ ॥

प्र०। निमन्त्रयामास निमन्त्रितवानर्थाल्लोकान्, तानागतानाह। किमिति 'एवं' वक्ष्यमाणप्रकारेणेदं सप्तशत्याख्यमेव शुभमिति अत्र तानाहेति शेषः॥ ५॥

अनन्तरं च चण्डिकायास्तु चण्डिकाया एव स्तोत्रं सप्तसत्याख्यं तच्च गुह्यमतिरहस्यं चकारपूर्वोक्तमन्त्रजपरूपपक्षापेक्षया द्वितीयं पक्षमेव सारभूतं चकारेत्यर्थः इति मार्कण्डेयेन तन्त्रोक्तं पूर्ववृत्तं कथितं पुनः शिष्यान् सप्तशतीमाहात्म्यं कथयंश्छिवाभिप्रायं कथयति यस्मादेतत् स्तोत्रपाठजन्यफलस्य न समाप्तिः कदापि भवति तत्तन्मन्त्रजपजन्यपुण्यस्य तु समाप्तिरस्ति तस्मात्तां पूर्वोक्तां शिवेन कृतां नियत्रणां प्रथमपक्षस्य सङ्कोचरूपां यथावद् यथार्थमेव जानीध्वमिति शेषः॥ ६॥

For Private and Personal Use Only

न ह्येतावता सर्वथा स्तोत्रात् सिद्धिर्हानिर्मन्तव्या, गुरुमुखात्तादृशोत्कीलनोपायज्ञानशीलस्य तथानुष्ठितवतो यथा पूर्वमितरविधानैरपेक्ष्येणैव सिद्धिसम्भवादित्याह। सोऽपीति। तमुपायमेव प्रदर्शयति कृष्णायामिति यस्मिन् मासि नूतनार्जनं तस्मिन् मास इति शेषः ॥ ७ ॥

सोऽपि क्षेममवाप्नोति सर्वमेव न संशयः। कृष्णायां वा चतुर्दश्यामष्टम्यां वा समाहितः ॥ ७ ॥

प्र०। सोऽपि क्षेममिति। सोऽपि तत्तन्मन्त्रजपकर्त्तापि एतत्स्तोत्रजपसहितश्चेदेव सर्वं क्षेममवाप्नोति तस्मात्तं प्रथमपक्षं विहायसप्तशतीपाठे एव सर्वैरादरः कर्त्तव्य इत्यर्थः एतेनान्ये मन्त्रा अपि सप्तशतीपाठं कृत्वैव जपनीयाः अन्यथा तत्तन्मन्त्रफलप्राप्तिर्न स्यादिति बोधितं, यत एतत्सर्वमन्त्रसिद्धिप्रतिबन्धकनाशकं भवति तस्मादेव मन्त्राणामभिकीलकमेतदिति पूर्वमुक्तमिति बोध्यम्; अभिकीलकं सिद्धिप्रतिष्टम्भकरं दोषरूपं तन्नाशकत्वादस्यापि लक्षणयाभिकीलकत्वम्। नन्वत्रापि नवार्णमन्त्रजपापेक्षास्त्येवेति चेत् सा शीघ्रफलार्थ-मिति ब्रूमो न तु तद्विना फलमेतस्य नास्तीति एतद्विना तु तत्तन्मन्त्राणां फलमेव न भवतीति विशेषः ॥७॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ददातीति । धातुद्वयेन मिलित्वा दानप्रतिग्रहनामकस्यैव कर्म्मणो विधिः, तत् स्वरूपञ्च गुरुकीलके व्यक्तो भविष्यति ॥ ८ ॥

ल.की ददाति प्रतिगृह्णाति नान्यथैषा प्रसीदति। इत्थं रूपेण कीलेन महादेवेन

१७ कीलिताम् ॥ ८ ॥

प्र० । परन्तु हे शिष्यास्तत्स्तोत्रं सर्वेषामप्यचिन्त्यफलप्रदं जातमिति सर्वेऽपि सर्वेश्वरा भविष्यन्तीति ज्ञात्वा महादेवेन कीलितमस्तीत्याह कृष्णायामिति कृष्णचतुर्दश्याम् अष्टम्यां वा कृष्णायां 'समाहित' एकाग्रः सन् य उपासको निजं सर्वं धनं न्यायेनार्जितं देव्यै 'ददाति' समर्पयति, हे देवि ! इत आरभ्येदं सर्वं धनं मदीयं तुभ्यं मया दत्तमस्ति इति समर्पयति पश्चात् संसारयात्रानिर्वाहार्थं गृहाणेदं द्रव्यं मत्प्रसादभूतमिति देव्या अनुज्ञां मनसा गृहीत्वा तद्द्रव्यं प्रसादबुध्या 'प्रतिगृह्णाति' गृहीत्वा च धर्मशास्त्रोक्तमार्गेण तस्य व्ययं कुर्वन्निरन्तरं देव्यधीनो भवति तस्यैषा सप्तशती प्रसन्ना भवति 'नान्यथा' 'इत्थं रूपेण कीलेन' सिद्धिप्रतिष्ठम्भकरेण 'महादेवेन' कीलितमस्ति अयञ्च कीलकस्यार्थो रहस्यागमे गुरुकीलकपटले प्रदर्शितः अग्रे स्पष्टीकरिष्यामः तर्हि किं कर्त्तव्यमित्याह योनिःकीलामिति ॥ ८ ॥

For Private and Personal Use Only

॥९॥१०॥ ज्ञानारम्भात्यागरूपं कर्माह ज्ञात्वेति। 'कुर्वीत' न त्यजेत् 'अकुर्वाणः' त्यजन् विनश्यति सिद्धिहीनो भवति॥ ११ ॥ १२ ॥

यो निःकीलां विधायैनां नित्यं जपति संस्फुटम्। ससिद्धः सगणः सोऽपि गन्धर्वो जायतेऽवने॥९॥ न चैवाप्यटतस्तस्य भयं क्वापीह जायते। नाल्पमृत्युवशं याति मृतो मोक्षमवाप्नुयात् ॥ १० ॥ ज्ञात्वा प्रारभ्यकुर्वीत ह्यकुर्वाणो विनश्यति। ततो ज्ञात्वैव सम्पन्नमिदं प्रारभ्यते बुधैः ॥ ११ ॥ सौभाग्यादि च यत्किञ्चिद्दृश्यते ललनाजने। तत्सर्वं तत्प्रसादेन तेन जाप्यमिदं शुभम् ॥ १२ ॥

प्र० । यस्मादेवं तस्माद्यो हि पुरुष 'एनां' सप्तशतीं पूर्वोक्तदानप्रतिग्रहकरणेन निष्कीलां विधायस्फुटं यथा स्यात्तथा सञ्जपति स एव सिद्धो भवति स एव देव्या गणो भवति सोऽपि स एवाऽवने सर्वजगद्रक्षणे गन्धर्वो बृहदारण्यके तस्यासीत् दुहिता गन्धर्वगृहीतेति श्रुत्युक्तदेवताविशेषो गन्धर्वो जायते स हि समर्थः सर्वजगद्रक्षणे इति ॥ ९ ॥ दृष्टफलान्याह न चैवाप्यटत इति स्पष्टार्थमेवैतत् ॥ १० ॥ एतादृशकीलकमज्ञात्वा पाठकर्त्तुर्दोषमाह ज्ञात्वेति। पूर्वोक्तं कीलकं ज्ञात्वा तत्परिहारं प्रारभ्यपाठं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शनैरिति । अत्वरयेत्यर्थः न तूपांशुस्वरेण मनसा वा वाचिकस्पष्टजपस्यैवावश्यकत्वोक्तेः ॥ १३ ॥ १४ ॥

इति श्रीगुप्तवत्यां लक्ष्मीकीलकाध्यायः ।

ल·की शनैस्तु जप्यमानेऽस्मिन् स्तोत्रे सम्पत्तिरुच्चकैः । भवत्येव समग्रापि ततः प्रारभ्यमेव

१८ तत् ॥ १३ ॥ ऐश्वर्य्यं यत्प्रसादेन सौभाग्यारोग्यसम्पदः । शत्रुहानिः

परोमोक्षः स्तूयते सा न किं जनैः ॥ १४ ॥ इति कीलकस्तोत्रं सम्पूर्णम् ।

प्र० । कुर्वीत तत्परिहारमकुर्वाणो विनश्यति यस्मादेवं तस्मात्कीलकं ज्ञात्वैव सम्पन्नं निर्दुष्टमिदं स्तोत्रं बुधैः प्रारभ्यते अत्र विनाशकथनं कीलकज्ञानस्यावश्यकत्वार्थमेव, यथाकथञ्चित् पाठस्यापि वचनान्तरैरनुज्ञानात् तेन जाप्यमिति तेन हेतुनेत्यर्थः ॥ ११ ॥ १२ ॥ शनैस्त्विति । शनैः स्वकर्णगोचरं यथा स्यात्तथा पाठे यत्किञ्चित् सम्पत्तिरेव भवति उच्चकैरुच्चैः पाठे तु समग्रापि भवत्येव तत उच्चकैरेवैतत् प्रारभ्यमित्यर्थः ॥१३॥ इत्थं मुनिः कीलकविधिं समाप्य जनानाक्रोशति ऐश्वर्य्यमिति परो मोक्षः कैवल्यमोक्षः अहो मन्दभाग्या एते दृष्टिगोचरं चिन्तामणिं कामदुघां भगवतीं विहाय स्वकल्याणार्थं वराटिकामन्यदेवतोपासनारूपां किमर्थं गृह्णन्तीति ॥ १४ ॥ श्लोकाश्चतुर्दशैवात्र कीलके सम्प्रतिष्ठिताः । इति कीलकटीका समाप्ता ॥

For Private and Personal Use Only

अथ रहस्यतन्त्रस्थो गुरुकीलकपटलो लिख्यते ॥ शिवोवाच। पुरा सनत्कुमाराय दत्तमेतन्मया-
नघ। संवर्त्ताय ददौ तच्च स चान्यस्मै ददौ च तत् ॥ १ ॥ सर्वत्र चण्डीस्तोत्रस्य प्राचुर्य्येण
महीतले। ब्रह्मकाण्डः कर्म्मकाण्डस्तन्त्रकाण्डश्च सर्वथा ॥ २ ॥ अभूत् प्रतिहतोऽनेन शीघ्रसिद्धिप्रदा-
यिना। तदा तेषाञ्च सार्थक्यं कर्त्तुकामेन भूतले ॥ ३ ॥ दानप्रतिग्रहाख्येन मन्त्रोऽयं कीलितो
17 मया। दानप्रतिग्रहाख्यं यत् तत्कीलकमुदाहृतम् ॥ ४ ॥ तदारभ्य च मन्त्रोऽयं कीलकेनास-
कीलितः। न सर्वेषां भवेत्सिध्यै ये कीलकपराङ्मुखाः ॥ ५ ॥ ये नराः कीलकेनेमं जपन्ति परयामुदा।
तेषां देवी प्रसन्नास्यात्ततः सर्वाः समृद्धयः ॥ ६ ॥ त्वत्प्रसूतस्त्वदाज्ञस्त्वद्दासस्तत्परायणः। त्वन्नामचिन्तन-
परस्त्वदर्थेऽहं नियोजितः ॥ ७ ॥ मयार्जितमिदं सर्वं तव स्वं परमेश्वरि !। राष्ट्रं बलं कोशगृहं सैन्यमन्यच्च
साधनम् ॥ ८ ॥ त्वदधीनं करिष्यामि यत्रार्थे त्वं नियोक्ष्यसि। तव देवि ! सदावर्त्ते तवाज्ञामेव पाल-
नम् ॥९॥ इति संचिन्त्य मनसा स्वार्जितानि धनानि च। कृष्णायां वा चतुर्द्दश्यामष्टम्यां वा समाहितः ॥१०॥
समर्पयेन्महादेव्यै स्वार्जितं सकलं धनम्। राष्ट्रं बलं कोशगृहं नवं यद्यदुपार्जितम् ॥ ११ ॥ अस्मिन्मासि
मया देवि तुभ्यमेतत्समर्पितम्। इति ध्यात्वा ततो देव्याः प्रसादात् प्रतिगृह्य च ॥ १२ ॥ विभज्य पञ्चधा
सर्वंतंशान् स्वार्थं प्रकल्पयेत्। देवपितृतिथीनाञ्च क्रियार्थञ्चैकमादिशेत् ॥ १३ ॥ एकांशं गुरवे दद्यात्

For Private and Personal Use Only

तेन देवी प्रसीदति । तस्य राज्यं बलं सैन्यं कोशः साधुविवर्द्धते ॥ १४ ॥ नानारत्नाकरः श्रीमान् यथा पर्वणि वारिधिः । ज्ञात्वा नवाक्षरं मन्त्रं जीवब्रह्मसमाश्रयम् ॥ १५ ॥ तत्त्वमस्यादिवाक्यानां सारं संसार-
र. त. भेषजम् । सप्तशत्याख्यमन्त्रस्य यावज्जीवमहं जपम् ॥ १६ ॥ कुर्वंस्ततो न प्रमादं प्राप्नुयामिति निश्चयम् ।
१९ कृत्वा प्रारभ्य कुर्वीत ह्यकुर्वाणो विनश्यति ॥ १७ ॥ नाहं ब्रह्म निराकुर्य्यां मामाब्रह्मनिराकरोत् । अनिराकरणं मेऽस्तु अनिराकरणं मम ॥ १८ ॥ इति वेदान्तमूर्द्धन्ये छान्दोग्येऽस्य प्रपञ्चनात् । प्रारभ्य तत्परित्यागो न तस्य श्रेयसे मतः ॥ १९ ॥ नाब्रह्मवित् कुले तस्य जायते च कदाचन । न दारिद्र्यं कुले तस्य यावत् स्थास्यति मेदिनी ॥ २० ॥ प्रतिसम्वत्सरं कुर्य्याच्छारदं वार्षिकं तथा । तेन सर्वमवाप्नोति सुरासुरसुदुर्लभम् ॥ २१ ॥ अन्यच्च यद्यत्कल्याणं जायते तत् क्षणे क्षणे । सत्यं सत्यमिदं सत्यं गोपनीयं प्रयत्नतः ॥२२॥ पुत्राय ब्रह्मनिष्ठाय पित्रा देयं महात्मना । अन्यथा देवता तस्मै शापं दद्यान्नसंशयः ॥ २३ ॥

अत्रायं भावः पितृर्जितं विना स्वेनैव मन्त्रप्राप्त्युत्तरं यद्यन्नूतनमर्जितं तदर्जनमाससम्बन्धिकृष्णचतुर्दश्यष्टम्यन्यतर दिवसे देवीनिकटे स्थित्वा देशकालौ संकीर्त्य दानप्रतिग्रहाख्येन कर्म्मणा देवीं प्रीणयिष्य इति सङ्कल्पत्वत्प्रसूत इत्यादिश्लोकत्रयमर्थानुसन्धानपूर्वकं पठित्वा राष्ट्रं बलं कोशगृहमिति श्लोकमन्त्रेण देवीचरणयोर्दत्तमिवानुसन्धाय प्रसन्नया देव्याज्ञप्त इव पुनः प्रतिग्रहं विभाव्य तन्मध्ये पञ्चमं भागं गुरवे तत्पुत्रादिभ्यो वा दत्वाव-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शिष्टे चतुर्थांशं स्वेन क्रियमाणपञ्चयज्ञादिधर्म्मव्ययार्थं निष्कास्येतरन् स्वार्थं यथेच्छं विनियोजयेम्। अत्रा-मान्तश्चन्द्रमासो ग्राह्यः अमायामर्जितस्य तूत्तरमासे दानं, मन्त्रे पूर्वं मासौत्यूहो यथा न्यायं मन्त्रेण दाना-दावप्यूह्यः। इति दानप्रतिग्रह एकः। सर्वमन्त्रसाधारण्येन मन्त्रस्वीकारादि यावदायुषो भागत्रये प्रथमाद्येकैकभागेष्वेवोत्पन्नभक्त्यतिशया उपासकास्त्रिविधा अधममध्यमोत्तमत्वेन तन्त्रेषु गणिताः तद्विदां स्पष्टाः। प्रकृते तदपवादमाह ज्ञात्वेति नवार्णमन्त्रं स्वीकृत्य महावाक्यसंवादिनं तदर्थञ्च गुरोर्बुद्धाधिकृतः सन्नद्यावधियावज्जीवं सप्तशतीस्तवपाठं प्रमादेन सकृदपि नत्यच्य इति दृढं सङ्कल्प्य तथैवानुतिष्ठेत्, अयं ज्ञानारम्भात्यागो द्वितीयः। तत्र छान्दोग्यवाक्यं प्रमाणयति नाहमित्यादिना, आश्विनशुद्धप्रतिपदि चैत्रशुद्ध-प्रतिपदि च सङ्कल्प्य नवम्यन्तं तत्कल्पोक्तविधिना पूजामहोत्सवो यथाशक्ति वा कर्त्तव्य इति च द्वयम्, एवं चत्वारिकार्याण्यप्रमादेन कुर्वतश्चण्डिकोपासकस्यैव सर्वाः सिद्धयः अन्यत्रैषदप्यन्यथात्वे हानिरेवेति ॥ ७॥

इति श्रीगुप्तवत्यां रहस्यतन्त्रस्थकीलकविवरणपटलः ॥ *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथायं सप्तशतीमन्त्रः श्लोकसंख्याभेदेन त्रिविधोऽपि व्यवस्थयैव त्रिभिस्तन्त्रैरवलम्बितोऽपि न भिद्यते, शाखान्तराधिकरणन्यायेन कर्म्मण इव (१) सर्ववेदान्तप्रत्ययन्यायेन विद्याया (२) इवास्य मन्त्र-

र. त. (१) शाखान्तराधिकरणन्यायश्च जैमिनीयमीमांसायां द्वितीयाध्यायस्य चतुर्थे पादे प्रसिद्धः तद्यथा। काठककाण्वमाध्यन्दिनतैत्तिरीयादिषु प्रतिशाखं दर्शादिकर्मप्रतिपाद्यते, तत्र शाखाभेदात् कर्मभिद्यतेन वेति संशयः।
२० शाखाभेदात् कर्मभेदः कुतः भेदकारणानां काठककाण्वेत्यादीनां ग्रन्थनाम्नां बहुलमुपलम्भात्। तथा क्रियाभेदात् धर्मभेदात् पुनरुक्त्यादिदोषाच्च कर्मभिद्यते। न हि दर्शादिक्रियासर्वशाखासाधारण्येका किञ्चित् किञ्चिद्वैलक्षण्यस्य तत्र सर्वत्र विद्यमानत्वात्। तथा धर्मभेदोऽपि बहुलमुपलभ्यते तत्तच्छाखीयानाम्। यदि कठादिप्रोक्तमेव कर्मकाण्वादिषु प्रतिपाद्यते तदा पुनरुक्तिदोषोऽपीत्यतः प्रतिशाखं कर्मभेद इति पूर्वः पक्षः। नामभेदादीनामन्यथापि सम्भवात् यदेकस्या शाखायां यागस्य रूपं चोदनाविधिः फलसम्बन्धो नामधेयं च प्रतिपाद्यते तदेव तस्याऽन्यशाखास्वपीति रूपाद्यभेदात् सर्वशाखाप्रत्ययमेकं कर्मेति सिद्धान्तः प्रकृतेऽपि यामलवाराहीकात्यायन्यादिषु प्रतितन्त्रं सप्तशती पठ्यते तत्र तन्त्राणां यामलेत्यादिनामभेदात्, यामलोक्तपाठे सप्तशतसंख्यापूर्त्तये नवार्णशरणीकरणमन्यत्र चान्यथा मन्त्रविभागाद्यवलम्बनमित्यादिक्रियाभेदात्, एकत्र पठितस्यैव पुनरन्यत्र पठनमिति पुनरुक्तिदोषाच्च सप्तशतीमन्त्रः प्रतितन्त्रं भिन्न एवेति पूर्वपक्षः। मन्त्रात्मकयागस्वरूपं, जपेत्सप्तशतीं चण्डीमिति चोदनाविधिर्द्वादशाध्यायोक्तफलसम्बन्धः सप्तशतीति मन्त्रनाम च सर्वत्रैकमिति तन्त्रत्रयावलम्बित एक एव सप्तशतीमन्त्रो न तु प्रतितन्त्रं भिन्न इति सिद्धान्तः। (२) सर्ववेदान्तप्रत्ययन्यायश्च। सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ३।३।१ इत्यादिवेदान्तपञ्चसूत्रग्रामनुसन्धेयः।

For Private and Personal Use Only

स्यार्थैक्यात्, ईषद्वैलक्षण्यस्याप्रयोजकत्वात्, मनुचन्द्रादिश्रीविद्याभेदानां तन्त्रभेदेन विलक्षणतयोद्धृताना-मर्थैकास्य मन्त्रविदां सम्मततायाः सेतुबन्धेऽस्माभिर्वर्णनाच्च, अनुष्ठाने परमैच्छिको विकल्पः प्रामाण्या विशेषात्; तथापि यामलादितन्त्रावलम्बितपाठयोर्मध्ये सप्तशतसंख्यापूर्त्यर्थमेकत्रद्वात्रिंशद्वारं नवार्णः शरणीक्रियते, अन्यत्र श्वेताननेत्यादिनामषोडशकं (१) द्विः शरणीक्रियत इति तयोः सकारादि-र्नकारान्तस्सप्तशतभेदो मनुरिति गौण्या स्तृष्टिन्यायेन व्यपदेशो दुर्वारः। कात्यायनीतन्त्रोक्तपाठावलम्बे तु मुख्य एव, एतदनन्तर्गतमन्त्रामेलनादित्यादिविशेषमध्यवस्य बहुभिः शिष्टैरयमेव पक्ष आदृतः। सकारादि-रिति तु मार्कण्डेयपदादिमकारोपलक्षणं, प्रधानमन्त्राभिप्रायेण वा, उवाचपदाङ्कितमन्त्राणां तृतीयपटले पाञ्चमिकविभागसंख्यापिण्डकथनावसरेऽङ्गमन्त्राश्च ते नवेति व्यवहारदर्शनात्। मकारादिरित्येव वा तत्र मुख्यः पाठः परन्तु तन्त्रोदितमन्त्रविभागाशयं न्यायगर्भितमजानानैः कैश्चित् क्वचित् क्वचिदन्यथापि विभागो वर्णित इति तदपनोदाय तन्त्रार्थनिष्कर्षेण मन्त्रविभागं संग्रहपूर्वकं व्याख्यास्यामः। तत्र कात्यायनीतन्त्रे-ऽस्मिन्विषये विंशतितमाद्याश्चत्वारः पटलाः षष्टिश्लोकास्तेष्वाद्ये प्रथमाध्यायस्थमन्त्रविभजनपरे पटले

(१) वैकृतिकरहस्योक्तम्।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्रयोदशश्लोकाः ॥ ईश्वर उवाच । मार्कण्डेय उवाचाद्यो मन्त्रः श्लोकात्मकास्ततः । व्योमादिवर्णमारभ्य द्वितीयस्वरसंयुतम् । नृपमित्यन्तिमामन्त्राभवन्त्यष्टादशप्रिये ॥ व्योमहकारः तस्यादिवर्णः सकारः तं द्वितीयेन आकारस्वरेण संयुतं सावर्णिपदस्थमारभ्य प्रश्रयावनितो नृपमित्यन्तिमो येषां ते मन्त्रा अष्टादश भवन्ति ; प्रिये ! इति शिवकृतं देवीसम्बोधनम् । यद्यपि ते सार्द्धा एव सप्तदशश्लोका भवन्ति न पूर्णा अष्टादश तथापि तेष्वेकोऽर्द्धश्लोकात्मको मन्त्रोऽस्तीति ध्वननेन मन्त्रसंख्याया अविरोधः, मध्येऽर्द्धश्लोकमन्त्रास्तु चतुर्विंशतिरीरिता इति पटलान्ते निर्देशाच्च । इह श्लोकात्मका अष्टादशेत्युक्तिस्तु (१) सप्तदशसृष्टीरुपदधातीति वन्नूमानेया । श्लोकशब्दस्तु चरणचतुष्टयघटित एव, पद्ये रूढ़त्वात् । द्विचरणादेर्गाथाव्यवहारस्य मुख्यत्वेऽपि श्लोकव्यवहारस्य तावतैव परस्परान्वितैकार्थप्रतिपादकत्वनिबन्धनस्य तादृशस्थले सतोऽपि गौणत्वात्

(१) अग्निचयने एकया स्तुवत० अ० १४ मं० २८ इत्यादीनि सप्तदशयजूंषि यासामुपधाने नियुज्यन्ते ताः सप्तदशेष्टिकाः सृष्टिशब्दोपेत मन्त्रैरुपधीयमानत्वात् सृष्टिसंज्ञाः तत्र यद्यपि एकया स्तुवतेत्यादीनि कतिपययजूंषि न सृष्टिशब्दोपेतानि तथापि भूम्नां सृष्टिशब्दोपेतत्वात्तत्साहचर्य्यादल्पीयसामविद्यमानमपि सृष्टिशब्दोपेतत्वमुपचर्य्यते । तद्वत् अत्रापि भूम्नां सप्तदशमन्त्राणां श्लोकात्मत्वे तत्साहचर्य्यादेकस्मिन्नर्द्धश्लोकात्मकेऽविद्यमानमपि श्लोकत्वमुपचर्य्यते इत्याह अष्टादशेति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अतएव ब्रह्मोत्तरखण्डे प्रयोगः। बहुनात्र किमुक्तेन श्लोकार्द्धेन वदाम्यहम्। ब्रह्महत्याशतं वापि शिवपूजा विनाशयेदिति। देवीभागवतेऽपि। वटपत्रशयानाय विष्णवे बालरूपिणे। श्लोकार्द्धेन तदा प्रोक्तं भगवत्याखिलार्थदमिति उपक्रम्य, सर्वं खल्विदमेवाहं नान्यदस्ति सनातनमिति संक्षिप्तभागवतस्योक्तिः, अतएव तत्पुराणादिमपद्ये त्रिचरणात्मके 'सर्वं चैतन्यरूपां तामाद्यां विद्यां च धीमहि बुद्धिं या नः प्रचोदया'दित्याकारकेऽपि गाथात्मकः श्लोक इति व्यवहारोऽपि गौण एव, अतएव मात्स्यादावस्य श्लोकस्य 'गायत्र्या च समारम्भस्तद्वै भागवतं विदुः यत्राधिकृत्य गायत्रीं वर्ण्यते धर्म्मविस्तर' इत्यादिरेव व्यवहारो न श्लोकत्वेन, श्लोकत्वापायेऽपि चतुर्विंशत्यक्षरात्मतया गायत्रीत्वानपायात् तस्माच्चतुरूनाधिकचरणासु गाथासु श्लोकत्वाभावादष्टादशश्लोका इति प्रकृतव्यवहारः स्वष्टिन्यायेनैव निर्वाह्यः। इदं तु विचार्य्यम्। तेषु कतमो मन्त्रोऽर्द्धश्लोकात्मक इति। तत्र कश्चिदाह सावर्ण्याद्याः सप्तदशश्लोकमन्त्राः तदन्ते विद्यमानः प्रत्युवाच सतं वैश्यः प्रश्रयावनतो नृपमित्यर्द्धश्लोकात्मको मन्त्र इति; स प्रष्टव्यः सर्वादौ विद्यमानः सावर्णिः सूर्य्यतनयो यो मनुः कथ्यतेऽष्टम इत्यर्द्धश्लोक एव कुतो न मन्त्र इति; पारिशेष्यन्यायादन्त्य एवेति चेत् प्रथमोपस्थितन्यायसूचीकटाहन्यायाभ्यामाद्य एवास्तु। ननु यो मनुरिति यच्छब्दस्य तदुत्पत्तिमिति तच्छब्दसापेक्षत्वेन तदुभयघटितश्लोक एकं वाक्यं, मन्त्रत्वस्य परिपूर्णवाक्यत्वव्याप्यतया सावर्णिरित्यर्द्धस्य साकाङ्क्षत्वेन निराकाङ्क्ष-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वरूपपूर्णत्वाभावान्न मन्त्रत्वम्, अतएव यजुःषु निरवसानेष्वनियतावसानेषु चैकैकमन्त्रत्वनिर्णयः 'अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात् [२।१।४६।] इति जैमिन्युक्तलक्षणानुसारेणेष्टः। एकमुख्यविशेष्यकबोध-
दु.टी. जनकत्वे सति विभागे साकाङ्क्षत्वमिति तदर्थः। ततश्च यो मनुः तदुत्पत्तिमित्यनयोर्विभजने परस्पराकाङ्क्षा-
२२ नपायादुभयघटितमेकं वाक्यमेवैको मन्त्र आस्थेय इति चेत् तर्हि यैर्निरस्तो भवान् लुब्धैः पुत्रदारादिभिर्धनैः तेषु किं भवतः स्नेहमनुबध्नाति मानसमिति श्लोकस्यार्द्धमन्त्रद्वयात्मतानापत्तिः। किञ्च त्वन्मते मम वैरिवशं यात इति मन्त्रोत्तरार्द्धस्य येममानुगतानित्यं प्रसादधनभोजनैरित्यस्यानुवृत्तिं ध्रुवं तेऽद्य कुर्वन्त्यन्य महीभृतामित्युत्तरमन्त्रपूर्वार्द्धेन साकाङ्क्षतया तयोरर्द्धयोरेकमन्त्रत्वापत्तिः। अथ कारकाणां स्वाभाविक-परस्पराकाङ्क्षया यत्रैकक्रियान्वयेन परिपूर्णता तदवान्तरमेकं वाक्यं, तादृशवाक्ययोरपि पुनराकाङ्क्षान्तरेणो-त्थापितेनैकवाक्यतान्तरं यत्र कल्प्यते तन्महावाक्यं एवं महामहावाक्यादीन्युन्नेयानि, एकमन्त्रत्वं तूभय-साधारणैकवाक्यत्वमात्रव्याप्तं, भगो वां विभजतु पूषा वां विभजत्वित्यादीनामवान्तरवाक्यानां भिन्नमन्त्र-त्वस्य, ममाग्ने वर्चो विहवेष्वस्तु वयन्त्वेन्धानास्तनुवंपुषेम मह्यं नयतां प्रदिशश्चतस्रस्त्वयाध्यक्षेण पृतना जयेमेत्यवान्तरवाक्यचतुष्टयात्मकैः प्रत्येकं परिपूर्णैश्चतुर्भिः पादैरेकमन्त्रत्वस्य च दर्शनात्। प्रकृते यत्तच्छब्दयोः परिपूर्णस्यापि वाक्यस्य वाक्यान्तरैकवाक्यतानियामकाकाङ्क्षान्तरोद्दीपकत्वेन तदाकाङ्क्षापरिपूर्त्यभावेऽपि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नावान्तरवाक्यत्वहानिः यत्तच्छब्दमात्रनिरासे नैराकाङ्क्ष्यानुभावात्, अतएव 'तस्मिन् सीदामृते प्रतितिष्ठ व्रीहीणां मेध ! सुमनस्यमान' इति तच्छब्दघटितस्याप्यर्द्धस्य स्योनन्तेसदनंकरोमीति पूर्ववाक्ये नैकवाक्यताया अनावश्यकत्वा(१)न्मन्त्रभेदः स्वीकृतो मीमांसकैः । अतएव च महामायानुभावेन यथा मन्वन्तराधिप इति द्वितीयश्लोकस्य यथेति यच्छब्दघटितस्य तथेत्यध्याहारेण निशामयेति पूर्वश्लोकेनैवैकवाक्यत्वेऽपि तस्याप्रयोजकत्वात् श्लोकाधिकस्य मन्त्रस्य कल्पने तन्त्रविरोधाच्च तावतएव भिन्नमन्त्रतास्वीकारः ; तेन न्यायेन यैर्निरस्त इत्यर्द्धयोरपि भिन्नमन्त्रत्वं युज्यते अतएव यैः संमिति तत् श्लोकादिमान्तिमाक्षररूपप्रतीकद्वयग्रहणेन द्वौ मन्त्राविति कण्ठरवेण तन्त्रोक्तिरुपपद्यत इति चेत् तर्हि सावर्णिरित्यत्रापि यच्छब्दापनये नैराकाङ्क्षानुभवेनोक्तापत्तिरनिवार्य्या, न च विनिगमनाविरहः न्यायद्वयस्य नियामकत्वोक्तेः न चायमस्ति नियमः पूर्णानां निवेशोत्तरमेवार्द्धस्य निवेश इति । षष्ठिस्सार्द्धचंचेति सार्द्धषष्ठिस्तोत्रचंगणने यत्राचक्षुरित्यर्द्धचस्य, कृपामयीतिः पादस्येति यावदृग्वेदमन्त्रपारायणलक्षणे भद्रं न इति पादस्य च मध्य एव निवेशस्येष्टत्वात् । अथैवं

(१) स्योनन्तेसदनं कृणोमीति पूर्वसमूहस्य सदनकरणमर्थः तस्मिन् सीदेत्युत्तरसमूहस्य तु पुरोडाशप्रतिष्ठापनमिति पूर्वोत्तरसमूहयोरेकार्थत्वाभावाच्च तयोरेकवाक्यत्वमावश्यकम् ।

For Private and Personal Use Only

सति त्वत्पक्षे निशामयेत्यारभ्य सप्तदशश्लोकानां सप्तदशमन्त्रत्वमनिर्वाय्यं पुनरर्द्धान्तरस्य मन्त्रत्वकल्पने तन्त्रोक्तसंख्याविरोधापत्तेः, ततश्च निशामयेत्यर्द्धयोः स बभूवेत्यर्द्धयोश्च यथा कथञ्चिदेकवाक्यताकल्पनेन

दु. टी. श्लोकमन्त्रत्वसम्भवेऽपि सुरथो नाम राजा भूदिति श्लोकोत्तरार्द्धस्थस्य तस्य पालयत इति षष्ठ्यन्तस्य यस्य

२३ तत्रानन्वितस्य तदुत्तरश्लोकस्थशत्रुपदेनैवान्विततयाऽवान्तरवाक्यत्वस्यैव भङ्गेन कथमेकत्र मन्त्रत्वम्, एवं बभूवुरित्यादिश्लोकत्रयस्य कथञ्चित् सम्भवेऽपि कोशो बलं चेति श्लोकस्थस्य मृगयाव्याजेनेत्यस्य तदुत्तर-श्लोकस्थेन जगामेत्यनेनैवान्वययोग्यत्वात् तत्रापि मन्त्रत्वभङ्गः, तस्मात् तदनुरोधाय ममाम्ने वर्च्च इत्यत्रैव प्रथमश्लोक एव महावाक्यात्मकैकमन्त्रत्वस्वीकारो युक्त इति चेत् अये ! किमेतावत्येव दूरे तव दृष्टिर्धावति ? त्वत्पक्षे ततोऽपि परतरेषु मद्भृत्यैस्तैरसद्वृत्तैरित्यादिषु बहुषु श्लोकेषु कथं मन्त्रत्वाभङ्गः। अथ तस्यानन्य-गतिकत्वेन तत्तदुचितपदान्तराध्याहारानुषङ्गादिना वाक्यपरिपूर्त्तिराश्रयणीया, इषित्वेत्यादौ छिनत्तीत्यस्या-ध्याहारेणावान्तरवाक्यत्वस्वीकारदर्शनात्; अतएव द्वादशेऽध्याये पशुपुष्पार्घधूपैश्चेति श्लोकद्वयस्यारण्ये प्रान्तरे वापीति श्लोकचतुष्टयस्याप्येकान्वयित्वेनावान्तरवाक्यात्मकमन्त्रद्वयाद्यात्मकत्वे युक्तेऽपि प्रतिश्लोकं भिन्न-मन्त्रता त्वया स्वीक्रियमाणाऽनयैवरीत्या निर्वाह्या गत्यन्तराभावादिति चेत् सत्यं, किं सुरथो नामं कोशो बलं चेति श्लोकयोरध्याहारादिकल्पना मद्भृत्यैस्तैरित्यादिश्लोकेषु वेति विनिगमनाविरहः अथ सप्तदशश्लोक्या

For Private and Personal Use Only

आदावन्तेवार्ङ्श्लोकाङ्गीकार इति पक्षद्वयेऽपि क्वचिन्मन्त्रभङ्गस्यापततोऽध्याहारादिना निरासस्यावश्यकत्वेन युक्तितौल्यादिकल्प इति चेत् ! भ्रान्तोऽसि अनध्यवसायप्रयुक्तविकल्पोक्तेर्न्यायानभिज्ञतापिशुनत्वात् । ननु तस्य तैरभवद्युद्धमित्यादीनां बहूनामर्द्धानां स्वस्वघटकपदैरेव निराकाङ्क्षाणामवान्तरवाक्यत्वात्तेष्वन्यतमस्य मन्त्रत्वकल्पनेऽपि विनिगमना विरहो दुर्वार इति चेत् कस्यायं भार: तेषु तादृशमेवार्ङ्मन्वेष्टव्यं यत्र मन्त्रत्व-पर्य्याप्तिस्वीकारे सति न कस्यापि मन्त्रत्वं भज्येत प्रत्युतचरमार्द्धस्य तथात्वे तु द्वयोरेवाध्याहारकल्पनादि-स्वीकार इत्यस्येव नियामकं, अणुरपि विशेषोऽध्यवसायकर इति न्यायात् न हि प्रतीकविशेषमुपादाया-ऽर्द्धमन्त्रस्तन्त्रे निर्दिष्ट: येन किं हि वचनं न कुर्य्यादिति न्यायेन बहुष्वेव कुदृष्टिरङ्गीकार्य्यानाल्पयोरिति स्यात्, तद्भावे त्वेतदेव नियामकमापद्यत इति । अथ कोऽयं मन्त्रोऽर्द्धश्लोकमन्त्र इति सुहृद्भूत्वा पृच्छामीति चेत् हंहो ! सोऽचिन्तयत्तदा तत्र ममत्वाक्रष्टमानस इत्यवेहि, अतएव पटलान्ते मध्ये चतुर्विंशतिरित्युक्तौ मध्यपदस्वारस्यमुपपद्यते, अस्यैव मन्त्रत्वपर्य्याप्त्यधिकरणताङ्गीकारे एतत् पूर्वापरश्लोकानां सर्वेषां पूर्णता भवति, अथ तन्त्रे प्रतीकग्रहणेन निर्देशाभावे पारिशेष्यक्रमप्राप्तमपि परित्यज्य स्वेच्छया कस्याप्यर्द्धमन्त्रत्व-स्वीकारे कथमाश्वास इति चेत् न ईदृशसङ्कटस्थले न्यायानामेव निर्णायकत्वात्, तेषां च जैमिनिप्रभृतिभि: परिशोधनेन विवेचितत्वात्, ईदृशीमास्तिकतां स्वस्मिन् प्रकटयता त्वयापि त्रयोदशाध्याये सप्तानामेवा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्थानां तन्त्रे कथनेऽपि समुदितसंख्याविरोधादित्यायमनुसन्धायैव नवानामङ्गानामङ्गीकारात्, तत्रैवैकादशानामङ्गानामन्यैरप्यङ्गीकाराच्च, वस्तुतस्तत्र यथा तन्त्रे सप्तैवार्थास्तोक्ता इति वक्ष्यतेऽस्माभिः, तस्मान्न्यायैः
टु. टी. निर्णीतार्थेनाश्वासे सति लोके निर्णयकथैवोच्छिद्येतेति बहुव्याकुली स्यात्। ननु सर्वमिदं मन्त्रलक्षणे
२४ एकवाक्यत्वनिवेशसत्त्व एवोपपद्यते तत्रैव च मानं न पश्यामः तच्चोदकेषु मन्त्राख्येति सूत्रे मन्त्रप्रसिद्धिविषयत्वस्यैव मन्त्रलक्षणस्य जैमिनिनाकथनात्, नापि मन्त्रत्ववाक्यत्वयोर्व्याप्यव्यापकभावः ब्राह्मणादिवाक्येषु मन्त्रत्वाभावात्, हुंफडादिपदमंत्रेषु वाक्यत्वाभावाच्चेति चेत्सत्यं मंत्रत्ववाक्यत्वयोरन्तर्गतः सिद्धस्य सामानाधिकरण्यस्य साकाङ्क्षपदमात्रे मन्त्रत्वपर्य्याप्त्यधिकरणतावेदकप्रमाणमन्तरेण बाधकायोगात्, तादृशापवादकप्रमाणाभावसहकृतमन्त्रत्वस्य वाक्यत्वव्याप्यतानपायात् अन्यथा मन्त्रान्तर्गतपदेषु लक्षणाङ्गीकारो न स्यात्; मन्त्रैरेव मन्त्रार्थः स्मर्त्तव्य इति नियमस्य पदवाच्यार्थस्मरणमात्रेण जपमन्त्रादाविव सर्वत्रोपपत्तेः। सति तु तात्पर्य्यविषयीभूतवाक्यार्थपरत्वेतदन्यथानुपपत्तिप्रसूतिलक्षणावसरात्। नन्वग्नये जुष्टं निर्वपामीत्यंशस्येव मार्कण्डेय उवाच स्वाहेति मन्त्रे स्वाहापदस्यानुष्टेयार्थप्रकाशत्वेन 'सवितुः प्रसव' इत्याद्यंशस्येव मार्कण्डेयादिपदानामदृष्टार्थत्वेन तेषां परस्परान्वितैकार्थपरत्वाभावेऽपि न मन्त्रत्वस्य न वा तु दृष्टार्थत्वस्य भङ्ग इति चेत् न सवित्रादिपदार्थप्रकाशनस्यादृष्टार्थत्वेऽपि सवितुरित्यादेर्निर्वपतिनासहैक-

For Private and Personal Use Only

वाक्यतयैव कर्माङ्गताया वाक्यप्रमाणादवगतत्वेन तदंशे दृष्टार्थताऽनपायात्, अन्यथाग्निरिदं हविरजुषते-त्यादाविदं हविरित्याद्यंशस्यापि देवताया: हवि: स्वीकाराभावेनादृष्टमात्रार्थं तत्प्रकाशकत्वेनानेकदेवत्व-विकृतौ मारुत सप्तकपालादौ वचनोहानापत्तेः, तस्मान्मार्कण्डेयो यस्या माहात्म्यमुवाच तस्यैव हविरिदं दत्त-मितिरीत्याभासमानवाक्यार्थानुगुण्येनैव तत्तदुचितसम्बन्धबोधकपदाध्याहारेण प्रकृतकर्मान्वयस्य सर्वत्र निर्वाहो युक्तो न पुनर्भासमानैकवाक्यत्वस्यापवादकबलवत् प्रमाणमन्तरेण स्वेच्छयैव भङ्गेन मन्त्रत्वकल्पनं सुधिया-मुचितमित्यलं विस्तरेण ॥ वैश्यवाक्यं तत: श्लोका व्योमाद्यात् पञ्चमन्त्रका: नृपस्योक्तिर्मान्तवर्णाद् द्वादश-स्वरसंयुतात् सकारो विन्दुयुक्तोऽन्ते मन्त्रौ द्वावीदृशौ मतौ ॥ व्योम हकार: तदाद्यात् मकारमारभ्य ते च श्लोकाश्चत्वार एव पञ्चीकार्य्या: अर्द्धश्लोकात्मकौ द्वौ मन्त्रौ श्लोकास्त्रय इत्यर्थ: । यद्यपि वैश्योक्तिमेलनेनेयं संख्येति सुवचं तथापि पूर्वं मार्कण्डेयोक्तिमन्तरेणैव संख्याकथनप्रायपाठात् पटलान्तेऽर्द्धश्लोकसंख्यावचनस्य तात्पर्य्यग्राहकत्वाच्चैवमेव व्याख्येयं, तौ च किं नु तेषामिति चतुर्थश्लोकस्य पूर्वोत्तरार्द्धरूपावेव न तु चतु:श्लोक्या आद्यन्तार्द्धरूपौ परेणोक्तौ पुत्रदारैर्निरस्तश्चेति चकारस्वारस्येन पूर्वार्द्धस्थोत्पन्नपदेनैवान्वयमानात् उत्तरार्द्धेनान्वये दारै: पुत्रैरित्यनेन पौनरुक्त्यापत्तेश्च । नृपस्योक्ति: राजोवाचेति मन्त्र: मान्तो यकारो द्वाद-शेनैकारस्वरेण संयुतस्तस्मात्तमारभ्य सं इति सविन्दुकमक्षरं यावत् । द्वौ मन्त्रौ अर्द्धश्लोकात्मकाविति यावत् ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ततो वैश्य उवाचेति स्वरैकादश आदित: वह्निवीजं विन्दुयुक्तमन्ते स्यान्मनुपञ्चकम् ॥ स्वरेष्वेकादश एकार: मन्विरेकादशो भद्रा पद्मनाभ: कुलाचल इति नन्दनकोशाच्च, वह्निवीजं रेफ: । अत्रापि चतुर्षु श्लोकेष्वन्त्यौ

दु. टी. द्वावर्धश्लोकमंत्रौ नाद्यान्त्यौ, यै: संत्यज्येत्यस्य पूर्वेण सहान्वयायोगात् उत्तरार्द्धस्थतच्छब्दस्य द्वार्दं चेति

२५ कर्म्मणश्चानेनैवान्वेतुं योग्यत्वाच्च एवमुत्तरश्लोकेप्यं तद्यत्पदयोर्द्रष्टव्यम् ॥ मार्कण्डेय उवाचैक: ततो मंत्रत्रयं भवेत् तादिवर्णं च भुवनस्वरयुग्वारुणान्तिमम् ॥ भुवनानि चतुर्दश वारुणं वकार: । अत्राद्यावेव द्वावर्द्ध-श्लोकौ उत्तरश्लोके कृत्वेत्यस्य समानकर्तृकोत्तरकालिकक्रियान्तराकाङ्क्षत्वेन तस्योपविष्टाविति पदेनोत्तरार्द्ध एव समर्पणात् तेनान्त्यार्द्धस्य मंत्रान्तरत्वन्नादर्त्तव्यम् ॥ राजोवाचेति षण्मंत्राभादितान्ता: शुभानने अथोवाच ऋषिर्ज्ञानम् अस्तीत्यारभ्य पार्वति सर्वेश्वरेश्वरीत्यन्तामंत्रा द्वादशकीर्त्तिता: ॥ भगवंस्त्वामिति पञ्चश्लोक्यामाद्यन्तयोरर्द्धयो: प्रत्येकं परिपूर्णत्वेप्ययञ्चनिकृत इत्यादीनामुत्तरोत्तरार्द्धेनैव साकाङ्क्षत्वात्तद-भङ्गायाद्यश्लोक एव द्वावर्द्धात्मकौ मंत्रौ तयोर्यत्तच्छब्दकृतसाकांक्षताया अवान्तरवाक्यत्वाविरोधित्वात् ज्ञानमस्तीत्येकादशश्लोक्यां तु चरमश्लोकार्द्धमेव मंत्रद्वयं न तु प्रथमश्लोकार्द्धं ज्ञानेऽपि सतीत्यादेरुत्त-रार्द्धस्थकणमोच्चादिनैवान्वयात् अन्यत्रापि तथैव स्वारस्याच्च । उपान्त्यश्लोकस्य मन्त्रद्वयात्मत्वसम्भवेऽप्युवाच सामीप्यं नैवार्द्धश्लोकद्वयस्यान्यत्र दृष्टस्यार्थिकस्याप्यत्र सम्भवतस्त्यागे मानाभावाच्च सवनीयपश्वालम्भस्थल-

For Private and Personal Use Only

निष्ठस्य दैत्यानुबन्ध्यसामीप्यस्य प्रकृतावार्थिकस्यापि साद्यस्के तदादरेण निर्णायकत्वदर्शनात् ॥ राजोवाचाथ भगवन्नादावन्तौ विदांवर मन्त्वत्रयमिदं ख्यातं पश्चादृषिरुवाच ह । नित्यैव सा जगच्चादौ प्रभुरन्तेष्टमन्त्रकः ॥ भगवन्निति श्लोकद्वये चरमाविवार्द्धश्लोकौ मंत्रौ नत्वाद्यार्द्धं भवानित्यस्य ब्रवीतीत्यनेनैवान्वयात्, नित्यैव सेति सप्तश्लोक्यां तु प्रथमश्लोकपूर्वोत्तरार्द्धयोरेव पार्थक्यं न चरमश्लोकोत्तरार्द्धस्य योगनिद्रामित्यस्याभजदिति परेणैवान्वयात् सनाभिकमल इत्यस्य त्वर्द्धत्रयात्मकैकमंत्रसम्भवादेव दृष्ट्वेत्यस्य स्थित इत्यनेनैवान्वयः यत्नान्तरशून्यः सन्निति यावत् । अत्र स्तौमि निद्रां भगवतीं विष्णोरतुलतेजसे इत्यर्द्ध पाठः क्वचिद्दृश्यते स तु तंत्रान्तरस्यानुगुण एव विश्वेश्वर्य्यादिकं सूक्तं दृष्टं तद्ब्रह्मणापुरेति वचनात् ज्ञापकात् विश्वेश्वरीतः प्रागेव ब्रह्मोवाचेत्यस्य पाठाच्च, तथाप्येतत् तंत्रानुसारिणा सनादर्त्तव्यः, अपितु निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुरित्येवेति प्रभुरन्त इत्यनेन ध्वनितं, प्रभुपदेन तेजसः प्रभुरित्यस्यैव परामर्शो न भगवान् प्रभुरित्यस्य तदन्ते ब्रह्मवाक्याभावात् तावदष्टसंख्याया असम्भवाच्च ॥ अथ ब्रह्मोवाच ततस्त्वं स्वाहा त्वं स्वधादिमाः महासुरान्तिमामंत्रा मताः पञ्चदशप्रिये ॥ त्वं स्वाहेत्यादिचतुर्दशश्लोकात्रामन्त्याविवार्द्धश्लोकौ मंत्रौ नाद्यौ तेन सह स्तुतिरूपेषु श्लोकेषु सर्वेषामर्द्धानां प्रत्येकं पूर्णत्वसम्भवेऽपि यच्च किञ्चित् क्वचिदित्यादिश्लोकेषु स्वस्वोत्तरार्द्धैरेवान्वय स्वारस्यात् अव्यवस्थितस्य शास्त्रार्थत्वायोगाच्च उवाचात्मकमंत्रयोर्मध्यवर्त्तिनोऽर्द्ध श्लोका-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्मकमंत्रद्वयस्यास्मिन्नध्याये क्वापि व्यवधानादर्शनाच्च तादृशस्थले आद्यन्तयोरेव व्यवहिताऽव्यवहितसाधा-
रण्येन मंत्रत्वमिति नियमस्य काण्वेनावलम्बितस्य निर्मूलत्वाच्च प्रथमश्लोकोत्तरार्द्धेऽपि पूर्वार्द्धावृत्तस्य त्वं
 कारस्यानुवृत्तिदर्शनमात्रेण पूर्वार्द्धान्वयित्वस्वीकारात् तेन प्रथमश्लोक एव वान्यत्रैव वा यच्चेत्यादिश्लोका-
 विरोधिनैवार्द्धद्वयकल्पनाचोद्यानां नावकाशः अणोरपि विशेषस्याध्यवसाये निमित्तत्वात् । यैर्निरस्त इत्यस्य
भवेतामद्येत्यस्य चोवाचद्वयमध्यवर्त्तित्वेन तत्रादिमान्तिमयोरर्द्धयोरेव मंत्रत्वस्य क्लृप्ततयैकत्रनिर्णीतशास्त्रार्थो
सति बाधकेऽन्यत्रापीति न्याय एव मूलमिति चेन्न तंत्रान्त्योपान्त्ययोराद्योपाद्ययोरव्यवधानेन मंत्रद्वयत्व क्लृप्तेरपि
सुवचत्वेनान्यत्र व्यवधानापादकस्यादिमान्तिमोभयत्वस्य क्लृप्ततावच्छेदकत्वानङ्गीकारात् ॥ ऋषिरेव स्तुते-
त्याद्याः सप्तस्युः केशवान्तिमाः ततो भगवदुक्तिः स्याद्भवेतामित्युभौमनू अथर्षिर्वञ्चिताभ्यामीत्येतन्मंत्रद्वयं
शिवे । ऋष्युक्तिश्च तथेत्युक्तेत्यादिमंत्रद्वयं भवेत् ॥ एवं स्तुतेति श्लोकषट्के चरमश्लोक एवार्द्धात्मकमंत्रौ तत्र
तावपीति प्रथमार्द्धे जातावित्यस्याध्याहारेण पूर्णत्वसम्भवात् एवं स्तुतेत्यस्यार्द्धस्य मंत्रत्वे उत्तरार्द्धस्थितस्य
निहन्तुमित्यस्य पूर्वेणैव अन्वययोग्यत्वात् तदुत्तरान्वयाऽयोग्यत्वाच्च मंत्रत्वभङ्गापत्तिः एवं निर्गम्येत्यादेरपि
ज्ञेयम् । वञ्चिताभ्यामिति श्लोकोत्तरं प्रीतौ स्वस्तवयुद्धेन श्लाघ्यस्त्वं मृत्युरावयोरित्यर्द्धमधिकं क्वचिद् दृश्यते
तदधिकमेव वक्ष्यमाणायाः अध्यायश्लोकानामर्द्धश्लोकमंत्राणां च संमुदितसंख्यायाविरोधापत्तेर्ज्ञापकात् अत

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आवां जहीत्यर्द्धश्लोक एव मन्त्रः सार्द्धास्त्रयः सार्द्धाश्चत्वार इत्यादौ त्रिचतुराणां पूर्णानां परत एवार्द्धनिवेशस्य लोकसिद्धत्वात्, अपवादकाभावे उत्सर्गसिद्धस्य त्यागायोगात्, त्रिलोक्येत्यर्द्धस्य पूर्वार्द्धोक्तकर्म्मणैव साकाङ्क्षत्वाच्च । काण्वस्तु उवाचद्वयमध्यवर्त्तिष्वेकस्यैवार्द्धश्लोकस्य सत्वेऽन्त्य एव ग्राह्य इति नियमं लोकतः सिद्धं स्वेन पूर्वमवलम्बितमपीह विस्मृत्य वञ्चिताभ्यामित्यर्द्धस्यैव मन्त्रत्वमुक्तवान्, अतएव काण्वानां बुद्धिरापातग्राहिणीति निजप्रथां नान्यथा वितथामन्ववर्त्तथाः कथमन्यथा अत्यल्पमिदमुच्यते, निर्मूलस्य नियमस्यावलम्बनेन सतोप्युत्सर्गस्य विनापवादं स्वेच्छयैव त्यागेन च मन्त्रविभाजकन्यायगन्धस्याप्यनाघ्राणेन च स्वेच्छयैव विभागविषयेऽपशब्दप्रचुराः कारिका निर्म्मितवति त्वयि विश्वासेनाद्य यावदनुतिष्ठतामास्तिकानामहो धर्म्मविप्लवः कियान्वर्णनीय इत्यहो गुरुदेवताभक्तिवैधुर्य्यमात्मनोऽनुमापयसीति दिक् ॥ सर्वे श्लोका इहाध्यायेऽष्टयुक् सप्ततिर्मताः मध्येऽर्द्धश्लोकमन्त्रास्तु चतुर्विंशतिरीरिताः । उवाचान्तास्तत्र बोध्या मन्त्रा भुवनसंख्यकाः संहत्याहृतयो ज्ञेयाश्चतुर्भिरधिकं शतम्॥ अष्टसप्ततावर्द्धश्लोकद्वयात्मकद्वादशश्लोकापनये षट्षष्टिरेव श्लोकमन्त्राः ब्रह्मा भगवानेकैको वैश्यमार्कण्डेयौ द्वौ द्वौ राजत्रयमृषिपञ्चकं चेति चतुर्दशसंख्या उवाचान्तमन्त्रा इत्यर्थः । इति गुप्तवत्यां कात्यायनीतन्त्रे विंशस्य पटलस्य व्याख्या ।

अथैतत् संग्रहश्लोका एकोनविंशतिः । ऋणमिष्टमदत्वैवत्वन्नाम जपतो मम । शिवे ! कथमपर्णेति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रुद्धिर्भारायते न ते ॥ १ ॥ श्रीचण्डीस्तवमन्त्राणां विभागः सप्तभिः शतैः । कात्यायन्यादितन्त्रेषु त्रिषु त्रेधा प्रकीर्त्तितः ॥ २ ॥ गुप्तवत्यां प्रकारास्ते न्यायैः संशोध्यदर्शिताः । तत्त्वयं भास्कारेणेह शतश्लोक्या निबध्यते ॥ ३ ॥ मार्कण्डेय उवाचेति मन्त्रः प्राथमिको मतः सावर्ण्याद्या मुनिवराश्रमान्ताः श्लोकका दश ॥ ४ ॥ सोऽचिन्तयत्तदा तत्रेत्यर्द्धश्लोकात्मको मनुः ॥ मत्पूर्वैरित्युपक्रम्य सप्तश्लोकान्नृपान्तिमाः ॥ ५ ॥ अथ वैश्यः समाध्याद्याः संस्थितान्तास्ततस्त्रयः । किं नु तेषां कथं ते किं इत्यर्द्धश्लोकको मनू ॥ ६ ॥ राजोवाच ततो यैस्तेष्वित्यर्द्धश्लोकमन्त्रकौ ॥ वैश्योक्तिरेवमित्याद्या बन्धुष्वन्तास्ततस्त्रयः ॥७॥ तेषां कृते करोमीति द्वावर्द्धश्लोकमन्त्रकौ ॥ मार्कण्डेयस्ततस्तौ समाधिः श्लोकार्द्धमन्त्रकौ ॥ ८ ॥ कृत्वा तु ताविति श्लोको राजोक्तिर्भगवन्निति ॥ दुःखायेति च मन्त्रौ द्वावर्द्धश्लोकात्मकौ मतौ ॥ ९ ॥ ममत्वाद्या मूढतान्ताश्चत्वारोऽथ ऋषिर्वचः ॥ ज्ञानमस्तीत्युपक्रम्यमुक्तयेतास्ततो दश ॥१०॥ सा विद्येति च संसारेत्यप्यर्द्धश्लोकको मनू ॥ राजोक्तिभगवन् केति श्लोको यत्तदिति द्वयम् ॥११॥ अर्द्धश्लोकात्मकमृषिर्नित्यैवेति तथापि तत् ॥ द्वावर्द्ध श्लोकमन्त्रौस्तो देवानां कार्य्यमादितः ॥१२॥ तेजसः प्रभुरित्यन्ताः श्लोकाः षट् ब्रह्मणोऽथ वाक् ॥ त्वं स्वाहा त्वं स्वधेत्याद्याः श्लोकमन्त्रास्त्रयोदश ॥१३॥ प्रबोधं चेति बोधश्चेत्यर्द्धश्लोकात्मकौ मनू ॥ ऋषिरेवं स्तुतेत्यादिविश्वस्तं श्लोकपञ्चकम् ॥१४॥ तावपीत्युक्तवन्ताविर्त्यर्द्धश्लोकमनुद्वयम् ॥ भगवांश्च भवेतां किमन्येनेत्यर्द्धयुग्मकम् ॥१५॥ ऋषिवाक्य

For Private and Personal Use Only

र्च्चिताभ्यामित्येकः श्लोकमन्त्रकः ॥ आवां जहीत्यर्द्धमृषिस्तथेति श्लोकयोर्युगम् ॥ १६ ॥ इत्यष्टसप्ततिश्लोकैरध्यायः प्रथमात्मनः ॥ प्रथमस्य चरित्रस्य सर्वे मन्त्राश्चतुःशतम् ॥ १७ ॥ तेषूवाचाङ्किता मन्त्रा द्वेऽकद्वेऽकत्रिपञ्चभिः ॥ मृकण्डुपुत्र-भगवद्-वैश्य-ब्रह्म-नृपर्षिभिः ॥ १८ ॥ चतुर्दशस्तु श्लोकार्द्धाश्चतुर्विंशतिरीरिताः । अवशिष्टास्तु षट्षष्टिः श्लोकमन्त्रा इति स्थितिः ॥ १९ ॥

अथ मन्त्राणां तत्र तत्रापेक्षितांशमात्रव्याख्या सापि कात्यायनीतन्त्रसम्मतानामेव श्लोकानां प्रदर्श्यते, ये तु तत्र तत्राधिकाः अपि श्लोकाः क्वचित् क्वचिदुपलब्धा दृष्टास्माभिः कतिपये प्रदर्शयिष्यन्ते ते प्रकृत-तन्त्रानुसारिभिर्नोपादेयाः ।

मार्कण्डेय इति भागुरिं प्रतीति शेष इति केचित्। क्वचित्पुस्तकेषु तु, तपस्यन्तं महात्मानं मार्कण्डेयं महामुनिं, व्यासशिष्यो महातेजा जैमिनिः पर्य्यपृच्छत। मार्कण्डेय महाप्राज्ञ सर्वशास्त्रविशारद।

स.टी.
२८

ओं श्रीगणेशाय नमः। ओं नमश्चण्डिकायै। अस्य श्रीप्रथमचरित्रस्य ब्रह्मा ऋषिः महाकाली देवता गायत्रीछन्दः नन्दाशक्तिः रक्तदन्तिकाबीजं अग्निस्तत्त्वं महाकालीप्रीत्यर्थे जपे विनियोगः॥ मार्कण्डेय उवाच। सावर्णिः सूर्य्यतनयो यो मनुः कथ्यतेऽष्टमः। निशामय तदुत्पत्तिं विस्तराद्गदतो मम॥ १॥ महामायानुभावेन यथा मन्वन्तराधिपः। स बभूव महाभागः सावर्णिस्तनयो रवेः॥२॥ स्वारोचिषेऽन्तरे पूर्वं चैत्रवंशसमुद्भवः। सुरथो नाम राजाभूत् समस्ते चितिमण्डले॥ ३॥

श्रोतुमिच्छाम्यशेषेण देवीमाहात्म्यमुत्तममित्याद्या पूर्वपीठिका दृश्यते। सावर्णिरिति। अष्टमः स्वायम्भुव स्वारोचिषोत्तमतामसरैवतचाक्षुषवैवस्वतादिनाम्नां चतुर्दशानां मध्ये, विस्तरात् ग्रन्थबाहुल्येन॥१॥२॥३॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कोलाविध्वंसिन इति। कोलेति क्षत्रियाणां कुलविशेष इति केचित्। कोलेति सुरथस्यैव राजधान्यन्तरमित्यन्ये मेधसः सुमेधोनामकमुनिविशेषस्य। लक्ष्मीतन्त्रे तु जन्मानिचरितैः सार्द्धं स्तोत्रैर्वै वेदवादिनाम्। कथितानि

तस्य पालयतः सम्यक् प्रजाः पुत्रानिवौरसान्। बभूवुः शत्रवो भूपाः कोलाविध्वंसिनस्तदा॥ ४॥ तस्य तैरभवद्युद्धमतिप्रबलदण्डिनः। न्यूनैरपि सतैर्युद्धे कोलाविध्वंसिभिर्जितः॥५॥ ततः स्वपुरमायातो निजदेशाऽधिपोऽभवत्। आक्रान्तः समहाभागस्तैस्तदा प्रबलारिभिः॥ ६॥ अमात्यैर्बलिभिर्दुष्टैर्दुर्बलस्य दुरात्मभिः। कोशो बलं चापहृतं तत्रापि स्वपुरे ततः॥ ७॥ ततो मृगयाव्याजेन हृतस्वाम्यः सभूपतिः। एकाकी हयमारुह्य जगाम गहनं वनम्॥ ८॥ सतत्राश्रममद्राक्षीद् द्विजवर्य्यस्य मेधसः। प्रशान्तश्वापदाकीर्णं मुनिशिष्योपशोभितम्॥ ९॥

पुरा शक्र वशिष्ठेन महात्मना॥ स्वारोचिषेऽन्तरे राज्ञे सुरथाय महात्मने। समाधये च वैश्याय प्रणतायाऽवसीदते॥ इत्युक्तम्, अनयोरेकमन्यस्य विशेषणं वा द्वयोरपि नामत्वे कल्पभेदेन वा समाधानम्॥ ४—९॥

For Private and Personal Use Only

१० ॥ ११ ॥ १२ ॥ १३ ॥ कुर्वन्त्यन्यमहीभृतामित्यनन्तरं क्वचिदेकः श्लोकोऽधिकः पठ्यते । मम

तस्थौ कञ्चित्सकालञ्च मुनिना तेन सत्कृतः । इतश्चेतश्च विचरंस्तस्मिन् मुनिवराश्रमे ॥१०॥ सोऽचिन्तयत्तदा तत्र ममत्वाकृष्टमानसः । मत्पूर्वैः पालितं पूर्वं मया हीनं पुरं हि तत् ॥११॥ मद्भृत्यैस्तैरसद्वृत्तैर्धर्म्मतः पाल्यते न वा । न जाने सप्रधानो मे शूरहस्ती सदामदः ॥ १२ ॥ मम वैरिवशं यातः कान् भोगानुपलप्स्यते । ये ममानुगता नित्यं प्रसादधनभोजनैः ॥ १३ ॥ अनुवृत्तिं ध्रुवं तेऽद्य कुर्वन्त्यन्यमहीभृताम् । असम्यग्-व्ययशीलैस्तैः कुर्वद्भिः सततं व्ययम् ॥ १४ ॥ सञ्चितः सोऽतिदुःखेन क्षयं कोशो गमिष्यति । एतच्चान्यच्च सततं चिन्तयामास पार्थिवः ॥ १५ ॥ तत्र विप्राश्रमाभ्यासे वैश्यमेकं ददर्श सः । सपृष्टस्तेन कस्त्वम्भो ! हेतुश्चागमनेऽत्र कः ॥ १६ ॥

आर्य्यावरारोहापुत्रश्चातीव शोभनः सद्मानि स्वर्गसदृशान्यप्सरः प्रतिमाः स्त्रिय इति ॥ १४—१६ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सशोक इव कस्मात्त्वं दुर्मना इव लक्ष्यसे। इत्याकर्ण्य वचस्तस्य भूपतेः प्रणयोदितम् ॥ १७ ॥ प्रत्युवाच स तं वैश्यः प्रश्रयावनतो नृपम्। वैश्य उवाच। समाधिर्नामवैश्योऽहमुत्पन्नो धनिनां कुले ॥ १८ ॥ पुत्रदारैर्निरस्तश्च धनलोभादसाधुभिः। विहीनः स्वजनैर्दारैः पुत्रैरादाय मे धनम् ॥ १९ ॥ वनमभ्यागतो दुःखी निरस्तश्चाप्तबन्धुभिः। सोऽहं न वेद्मि पुत्राणां कुशलाऽकुशलात्मिकाम् ॥ २० ॥ प्रवृत्तिं स्वजनानाञ्च दाराणां चात्र संस्थितः। किं नु तेषां गृहे क्षेममक्षेमं किं नु साम्प्रतम् ॥ २१ ॥ कथं ते किं नु सद्वृत्ता दुर्वृत्ताः किं नु मे सुताः। राजोवाच। यैर्निरस्तो भवाँल्लुब्धैः पुत्रदाराभिर्धनैः ॥ २२ ॥ तेषु किं भवतः स्नेहमनुबध्नाति मानसम्। वैश्य उवाच। एवमेतद्यथा प्राह भवानस्मद्गतं वचः ॥ २३ ॥

१७ ॥ १८ ॥ १९ ॥ २० ॥ प्रवृत्तिं वृत्तान्तम् ॥ २१ ॥ ॥ २२ ॥ २३ ॥

For Private and Personal Use Only

॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ दुःखायेति। स्वचित्तजयाभावसङ्ककारिकं मनसि दुःखापादकं

किं करोमि न बध्नाति मम निष्ठुरतां मनः। यैः सन्त्यज्य पितृस्नेहं धनलुब्धै-

र्निराकृतः ॥ २४ ॥ पतिस्वजनहार्दञ्च हार्दि तेष्वेव मे मनः। किमेतन्नाभि-
जानामि जानन्नपि महामते! ॥ २५ ॥ यत् प्रेमप्रवणं चित्तं विगुणेष्वपि बन्धुषु।
तेषां कृते मे निःश्वासो दौर्मनस्यं च जायते ॥ २६ ॥ करोमि किं यन्न
मनस्तेष्वप्रीतिषु निष्ठुरम्। मार्कण्डेय उवाच। ततस्तौ सहितौ विप्र! तं मुनिं
समुपस्थितौ ॥ २७ ॥ समाधिर्नाम वैश्योऽसौ स च पार्थिवसत्तमः। कृत्वा तु तौ
यथान्यायं यथार्हं तेन संविदम् ॥ २८ ॥ उपविष्टौ कथाः काश्चिच्चक्रतुर्वैश्य-
पार्थिवौ। राजोवाच। भगवंस्त्वामहं प्रष्टुमिच्छाम्येकं वदस्व तत् ॥ २९ ॥ दुःखाय यन्मे
मनसः स्वचित्तायत्ततां विना। ममत्वं गतराज्यस्य राज्याङ्गेष्वखिलेष्वपि ॥ ३० ॥

वस्तु किमित्यर्थः। राज्याङ्गेषु स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलेषु सप्तसु ॥ ३० ॥

निकृतः वञ्चितः ॥ ३१ ॥ अतिहार्दीस्नेहातिशयवान् ॥ ३२ ॥ ३३ ॥ विवेकान्धस्य विवेकचक्षुषाहीनस्य (वा) ज्ञानाज्ञानयोः समानाधिकरण्यं कथमिति प्रश्नार्थः ॥ ३४ ॥ तत्र ज्ञानमात्रं मूढ़त्वाभावव्याप्यं ज्ञानविशेषो वा नाद्य इत्याह ज्ञानमस्तीति विषयगोचर इति पदद्वयस्य सप्तम्यास्वैक एवार्थः तथापि शब्दस्पर्शादि-

जानतोऽपि यथाज्ञस्य किमेतन्मुनिसत्तम। अयञ्च निकृतः पुत्रैर्दारैर्भृत्यैस्तथो-
ज्झितः ॥ ३१ ॥ स्वजनेन च सन्त्यक्तस्तेषु हार्दी तथाप्यति। एवमेष तथाहञ्च
द्वावप्यत्यन्तदुःखितौ ॥ ३२ ॥ दृष्टदोषेऽपि विषये ममत्वाकृष्टमानसौ। तत्किमेत-
न्महाभाग! यन्मोहो ज्ञानिनोरपि ॥ ३३ ॥ ममास्य च भवत्येषा विवेकान्धस्य
मूढ़ता। ऋषिरुवाच। ज्ञानमस्ति समस्तस्य जन्तोर्विषयगोचरे। विषयश्च
महाभाग! याति चैवं पृथक्पृथक् ॥ ३५ ॥

रूपोविशेषस्तत्सामान्यं तन्निष्ठो विषयतासम्बन्धश्चेतित्रयपरत्वान्न पौनरुक्त्यं ज्ञानं शब्दादिविषयसम्बन्धि भवत्येवेत्यर्थः। विषयश्च याति ज्ञानेन सम्बन्धी भवत्येव ॥ ३५ ॥

दिवान्धा इति । उलूकचटकविड़ालादयः क्रमात् । वेदान्तिनस्तु या निशा सर्वभूतानां तस्यां जागर्त्ति संयमीत्यादिगीतार्थपरत्वेन योजयन्ति ॥ ३६ ॥ मनुष्यज्ञानं मूढ़त्वाभावव्याप्यमिति चेत्तत्राह ज्ञानिन इति

स.टी. ते केवलं ज्ञानिनो न हि, अज्ञानसमानाधिकरणज्ञानवन्त एवेत्यर्थः । ज्ञानस्याव्याप्यवृत्तित्वेन स्वाभाव-

२१ सामानाधिकरण्याभावस्यैवासिद्धेरिति तार्किकाः वस्तुतस्तु तद्विमुक्तस्तु केवलीति शिवसूत्रे योगिविशेषनिष्ठ-

दिवान्धाः प्राणिनः केचिद्रात्रावन्धास्तथा परे । केचिद्दिवातथा रात्रौ प्राणिनस्तुल्यदृष्टयः ॥ ३६ ॥ ज्ञानिनो मनुजाः सत्यं किं नु ते न हि केवलम् । यतो हि ज्ञानिनः सर्वे पशु-पक्षि-मृगादयः ॥ ३७ ॥ ज्ञानञ्च तन्मनुष्याणां यत् तेषां मृगपक्षिणाम् । मनुष्याणाञ्च यत्तेषां तुल्यमन्यत्तथोभयोः ॥ ३८ ॥

ज्ञानविशेषस्य केवलमिति संज्ञया व्यवहारात् तस्य जानाति क्रियाविशेषणत्वात् तस्यैव च मूढ़त्वाभावव्याप्यत्वात् तादृशज्ञानिनो भवादृशाः सर्वेऽपि न भवन्तीत्यर्थः पशवो गवाश्वादयः मृगा हरिणादयः ॥ ३७ ॥ उभयोर्मनुष्यतिरश्चोरन्यदपि आहारनिद्राभयमैथुनादिकमपि तुल्यमेव ॥ ३८ ॥

न द्वितीय: सर्वेषां तदभावादित्याह तथापीति ॥३९॥४०॥४१॥४२॥ ज्ञानिनामपि केवलिनामपि अन्येषां

ज्ञानेऽपि सति पश्यैतान् पतगांश्छावचञ्चुषु। कणमोक्षाहृतान्मोहात् पीड्य-
मानानपि क्षुधा ॥ ३९ ॥ मानुषा मनुजव्याघ्र! साभिलाषाः सुतान् प्रति।
लोभात्प्रत्युपकाराय नन्वेते किं न पश्यसि ॥ ४० ॥ तथापि ममतावर्त्ते मोहगर्त्ते
निपातिताः। महामायाप्रभावेन संसारस्थितिकारिणा ॥ ४१ ॥ तन्नात्र विस्मयः
कार्य्यो योगनिद्रा जगत्पतेः। महामायाहरेश्चैतत्तया संमोह्यते जगत् ॥ ४२ ॥
ज्ञानिनामपि चेतांसि देवी भगवतीहि सा। बलादाकृष्यमोहाय महामाया-
प्रयच्छति ॥ ४३ ॥ तया विसृज्यते विश्वं जगदेतच्चराचरम्। सैषा प्रसन्ना वरदा
नृणां भवति मुक्तये ॥ ४४ ॥ सा विद्या परमा मुक्तेर्हेतुभूता सनातनी। संसार-
बन्धहेतुश्च सैव सर्वेश्वरेश्वरी ॥ ४५ ॥

किमुतेति तात्पर्य्यम्॥ ॥ ४३ ॥ ४४ ॥ ४५ ॥

भगवन्निति। का कथं किमिति स्वरूपोद्भवप्रभावाणां प्रश्नः ॥ ४६ ॥ तदेव पुनः पृच्छति यत्प्रभावेति किं प्रभावेत्यादिरर्थः ॥ ४७ ॥ ४८ ॥ ४९ ॥ नित्यैवसेत्यादिना रूपं देवानामित्यादिनोत्पत्तेरौपचारिकत्वं

स.टी. राजोवाच। भगवन् का हि सा देवी महामायेति यां भवान्। ब्रवीति कथमुत्पन्ना

२२ साकर्मास्याश्च किं द्विज ॥ ४६ ॥ यत्प्रभावा च सा देवी यत्स्वरूपा यदुद्भवा।

तत्सर्वं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदांवर॥ ४७ ॥ ऋषिरुवाच। नित्यैव सा

जगन्मूर्त्तिस्तया सर्वमिदं ततम्। तथापि तत्समुत्पत्तिर्बहुधा श्रूयतां मम ॥ ४८ ॥

देवानां कार्य्यसिद्ध्यर्थमाविर्भवति सा यदा। उत्पन्नेति तदा लोके सा नित्या-

प्यभिधीयते ॥४९॥ योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते। आस्तीर्य्यशेषमभजत्

कल्पान्ते भगवान् प्रभुः ॥ ५० ॥

चोक्ताप्रभावं वक्तुमारभते योगनिद्रामित्यादिना विष्णोरप्येषा मोहिकेति प्रदर्शनायानेनैव पदेन विशेष्यनिर्देशः तेन परिकराङ्कुरोऽलङ्कार इति काव्यविदः। शेषं सर्पविशेषं कल्पान्ते सर्वनाशसमये आस्तरणार्थं तावन्मात्रस्यैवावशिष्टत्वध्वननाय शेषपदेन निर्देशः ॥ ५० ॥

इयं च योगनिद्राप्रथमचरित्रदेवतामहाकाल्येव तमोगुणप्रधानत्वात्, पूर्वं स्तुतेत्यनेन तामसीपरत्वेन स्तुतेरुप-संहाराच्च॥५१—५४॥ एकैव शक्तिः परमेश्वरस्य भिन्ना चतुर्धा विनियोगकाले, भोगे भवानी पुरुषेषु विष्णुः

तदा द्वावसुरौ घोरौ विख्यातौ मधुकैटभौ। विष्णुकर्णमलोद्भूतौ हन्तुं ब्रह्माण-मुद्यतौ ॥ ५१ ॥ स नाभिकमले विष्णोः स्थितो ब्रह्मा प्रजापतिः। दृष्ट्वा तावसुरौ चोग्रौ प्रसुप्तञ्च जनार्दनम् ॥ ५२ ॥ तुष्टाव योगनिद्रां तामेकाग्रहृदयस्थितः। विबोधनार्थाय हरे र्हरिनेत्रकृतालयाम् ॥ ५३ ॥ विश्वेश्वरीं जगद्धात्रीं स्थिति-संहारकारिणीम्। निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः॥ ५४ ॥ ब्रह्मोवाच। त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका। सुधा त्वमक्षरे नित्ये त्रिधा मात्रात्मिकास्थिता ॥ ५५ ॥

कोपेषु काली समरेषु दुर्गेति वचनादिभिर्विष्णुकालिकयोरेकमूर्त्तित्वान्मधुकैटभहननमपि तेन वेषेण कालि-कयैव कार्य्यमित्याशयेन तामेव स्तौति त्वं स्वाहेत्यादिना। स्वाहा देवगणानां तृप्तिकरी, स्वधा पितृगणानां,

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वानाजिहीते स्वान्धत इति व्युत्पत्तिरपि सम्भवति न त्वव्ययमात्वे इमे, तेन नमः स्वधायै स्वाहायै इति प्रयोगोऽप्युपपन्न इति वैयाकरणाः। वषट्कारः वषडिति शब्दः वौषडित्यादेराश्रावयेत्यादिसप्तदशा-
क्षर्य्यावोपलक्षणं तेन सर्वयज्ञात्मिकेत्यर्थः, सप्तदशप्रजापतिर्यज्ञे न्वायत्त इति श्रुतेः, स्वरात्मिका स्वर्गात्मिका

सकलकर्म्मफलोपलक्षणमेतत् आकारादिस्वरूपेति तु बहवः, सुधा मोक्षो ज्ञानफलमपि त्वमेवेत्यर्थः, अक्षरे

अर्द्धमात्रा स्थिता नित्या यानुच्चार्य्या विशेषतः। त्वमेव सा त्वं सावित्री त्वं देवि! जननी परा॥ ५६॥

प्रणवे नित्ये इति संबुद्धिः, अक्षरे परब्रह्मणीत्यौपनिषदाः अक्षरं ब्रह्म परममिति गीतासु, अक्षरमम्बरान्त-
धृतेरित्यधिकरणे (ब्र० सू० १।३।१०) च तथा दर्शनादिति भावः। त्रिधा अकारोकारमकारात्मना, मात्वार्द्धमात्वे तदीयाजव्यञ्जनकालौ॥ ५५॥ अनुच्चार्य्या अर्द्धचन्द्ररोधिन्यादिध्वन्यष्टकरूपा, तत्स्वरूपं च योगिनीहृदयव्याख्यायां विवेचितमस्माभिः। सावित्री सवितृदेवत्या गायत्री॥ ५६॥

For Private and Personal Use Only

५७ ॥ ५८ ॥ ५९ ॥ कालरात्रिरिति। दैनंदिनप्रलय-ब्रह्मप्रलय-महाप्रलयरूपेति रात्र्यन्तपदत्रयार्थ इत्याहुः, वस्तुतस्तु शक्तिसङ्गमतन्त्रराजे तिथिविशेषेण रात्रीणां तदभिमानिदेवतानां तत्तन्मन्त्राणां चेमानि नामान्युक्तानि तद्देवतात्रयसमष्टिरूपयोगनिद्राप्रतिपादकत्वेन रात्रिसूक्तं बह्वृचेषु प्रसिद्धम्। सामविधिब्राह्मणेऽथ

त्वयैतद्धार्य्यते विश्वं त्वयैतत् सृज्यते जगत्। त्वयैतत्पाल्यते देवि! त्वमत्स्यन्ते च सर्वदा॥ ५७॥ विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने। तथा संहृतिरूपाऽन्ते जगतोऽस्य जगन्मये!॥ ५८॥ महाविद्या महामाया महामेधा महास्मृतिः। महामोहा च भवती महादेवी महासुरी॥ ५९॥ प्रकृतिस्त्वञ्च सर्वस्य गुणत्रयविभाविनी। कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा॥ ६०॥

यः कामयेत पुनर्नं प्रत्याजायेयमित्यधिकृत्य रात्रिं प्रपद्य इत्यादिरूपो मन्त्रोऽप्यनुसन्धेयत्वेनाम्नातः, स च देवीचन्द्रकलास्तवे चरमश्लोके दीक्षितैर्ज्ञानमोक्षोभयफलकत्वेन व्याख्यातः हरिवंशेऽप्यस्याविस्तरः, एतद्देवताकत्वादेव रात्रिसूक्तमिति तन्त्रेष्वस्य स्तोत्रस्य व्यवहारः॥ ६०॥

बुद्धिः करणभूता, बोधो व्यवसायात्मको लक्षणं फलं यस्याः सा ॥ ६१ ॥ दशभुजत्वेनेमां स्तौति खड्गि-

स.टी.

३४

त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा। लज्जा पुष्टिस्तथा तुष्टिस्त्वं शान्तिः क्षान्तिरेव च ॥ ६१ ॥ खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा। शंखिनी चापिनी बाण-भुशुण्डी-परिघायुधा॥६२॥ सौम्या सौम्यतराऽशेषसौम्येभ्य-स्त्वतिसुन्दरी। परावराणां परमा त्वमेव परमेश्वरी॥ ६३ ॥ यच्च किञ्चित् क्वचि-द्वस्तु सदसद्वाखिलात्मिके। तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा ॥६४॥ यया त्वया जगत्स्रष्टा जगत्पातात्ति यो जगत्। सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः ॥६५॥ विष्णुः शरीरग्रहणमहमीशान एव च। कारितास्ते यतो-ऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत्॥ ६६ ॥ सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि ! संस्तुता। मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ ॥ ६७ ॥

नीति ॥ ६२ ॥ परा ब्रह्मादयः अवराः शक्रादयः ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥

'लघु' क्षिप्रं, बोधश्चेति भावश्चेति क्वचित्पाठः ॥६८॥ एवं स्तुतेति । अत्रेदं रहस्यम् । चरित्रत्रयदेवता महाकाली-महालक्ष्मी-महासरस्वत्यः क्रमेण वहिस्तमोरजःसत्वरूपा इवान्तः सत्वरजस्तमोरूपा अपीति सात्विकादिपदेनैवासां क्रमेण व्यपदेशः दैत्यसंहारकर्त्तृत्वमपि सात्विकादिरूपेणैव अतएव चण्डिकाया महिषासुरहननकाले मधुपानेनारक्तता, चण्डशुम्भादिहनने मषीवर्णता च वक्ष्यते, तयारीत्या तामस्यपि योगनिद्रा

प्रबोधश्च जगत्स्वामी नीयतामच्युतो लघु । बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ ॥ ६८ ॥ ऋषिरुवाच । एवं स्तुता तदा देवी तामसी तत्र वेधसा । विष्णोः प्रबोधनार्थाय निहन्तुं मधुकैटभौ॥६९॥ नेत्रा-ऽऽस्य-नासिका-बाहु-हृदयेभ्यस्तथोरसः । निर्गम्य दर्शने तस्थौ ब्रह्मणोऽव्यक्तजन्मनः ॥ ७० ॥ उत्तस्थौ च जगन्नाथस्तया मुक्तो जनार्दनः । एकार्णवे हि शयनात् ततः स ददृशे च तौ॥७१॥

स्वान्तःस्थितसत्वमात्रस्य स्वस्या एव रूपान्तरस्यावशेषाय वहिर्व्याप्तं तमोरूपं निःसारितवतीत्याह, नेत्रास्येति । एतेन देव्या एव तन्त्रेषु मधुकैटभहन्तृत्वव्यवहार उपपद्यते, पुरुषाभ्यां सह बाहुयुद्धयोग्येन पौरुषरूपेणैव तौ हतवतीति स्थितिः ॥ ६९ ॥ ७० ॥ प्रकृतकर्म्मानुगुणं विशेषमाह, जनार्दन इति ॥७१॥

मधुकैटभाविति। अत्रैकाक्षराधिक्यं तु वृत्तचन्द्रोदयादावस्माभिर्बहुधा समाहितम् ॥ ७२ ॥ बाहुप्रहरणो विभुरित्यस्योत्तरं द्वौ श्लोकौ क्वचित्पठ्येते, न च तौ युद्धवैमुख्यं श्रमं वाप्युपजग्मतुः ततो

स.टी. मधुकैटभौ दुरात्मानावतिवीर्य्यपराक्रमौ। क्रोधरक्तेक्षणावत्तुं ब्रह्माणं जनितो-

३५ द्यमौ ॥ ७२ ॥ समुत्थाय ततस्ताभ्यां युयुधे भगवान् हरिः। पञ्चवर्षसहस्राणि बाहुप्रहरणो विभुः ॥७३॥ तावप्यतिबलोन्मत्तौ महामायाविमोहितौ। उक्तवन्तौ वरोऽस्मत्तो व्रियतामिति केशवम् ॥७४॥ श्रीभगवानुवाच। भवेतामद्य मे तुष्टौ मम बध्यावुभावपि। किमन्येन वरेणात्र एतावद्धि वृतं मया ॥७५ ॥ ऋषिरुवाच। वञ्चिताभ्यामिति तदा सर्वमापोमयं जगत्। विलोक्यताभ्यां गदितो भगवान् कमलेक्षणः ॥ ७६ ॥

विद्यामुखालोकसमुद्भूतप्रह्लोत्सव: ॥ हरिरुचे वरो मत्तो युवाभ्यां नीयतामिति। निशम्यैतद्विभोर्वाक्य-मवलोक्यपरस्परमिति ॥ ७३ ॥ ७४ ॥ ७५ ॥ आपोमयं जलमयम् आपोऽश्नमित्यादौ प्रसिद्धः आपःशब्दो-ऽपि जलवाचकोऽस्ति छान्दसमेवेति तु वैयाकरणाः ॥ ७६ ॥

॥ ७७ ॥ 'जघने' तत्र जलाभावादिति भावः। एतदुत्तरं क्वचिदधिकं पठ्यते। हत्वा तु भगवान् विष्णुस्तावुभौ मधुकैटभौ तयोऽस्तु मेदसा राजन्! महीमेतामकल्पयत्। मेदिनीति तदारभ्य संज्ञामापवसुन्धरा। ततो वीतभयो ब्रह्मा ससर्जविविधाः प्रजाः॥ इत्यादि-संसाराब्धौ न मज्जती-

त्यावां जहि न यत्रोर्वी सलिलेन परिप्लुता ॥ ७७ ॥ ऋषिरुवाच। तथेत्युक्त्वा भगवता शङ्ख-चक्र-गदाभृता। कृत्वा चक्रेण वै च्छिन्ने जघने शिरसी तयोः ॥ ७८ ॥ एवमेषा समुत्पन्ना ब्रह्मणा संस्तुता स्वयम्। प्रभावमस्या देव्यास्तु भूयः शृणु वदामि ते ॥ ७९ ॥ इति मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये मधुकैटभवधो नाम प्रथमोऽध्यायः॥ १॥

त्युक्तं, तत्पश्चादेवमेषा समुत्पन्नेति श्लोकः। पुराणान्तरेत्वेतदुत्तरं कथा शेषः स्मर्यते। विष्णुना स्वकृतवचनजन्यपातकनिरासाय स्वीयं वचनमङ्गीकृतवतोर्दैत्ययोरुद्धाराय च वनवासेन तपःकृत्वा वरदानाम्न्या नद्यास्तीरे मधुकेश्वरकैटभेश्वरनामकं लिङ्गद्वयं प्रतिष्ठितं तद् वानवासिकानामकं क्षेत्रं प्रथितमभवदित्यादि ॥ ७८ ॥ अस्या देव्या इति इमेव्यधिकरणे षष्ठ्यौ, अस्यास्तामस्या या देवी लक्ष्मी

चण्डिका तस्या इत्यर्थः। अथात्रोवाचाङ्किता मन्त्रा विचार्यन्ते ते चापेक्षाऽनपेक्षाभ्यां सदसद्भावाभ्यां च चतुर्विधाः। तत्र सावर्णिरित्यादिः कस्योक्तिरित्याकाङ्क्षायाः सत्वादाद्यो मार्कण्डेय उवाचेति मन्त्रोऽपेक्षितोऽस्ति च, स च वैश्यमेकं ददर्श स इत्यन्तमनुवृत्तः, तदुत्तर-श्लोकस्य राजोक्तित्वेऽपि, राजोवाचेत्यस्य नापेक्षा सपृष्टस्तेनेत्यनेनैव तदर्थस्य निबद्धत्वात्, एवं राजोक्तिकृतव्यवधानात्तदुत्तरश्लोकारम्भे पुनरपि मार्कण्डेय उवाचेत्यस्यापेक्षायां सत्यामपीत्याकर्ण्येति श्लोकस्थेनेतिशब्देन राजोक्तेः क्रोडीकारेण पूर्वप्रक्रान्ताया अनुवृत्त्या सन्निहितायाश्च मार्कण्डेयोक्तेर्मध्यपातसम्भवेन न तस्य पुनरुल्लेखः। इत्याकर्ण्येति श्लोक एव वैश्यः प्रत्युवाचेत्यस्य निबद्धतया तदुत्तरग्रन्थारम्भे वैश्य उवाचेति मन्त्रो नापेक्षित एव तथाप्यस्ति, अतएव अनन्यगत्या तत् सार्थक्याय तेनैव सोऽर्थः स्मर्तव्यो न विद्यमानेनाप्युपायान्तरेणेति नियमः कल्पनीयः, पूर्वं श्लोकमन्त्रार्थदशायामेव बुद्धस्यार्थस्य पुनर्बोधस्यादृष्टार्थता वा चतुर्भिरभ्रिमादत इति विहितमन्त्रेषु द्वितीयादिमन्त्रार्थबोधस्यैव वाच्या, तन्त्रान्तरपक्षेत्विह वैश्य उवाचेति मन्त्रो नास्त्येवेति वक्ष्यमाणत्वान्न तत्पक्षे नियमादृष्टादिकुसृष्टिः। ततो राजोवाचेत्याद्युवाच षट्कं यथास्थानमपेक्षितमेवास्ति ततो ब्रह्मोवाचेति नातीवापेक्षितं, तदुत्तरमृष्यादित्रयमपेक्षितमेवास्ति, तत आवां जहीत्यर्द्धारम्भे मधुकैटभा जचतुरित्यपेक्षितमपि कैश्चित्पठ्यमानमपि ताभ्यां गदित इत्यनेन गतार्थत्वान्नास्ति, तदुत्तरमृषिरुवाचेति तु नातीवापेक्षितम्

स.टी.
३६

ऋषिवाक्यस्यातीवसन्निहितत्वेनेति गदित इत्यन्वितेनेतिशब्देन तत् क्रोड़ीकारसम्भवात् अतएव यामलपाठेऽयं मन्त्रो नास्तीति दिक् ॥ ७९ ॥ इति भास्कररायोन्नीतायां गुप्तवत्यां मन्त्रव्याख्याने प्रथमोऽध्यायः ॥ १ ॥

(अथ प्रथमाध्याये पाठान्तराणि। तदैत्यत्र तथेति पाठान्तरम्। श्लो० ४। द्विजवर्यः सुमेधसः इति शन्तनवीसम्मतः पाठः। तदर्थस्तु हे द्विज इति मार्कण्डेयकृतं भागुरिसम्बोधनम्। वरं राज्याद्यवाप्तिलक्षणमर्हतीति वर्यः सुरथः सुमेधसो मुनेरिति। श्लो० ८। ममत्वाकृष्टचेतन इति पा० ममत्वं ममेदमित्यभिमानः तेन आकृष्टा निवृत्तिमार्गादपाकृष्टा चेतना बुद्धिर्यस्य सः इति नागेशः। श्लो० ११। सुप्रधान इति पाठान्तरम्। सुखेन अक्लेशेण धीयते धार्य्यते पोष्यते च सुप्रधान इति शन्तनुः। श्लो० १२। शूरोहस्तीत्यसमस्तः पाठः क्वचित् नागेशस्तु शूरहस्तीति कर्मधारय इत्याह। श्लो० १२। पुत्रैरादायि मे धनम् इति पाठान्तरम्। मदीयैः दारैः पुत्रैश्च मे धनं अदायि गृहीतमित्यन्वय इति शन्तनुः नागेशस्तु दारैः पुत्रैर्मे धनम् आदाय गृहीत्वा धनैर्विहीनस्य अंशस्याप्यदानात् तद्रहितः कृतोऽहं धनहीनत्वादेवाप्तैः सुहृद्भिः बन्धुभिश्च निरस्तस्त्यक्तोऽहं वनमभि आगत इत्यन्वय इत्याह। श्लो० १९। तेष्वपीति पा० तेष्वपि तथा विधेष्वपि मे मनः हार्द्दवेत्यन्वय इति वा। श्लो० २५। पतङ्गानिति पा० पतेरङ्गच् पक्षिणीति शन्तनुः। पतगानिति निरनुस्वारमिति नागेशः। श्लो० ३९। नन्वेतान् इति पा० भो राजन्! एतान् लोके प्रसिद्धात् पक्षिमृगादीन् ममत्वात् सुतान् प्रति साभिलाषान् साहतात् किं

न पश्यति इति चतुर्थ पादान्वय इति शन्तनुः। नन्वेते, एते सुताश्च तु निश्चयेन न प्रत्युपकाराय न भवन्ति इदं किं न पश्यसीति नागेशः। श्लो० ४०। संसारस्थितिकारिणि इति पा०। महामायाप्रभावेन कर्त्रा।

स.टी. मोहमार्गे निपातिता मनुजा संसारस्थितिमिव कुर्वन्ति न तु ततो विरज्यन्त इति ना०।४१। महामाया

३७ हरेश्चैषा, इति पा० एषा हरेर्महामायेत्यन्वयः, एतदिति पाठे जगताऽन्वयः। श्लो० ४२। त्वमेव सन्ध्येति पाठान्तरम्। सन्ध्यायन्त्यस्यां संधीयेते अहोरात्रौ वाऽस्यां सा सन्ध्या पितृप्रसूरिति शन्तनुः 'त्वमेव सा' सा त्वमेवेति पूर्वान्वयीति नागेशः। श्लो० ५६। त्वं देवि! जननी परा। इत्यत्र वेद जननी, देवजननीति वा पाठान्तरम् तत्र वेदानां जननी गायत्री, देवानां जननी अदितिस्तत्स्वरूपावेत्यर्थः। प्रकृतपाठे हे देवि! त्वं परा उत्कृष्टा जननी सर्वजनकत्वात्। सर्ववाग् जननी परा चेति नागेशः। श्लो० ५६। परा पराणामिति पाठान्तरम्। हे देवि! त्वमेव पराणां श्रेष्ठानां मध्ये परा उत्कृष्टाऽतएव परमेत्यादि शन्तनुः। नागेशस्तु परेति पश्यन्ती-मध्यमा-वैखरीणामुपलक्षणम्, पराबीजरूपा वा, पराणाम् उत्कृष्टानां प्रधानं त्वमेव यतस्त्वं परमेश्वरीत्याह। श्लो० ६३। स्तूयसे मया इति पाठान्तरम्। श्लो० ६४। जगत्पात्यत्ति यो जगत् इति पाठान्तरम्। अर्थस्तु समान एव श्लो० ६५। क्रोधरक्तेक्षणौ हन्तुं ब्रह्माणमिति पाठान्तरम्। श्लो० ७२। इति प्रथमाध्याये पाठान्तराणि।)

अथ तन्त्रे नवभिः श्लोकैर्द्वितीयाद्यऽध्यायत्रयमन्त्रविभजनपरो द्वितीयः पटलः ॥ ईश्वर उवाच । द्वितीये ऋषिवागष्टषष्ठिः श्लोका इति क्रमः । ततस्तृतीयेऽध्याये तु ऋषिः प्रोवाच देशिके ! ॥ पञ्चत्रिंशत्ततः श्लोकमन्त्रा ज्ञेया वरानने । देव्युवाच, ततः श्लोकमन्त्र एको महेश्वरि ! ॥ ऋषेरुक्तिः पुनः श्लोकमन्त्राः पञ्च सनातनाः । एवमाहुतयस्तत्र चत्वारिंशच्चतुर्युताः ॥ द्वितीयेऽध्याये ऋषिरुवाचेत्येको मन्त्रः देवासुरमित्यादयोऽष्टषष्ठिः श्लोकमन्त्रा इत्येकोनसप्ततिः । तृतीये तु ऋषिवाक्यद्वयं देव्युवाचेत्येक, एकचत्वारिंशच्छ्लोकमन्त्रा इति चतुश्चत्वारिंशत्, देशिके इति देव्या एव गुरुत्वेन सम्बोधनम् ॥ चतुर्थे त्वृषिवाङ्मन्त्रः श्लोकाः षड्विंशतिस्ततः । पुनस्तथैव ऋष्युक्तिः, श्लोकौ द्वौ मन्त्ररूपिणौ ॥ एवं स्तुतेति मन्त्रोऽयम् अतिगुह्योऽतिपावनः । देव्युक्तिर्व्रियतां मन्त्रः कथितः षोडशाक्षरः ॥ देवा ऊचुरिति प्रोच्य भगवत्याकृतं वदेत् । मन्त्रोऽयं शतवर्णाढ्यो द्वादशोत्तरयुक् पुनः ॥ अथो ऋषिरुवाचेति मन्त्रश्चेति प्रसादिता । इति श्लोकास्तु चत्वारो मन्त्रास्तावन्त एव ते । श्लोकौ द्वावित्युक्तयोर्मध्ये प्रथमस्य प्रशंसामात्रमेव स्तुतेति, व्रियतामित्यर्द्धश्लोकमन्त्रोत्तरम् 'ददाम्यहमतिप्रीत्यास्तवैरेभिः सुपूजिता । कर्त्तव्यमपरं यच्च दुष्करं तन्निवेद्यताम्' इति श्लोकः क्वचित् पठ्यते स प्रकृततन्त्रानुसारिभिः नादर्त्तव्य इति ध्वनयन्नाह, देवा ऊचुरिति । भगवत्याकृतं सर्वमित्यारभ्याम्बिके इत्यन्तोऽध्युष्टश्लोकात्मक एक एव मन्त्रो, द्वादशाधिकशताक्षर इत्युक्त्या मन्त्रोऽयमित्येकवचनेन च प्रतीयते, प्रार्थनारूपार्थैक्याल्लक्षणतोऽपि युज्यते,

परन्तु पटलान्ते वक्ष्यमाणाभ्यामेतदध्यायस्थमन्त्रेयत्ता तद्विवेचनाभ्यां सह विरोधापत्त्यैकत्वमविवक्षितं, तावन्त
एव ते इत्यत्र तच्छब्देनेषद्व्यवधानेनोक्तानध्युष्टश्लोकाननूद्य तावन्त एवेत्यनेन चतुर्मन्त्रात्मकता विधीयते
स.टी. अन्यथा तस्य वैयर्थ्यापत्तेः अतश्चैकोऽर्द्धश्लोकमन्त्रस्त्रयः श्लोकमन्त्रा इति सिद्ध्यति, स च यद्यपि काण्वोक्त-
३८ रीत्या प्रथमार्द्धमात्रस्यापि निराकाङ्क्षत्वात् स एवेति सुवचं, तथाप्युत्तरश्लोकमन्त्रद्वये न नैराकाङ्क्ष्यसाम-
ञ्जस्यम् अतश्चरमस्यैवार्द्धस्य पूर्वोक्तेनौत्सर्गिकन्यायेन मन्त्रत्वमास्थेयं, यच्च मर्त्य इति मन्त्रस्य तु सार्द्धश्लोकत्वे
सत्येवैकवाक्यत्वस्य सम्भवात्तदसम्भवादेवागत्याध्याहारादिभिः पूर्णता स्वीकार्य्या। अथवा वित्तर्द्धिविभवैरित्येत-
न्नैकं पदं किन्तु वित्ता ऋद्धीति पदद्वयं भिन्नं 'वित्ता' तत्सम्बन्धिज्ञानविषयीभूता सती सम्पदां विभवैर्ऋद्धि संमर्द्धये-
त्यर्थः, ऋध्नोत्यादेर्विकरणव्यत्ययश्छान्दसः एतेन धनवित्तपदयोः पौनरुक्त्यमपि समाहितं भवति। वस्तुतस्तु मन्त्र-
चतुष्टयस्यैकसंख्यावशीकारेणैकत्वस्य कथनादेव ज्ञापकान्मन्त्रार्थोऽत्र परस्पराकाङ्क्षानिष्पन्न एक एवानुसन्धेयः ॥
आहुतिमात्रं तु भिद्यत इत्यन्यत्रोत्सर्गसिद्धस्यैकार्थबोधकत्वैकाहुतिकरणत्वपर्य्याप्त्यधिकरणतयोः सामानाधिक-
रण्यस्यापवाद इति न कोऽपि दोषः॥ श्लोकाश्चतुर्थेऽध्याये तु षट्त्रिंशत्परमेश्वरि!। अथ मन्त्रद्वयेनैव चत्वारिंशद्-
द्वियुक् पुनः ॥ देवानां देव्याश्चैकैकोक्तिः ऋषिवाक्यत्रयं द्वावर्द्धश्लोकौ पञ्चत्रिंशच्छ्लोकमन्त्रा इति द्विचत्वारिंश-
न्मन्त्रा इत्यर्थः॥ एवं मध्यचरित्रस्य पञ्चाशच्च शतोत्तरम्। तथा पञ्चयुतं मन्त्रा महालक्ष्म्याविमेदतः॥ महालक्ष्मी

इति द्वितीयचरित्रदेवतोक्तिः। एवमुत्तरत्र सरस्वत्यादिदेवतानामध्यायभेदेन तत्र तत्र कथनात् पूर्वाध्याये महाकाल्येव परिशेषाद् देवता, द्वादशत्रयोदशाध्याययोरिह तन्त्रे देवताया अकथनाच्चामुण्डैव सामान्यप्राप्ता देवता चण्डिका वा, तृतीयचरित्रत्वाविशेषात् महासरस्वत्येव वा देवतेति ध्येयम्। इति श्रीगुप्तवत्यां कात्यायनीतन्त्रस्यैक-विंशपटलस्य व्याख्या। अथ एतत्संग्रहश्लोकाः सप्त। ऋषिवागष्टषष्ठिः स्युः श्लोका देवासुरादयः। एवं द्वितीयकेऽध्याये मन्त्रा एकोनसप्ततिः॥ ऋषिर्निहन्यमानाद्याः पञ्चत्रिंशत् तु मन्त्रकाः। देव्युक्तिर्गर्जगर्जेति श्लोक एव ऋषेर्वचः॥ पञ्चश्लोका इति चतुश्चत्वारिंशत् तृतीयके। ऋषिः शक्रादयः श्लोकाः षड्विंशतिरथर्षिवाक्॥ श्लोकद्वयमथो देवी श्लोकार्द्धं व्रियतामिति। देवा ऊचुस्त्रयः श्लोका भगवत्याकृता-दिकाः॥ हृदयेऽस्मत् प्रपन्नात्वम् इत्यर्द्धश्लोकको मनुः, ऋषेर्वचश्चतुश्श्लोकीत्यध्याये तु चतुर्थके॥ मन्त्राद्विचत्वा-रिंशत्युरध्यायवितयात्मनः। मध्यमस्य चरित्रस्य पञ्चपञ्चाशदुत्तराः, शतं मन्त्रास्तेषु देव्या वचसी द्वे ऋषेस्तु षट्। देवानामेकमर्द्धं द्वे अन्ये श्लोका इति स्थितिः॥ २५॥

अथ मन्त्रव्याख्या। विप्रचित्तेर्दैत्यस्य पुत्री माहिष्मतीनाम्नी सिन्धुद्वीपाख्यमृषिं तपस्यन्तं महिषीवेषेणाभीषयत् ततस्तेन महिष्येव भवेति शप्तासती तस्यैवर्षेः शुक्रं दैत्यकन्यादर्शनेन स्कन्नं पीत्वा महिषासुराख्यं दैत्यं

(ओं नमश्चण्डिकायै। ओं मध्यमचरित्रस्य विष्णुर्ऋषिः महालक्ष्मीर्देवता उष्णिक्छन्दः शाकम्भरीशक्तिः दुर्गाबीजं वायुस्तत्त्वं महालक्ष्मी प्रीत्यर्थे जपे विनियोगः)।

ऋषिरुवाच। देवासुरमभूद्युद्धं पूर्णमब्दशतं पुरा। महिषेऽसुराणामधिपे देवानाञ्च पुरन्दरे ॥ १ ॥ तत्रासुरैर्महावीर्य्यैर्देवसैन्यं पराजितम्। जित्वा च सकलान् देवानिन्द्रोभून्महिषासुरः ॥ २ ॥ ततः पराजिता देवाः पद्मयोनिं प्रजापतिम्। पुरस्कृत्यगतास्तत्र यत्रेशगरुड़ध्वजौ ॥ ३ ॥ यथावृत्तं तयोस्तद्वन्महिषासुरचेष्टितम्। त्रिदशाः कथयामासुर्देवाभिभवविस्तरम् ॥ ४ ॥

प्रासूतेति कथा वराहपुराणे देवीभागवते च विस्तरेण वर्णिता तत एवावगन्तव्या। 'देवाऽसुरं' तदुभय समाहाररूपम् ॥ १ ॥ २ ॥ ३ ॥ ४ ॥

५ ॥ ६ ॥ एतद इति। बहुवचनं हरिहरौ सशक्तिकौ लक्ष्यीकृत्य ॥७॥ 'भ्रुकुटी' भ्रुवोः कौटिल्यं तेन कुटिले आनने ययोस्तौ ॥ ८ ॥ मदीया शक्तिलेशा ये तत्तद्देवशरीरगा इति लक्ष्मीतन्त्रादिवचनाद्देवेष्वायुधेषु च

सूर्य्येन्द्राग्न्यनिलेन्दूनां यमस्य वरुणस्य च। अन्येषां चाधिकारान् स स्वयमेवाधितिष्ठति ॥५॥ स्वर्गान् निराकृताः सर्वे तेन देवगणा भुवि। विचरन्ति यथा मर्त्या महिषेण दुरात्मना ॥ ६ ॥ एतद्वः कथितं सर्वममरारिविचेष्टितम्। शरणञ्च प्रपन्नास्मो वधस्तस्य विचिन्त्यताम् ॥ ७ ॥ इत्थं निशम्य देवानां वचांसि मधुसूदनः। चकार कोपं शम्भुश्च भ्रुकुटीकुटिलाननौ ॥ ८ ॥ ततोऽतिकोपपूर्णस्य चक्रिणो वदनात्ततः। निश्चक्राम महत्तेजो ब्रह्मणः शङ्करस्य च ॥ ९ ॥ अन्येषाञ्चैव देवानां शक्रादीनां शरीरतः। निर्गतं सुमहत्तेजस्तच्चैक्यं समगच्छत ॥ १० ॥

विद्यमानः शक्तिभागः सर्वोऽप्येकीभूयाष्टादशभुजात्मकं नारीशक्तिरूपेण परिणतोऽभूदित्याह ततोऽतिकोपेत्यादिना ॥ ९ ॥ १० ॥

११ ॥ १२ ॥ १३ ॥ सौम्येनेति। सौम्यशब्दादण् सोमशब्दाच्छान्दसो वा व्यण्। जङ्घोरू इति

स.टी.
४०

अतीवतेजसः कूटं ज्वलन्तमिव पर्वतम्। ददृशुस्ते सुरास्तत्र ज्वालाव्याप्त-दिगन्तरम्॥ ११॥ अतुलं तत्र तत्तेजः सर्वदेवशरीरजम्। एकस्थं तदभून्नारी व्याप्तलोकत्रयं त्विषा॥ १२॥ यदभूच्छाम्भवं तेजस्तेनाजायत तन्मुखम्। याम्येन चाभवन् केशा वाहवो विष्णुतेजसा॥१३॥ सौम्येन स्तनयोर्युग्मं मध्यमैन्द्रेण चाभवत्। वारुणेन च जङ्घोरू नितम्बस्तेजसा भुवः॥ १४॥ ब्रह्मणस्तेजसा पादौ तदङ्गुल्योऽर्कतेजसा। वसूनां च कराङ्गुल्यः कौबेरेण च नासिका॥१५॥ तस्यास्तु दन्ताः सम्भूताः प्राजापत्येन तेजसा। नयनत्रितयं जज्ञे तथा पावकतेजसा॥ १६॥

भिन्ने पदे। नितम्बः कटिपश्चाद्भागः ॥ १४ ॥ १५ ॥ प्राजापत्येन दक्षप्रजापतिसंबन्धिना ॥ १६ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सन्ध्ययोः सायं प्रातस्त्रैवर्णिकवन्दनीयदेवतयोः तेजः कर्त्तृ, युगलभ्रुवौ जज्ञे भ्रूयुगात्मना परिणतं तेजसां सम्भवः एकशरीरात्मना परिणामएवशिवा ॥ १७ ॥ १८ ॥ शूलं शूलादित्यतः प्राक् ततो देवाददुस्तस्यै स्वानिस्वान्यायुधानि चेत्यर्द्धमधिकं क्वचित्पठ्यते इदमर्द्धमेव स्वीकृत्य कबन्धा युयुधुर्देव्या इत्यर्द्धमुत्तरश्लोकेन

भ्रुवौ च सन्ध्ययोस्तेजः श्रवणावनिलस्य च। अन्येषाञ्चैव देवानां सम्भव-
स्तेजसां शिवा ॥ १७ ॥ ततः समस्तदेवानां तेजोराशिसमुद्भवाम्। तां विलोक्य
मुदं प्रापुरमरामहिषार्दिताः ॥ १८ ॥ शूलं शूलाद्विनिष्कृष्य ददौ तस्यै पिनाक-
धृक्। चक्रं च दत्तवान् कृष्णः समुत्पाद्य स्वचक्रतः ॥ १९ ॥ शङ्खञ्च वरुणः
शक्तिं ददौ तस्यै हुताशनः। मारुतो दत्तवांश्चापंबाणपूर्णे तथेषुधी ॥ २० ॥

पुनरुक्तं कैश्चिदपठ्यमानं परित्यज्याध्यायपाठे (तु) शेषस्य सर्वनागेश इत्यादिश्लोकेषु मन्त्रत्व सामञ्जस्यं संपद्यत इति द्रष्टव्यम्। चक्रञ्चेति चकाराद्गदामपि वैकृतिकरहस्ये गदयैव सहाष्टादशायुधसंख्यापूर्त्ति स्मरणात् ॥१९॥ इषुधी तूणीरौ ॥ २० ॥

For Private and Personal Use Only

वज्रमिन्द्रः समुत्पाद्य कुलिशादमराधिपः। ददौ तस्यै सहस्राक्षो घण्टामैरा-
वताद्गजात्॥ २१॥ कालदण्डाद्यमो दण्डं पाशं चाम्बुपतिर्ददौ। प्रजापति-
श्चाक्षमालां ददौ ब्रह्मा कमण्डलुम्॥ २२॥ समस्तरोमकूपेषु निजरश्मीन्
दिवाकरः। कालश्च दत्तवान् खड्गं तस्याश्चर्म्म च निर्मलम्॥ २३॥
क्षीरोदश्चामलं हारमजरे च तथाम्बरे। चूडामणिं तथा दिव्यं कुण्डले कटकानि
च॥ २४॥ अर्द्धचन्द्रं तथा शुभ्रं केयूरान् सर्वबाहुषु। नूपुरौ विमलौ तद्वद्
ग्रैवेयकमनुत्तमम्॥ २५॥ अङ्गुलीयकरत्नानि समस्तास्वङ्गुलीषु च। विश्वकर्म्मा
ददौ तस्यै परशुं चातिनिर्मलम्॥ २६॥ अस्त्राण्यनेकरूपाणि तथाऽभेद्यञ्च दंश-
नम्। अम्लानपङ्कजां मालां शिरस्युरसि चापराम्॥ २७॥ अददज्जलधिस्तस्यै
पङ्कजं चातिशोभनम्। हिमवान् वाहनं सिंहं रत्नानि विविधानि च॥ २८॥

॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ अभेद्यं दंशनं कवचम् ॥ २७ ॥ २८ ॥

ददावशून्यं सुरया पानपात्रं धनाधिपः। शेषश्च सर्वनागेशो महामणिविभूषितम् ॥ २९ ॥ नागहारं ददौ तस्यै धत्ते यः पृथिवीमिमाम्। अन्यैरपि सुरैर्देवी भूषणैरायुधैस्तथा ॥ ३० ॥ सम्मानिता ननादोच्चैः साट्टहासं मुहुर्मुहुः। तस्या नादेन घोरेण कृत्स्नमापूरितं नभः ॥ ३१ ॥ अमायतातिमहता प्रतिशब्दो महानभूत्। चुक्षुभुः सकला लोकाः समुद्राश्च चकम्पिरे ॥ ३२ ॥ चचाल वसुधा चेलुः सकलाश्च महीधराः। जयेति देवाश्च तदा तामूचुः सिंहवाहिनीम् ॥ ३३ ॥ तुष्टुवुर्मुनयश्चैनां भक्तिनम्रात्ममूर्त्तयः। दृष्ट्वा समस्तं संक्षुब्धं त्रैलोक्यममरारयः ॥ ३४ ॥ सन्नद्धाखिलसैन्यास्ते समुत्तस्थुरुदायुधाः। आः किमेतदिति क्रोधादाभाष्यमहिषासुरः ॥ ३५ ॥

२९ ॥ ३० ॥ ३१ ॥ अमायता अपर्य्याप्ताधिकरणकरणकेन ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥

२६ ॥ २७ ॥ समन्ताद्व्याप्यसंस्थितामित्यस्योत्तरमष्टाशीति सहस्रेण सखीभिः परिवारितामित्यर्द्ध-

अभ्यधावत तं शब्दमशेषैरसुरैर्वृतः। स ददर्श ततो देवीं व्याप्तलोकत्रयां

स.टी. त्विषा ॥३६॥ पादाक्रान्त्या नतभुवं किरीटोल्लिखिताम्बराम्। चोभिताशेषपातालां

४२ धनुर्ज्यानिःस्वनेन ताम् ॥३७॥ दिशो भुजसहस्रेण समन्ताद् व्याप्य संस्थिताम्।

ततः प्रववृते युद्धं तया देव्यासुरद्विषाम् ॥ ३८ ॥ शस्त्रास्त्रैर्बहुधा मुक्तैरादीपित-

दिगन्तरम्। महिषासुरसेनानीश्चिक्षुराख्यो महासुरः ॥ ३९ ॥ युयुधे चामरश्चान्यै-

श्चतुरङ्गबलान्वितः। रथानामयुतैः षड्भिरुदग्राख्यो महासुरः ॥ ४० ॥ अयुध्यता-

युतानाञ्च सहस्रेण महाहनुः। पञ्चाशद्भिश्च नियुतैरसिलोमा महासुरः ॥ ४१ ॥

अयुतानां शतैः षड्भिर्वाष्कलो युयुधे रणे। गजवाजिसहस्रौघैरनेकैः परि-

वारितः ॥ ४२ ॥

मधिकम् ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥

एवङ्गजवाजिसहस्रौघैरनेकैरुग्रदर्शनः उग्र अत्युग्रवीर्य्यश्च त्रिनेत्रश्च महाबल इति चरणत्रयमधिकम् ॥ ४२ ॥ अयुतं दशसहस्राणि नियुतं दशलक्षाणि विड़ालाक्ष इति पाठ एव मुख्यः, वामनादिपुराणेषु दुर्द्धरो दुर्मुखश्चैव विड़ालनयनस्तथेत्यादिदर्शनात् आख्येतिपाठे नामैकदेशपरतया व्याख्येयः एवं विड़ालस्या-

वृतो रथानां कोट्या च युद्धे तस्मिन्नयुध्यत । विड़ालाख्योऽयुतानाञ्च पञ्चाशद्भिरथा-युतैः ॥ ४३ ॥ युयुधे संयुगे तत्र रथानां परिवारितः । अन्ये च तत्रायुतशो रथनागहयैर्वृताः ॥ ४४ ॥ युयुधुः संयुगे देव्या सह तत्र महासुराः । कोटिकोटि-सहस्रैस्तु रथानां दन्तिनां तथा ॥ ४५ ॥ हयानाञ्च वृतो युद्धे तत्राभून्महिषासुरः । तोमरैर्भिन्दिपालैश्च शक्तिभिर्मुसलैस्तथा ॥ ४६ ॥ युयुधुः संयुगे देव्या खड्गैः परशु-पट्टिशैः । केचिच्च चिक्षिपुः शक्तीः केचित्पाशांस्तथा परे ॥ ४७ ॥

सिना कायादिलुत्तराध्यायप्रयोगोऽपि । अयुतानां पञ्चाशदयुतानि शतकोटिपञ्चकेनेति यावत् ॥ ४४ ॥ कोटिकोटिसहस्रं परार्द्धमेव तत् संख्याकैरप्यनेकैरथादिभिः प्रत्येकं युक्तो महिषासुरः ॥ ४५ ॥ ४६ ॥ ४७ ॥

४८ ॥ अनायस्तम् आयासजन्यविकारमप्राप्तमाननं यस्याः ॥ ४९ ॥ धुताः कम्पिताः सटाः केसराणि

देवीं खड्गप्रहारैस्तु ते तां हन्तुं प्रचक्रमुः। सापि देवी ततस्तानि शस्त्राण्यस्त्राणि
स.टी. चण्डिका ॥४८॥ लीलयैव प्रचिच्छेद निजशस्त्रास्त्रवर्षिणी। अनायस्तानना देवी
४१ स्तूयमाना सुरर्षिभिः ॥ ४९ ॥ मुमोचासुरदेहेषु शस्त्राण्यस्त्राणि चेश्वरी। सोऽपि
क्रुद्धो धुतसटो देव्या वाहनकेसरी ॥ ५० ॥ चचारासुरसैन्येषु वनेष्विव हुताशनः।
निःश्वासान् मुमुचे यांश्च युध्यमाना रणेऽम्बिका ॥ ५१ ॥ त एव सद्यः सम्भूता
गणाः शतसहस्रशः। युयुधुस्ते परशुभिर्भिन्दिपालासिपट्टिशैः ॥ ५२ ॥ नाशयन्तो-
ऽसुरगणान् देवीशक्त्युपबृंहिताः। अवादयन्त पटहान् गणाः शङ्खांस्तथापरे ॥५३॥
मृदङ्गांश्च तथैवान्ये तस्मिन् युद्धमहोत्सवे। ततो देवी त्रिशूलेन गदया शक्ति-
वृष्टिभिः ॥ ५४ ॥

ग्रीवायस्येति यावत् ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥

॥ ५५ ॥ ५६ ॥ विपोथिताः आघातेनाधःपातिताः शेरते दीर्घनिद्रया वेमुरित्यादिच्छांदसशब्दनिर्णयो वैय्या-

खड्गादिभिश्च शतशो निजघान महासुरान्। पातयामास चैवान्यान् घण्टास्वन-विमोहितान् ॥ ५५ ॥ असुरान् भुविपाशेन बद्ध्वा चान्यानकर्षयत्। केचिद्द्विधा-कृतास्तीक्ष्णैः खड्गपातैस्तथापरे ॥ ५६ ॥ विपोथिता निपातेन गदया भुवि शेरते। वेमुश्च केचिद्रुधिरं मुसलेन भृशं हताः ॥५७॥ केचिन्निपतिताभूमौ भिन्नाः शूलेन वक्षसि। निरन्तराः शरौघेण कृताः केचिद्रणाजिरे॥ ५८॥ सेनानुकारिणः प्राणान् मुमुचुस्त्रिदशार्दनाः। केषाञ्चिद्बाहवश्छिन्नाः छिन्नग्रीवास्तथापरे ॥ ५९ ॥ शिरांसि पेतुरन्येषामन्ये मध्ये विदारिताः। विच्छिन्नजङ्घास्त्वपरे पेतुरुर्व्यां महा-सुराः ॥ ६० ॥

करणशान्तनवादिटीकातोऽवसेयः ॥ ५७ ॥ ५८ ॥ सेनामनुपश्चाद्भागे कुर्वन्ति ते सेनानुकारिणोऽग्रेसरा इति यावत् ॥ ५९ ॥ ६० ॥

६१ ॥ तूर्य्याणां लयं कालक्रियामानतालविरामसाम्यमाश्रिताः ॥ ६२ ॥ कबन्धाः निःशिरस्कदेहाः वीरा-

स.टी. एकबाहुच्छिन्नचरणाः केचिद्देव्या द्विधाकृताः। छिन्नेऽपि चान्ये सिरसि पतिताः

४४ पुनरुत्थिताः ॥ ६१ ॥ कबन्धा युयुधुर्देव्या गृहीतपरमायुधाः। ननृतुश्चापरे

तत्र युद्धे तूर्य्यलयाश्रिताः ॥ ६२ ॥ कबन्धाश्छिन्नशिरसः खड्गशक्त्यृष्टिपाणयः।

तिष्ठ तिष्ठेति भाषन्तो देवीमन्ये महासुराः ॥६३॥ पातितैरथ नागाश्वैरसुरैश्च वसु-

न्धरा। अगम्या साऽभवत्तत्र यत्राभूत् स महारणः ॥६४॥ शोणितौघा महानद्यः

सद्यस्तत्र प्रसुस्रुवुः। मध्ये चासुरसैन्यस्य वारणासुरवाजिनाम् ॥ ६५ ॥ क्षणेन

तन्महासैन्यमसुराणां तथाम्बिका। निन्ये क्षयं यथा वह्निस्तृणदारुमहाचयम् ६६

वेगेन क्षतान्तराणामिव शिरश्छेदस्याप्यभावेनोभयत्र व्यासज्यवृत्तिजीवनसत्वात्पतितेन मुखेन भाषणं चलता कबन्धेन प्रहारश्चाभवदित्याशयः ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥

सूनिव विचिन्वति प्राणानिव विचिनोति ॥ ६७ ॥ देव्या गणैः कर्त्तृभिरसुरैः सह तथा युद्धं कृतं यथा देवास्तुष्टुवुः ॥ ६८ ॥ अथ पूर्वाध्यायान्त्यश्लोकान्तमृष्युक्तेरनुवृत्तिसत्त्वेऽपि पुनरेतदध्यायारम्भे ऋषिरुवाचेति कथनमध्यायसमाप्तिबोधकवाक्यस्य सूताद्युक्तिरूपस्य व्यवधायकतया तस्या उत्तरत्राऽननुवृत्त्यभिप्रायेण, अतएव यामलादितन्त्रे समाप्तिवाक्यस्यापि स्वातन्त्र्येण मन्त्रान्तरत्वकथनमुपपद्यते । ततस्त्रिदशाः कथयामासुरित्यनेनैव गतार्थत्वात् सूर्य्येन्द्राग्न्यनिलेन्दूनामिति श्लोकत्रयारम्भे देवा ऊचुरित्यनपेक्षितत्वादेव नास्ति,

स च सिंहो महानादमुत्सृजन् धुतकेसरः । शरीरेभ्योऽमरारीणामसूनिव विचिन्वति ॥ ६७ ॥ देव्या गणैश्च तैस्तत्र कृतं युद्धं तथासुरैः । यथैषां तुष्टुवुर्देवाः पुष्पवृष्टिमुचो दिवि ॥ ६८ ॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवी० महिषासुरसैन्यवधो नाम द्वितीयोऽध्यायः ॥ २ ॥

तदुत्तरमृषिरुवाचेत्यपेक्षितमपि नैतत्तन्त्रसम्मतमिति मण्डूकप्लुत्यैवाध्यायारम्भस्थस्यासमाप्त्यनुकर्षः, तन्त्रान्तरे तु सप्तश्लोकोत्तरम् ऋषिरिति पठ्यत एव, एवमष्टमे भक्ष्यमाणास्त्वया चोग्रा इत्यर्द्धोत्तरं दशमे श्लोकत्रयोत्तरं चापेक्षितस्य तन्त्रान्तरे सतोऽप्यृषिमन्त्रस्य प्रकृततन्त्रेऽभावादियमेव तत्र गतिरिति दिक् । इति गुप्तवत्यां मन्त्रव्याख्याने द्वितीयः ॥ २ ॥

ऋषिरुवाच । निहन्यमानं तत् सैन्यमवलोक्य महासुरः । सेनानीश्चिक्षुरः कोपा-
द्ययौ योद्धुमथाम्बिकाम् ॥ १ ॥ सदेवीं शरवर्षेण ववर्ष समरेऽसुरः। यथा मेरुगिरेः
स.टी. शृङ्गं तोयवर्षेण तोयदः ॥ २ ॥ तस्य छित्वा ततो देवी लीलयैव शरोत्करान् ।
४५ जघान तुरगान् बाणैर्यन्तारञ्चैव वाजिनाम् ॥ ३ ॥ चिच्छेद च धनुः सद्यो ध्वजं
चातिसमुच्छ्रितम् । विव्याध चैव गात्रेषु छिन्नधन्वानमाशुगैः ॥ ४ ॥ स छिन्नधन्वा-
विरथो हताश्वो हतसारथिः । अभ्यधावत तां देवीं खड्गचर्मधरोऽसुरः ॥ ५ ॥
सिंहमाहत्य खड्गेन तीक्ष्णधारेण मूर्द्धनि । आजघान भुजे सव्ये देवीमप्यतिवेग-
वान् ॥ ६ ॥ तस्याः खड्गो भुजं प्राप्य पफाल नृपनन्दन ! । ततो जग्राह शूलं स
कोपादरुणलोचनः ॥ ७ ॥ चिक्षेप च ततस्तत्तु भद्रकाल्यां महासुरः । जाज्वल्य-
मानं तेजोभीरविविम्बमिवाम्बरात् ॥ ८ ॥

निहन्यमानमिति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ सव्ये वामे ॥ ६ ॥ पफाल विशीर्णः ॥ ७ ॥ ८ ॥

तेन देवीमुक्तेन प्रतिशूलेन स चिक्षुरस्य शतधानीत इति लिङ्गविपरिणामेनान्वयः ॥ ९ ॥ १० ॥ ११ ॥

दृष्ट्वा तदापतच्छूलं देवीशूलममुञ्चत। तच्छूलं शतधा तेन नीतं स च महासुरः ९
हते तस्मिन् महावीर्ये महिषस्य चमूपतौ। आजगाम गजारूढश्चामरस्त्रिदशार्दनः ॥ १० ॥ सोऽपि शक्तिं मुमोचाथ देव्यास्तामम्बिकाद्रुतम्। हुङ्काराभिहतां भूमौ पातयामास निष्प्रभाम् ॥ ११ ॥ भग्नां शक्तिं निपतितां दृष्ट्वा क्रोधसमन्वितः। चिक्षेप चामरः शूलं बाणैस्तदपि साच्छिनत् ॥ १२ ॥ ततः सिंहः समुत्पत्य गजकुम्भान्तरस्थितः। बाहुयुद्धेन युयुधे तेनोच्चैस्त्रिदशारिणा ॥ १३ ॥ युद्ध्यमानौ ततस्तौ तु तस्मान्नागान् महीं गतौ। युयुधातेऽतिसंरब्धौ प्रहारै रतिदारुणैः ॥ १४ ॥ ततो वेगात् खमुत्पत्य निपत्य च मृगारिणा। करप्रहारेण शिरश्चामरस्य पृथक् कृतम् ॥ १५ ॥

१२ ॥ १३ ॥ युयुधाते इति प्रकृतिवद्भावश्छान्दसः ॥ १४ ॥ १५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उदग्रस्वरणे देव्याः शिलावृक्षादिभिर्हतः। दन्तमुष्टितलैश्चैव करालश्च निपातितः ॥ १६ ॥ देवी क्रुद्धा गदापातैश्चूर्णयामास चोद्धतम्। वाष्कलं भिन्दिपालेन बाणैस्ताम्रं तथान्धकम् ॥ १७ ॥ उग्रास्यमुग्रवीर्य्यञ्च तथैव च महाहनुम्। त्रिनेत्रा च त्रिशूलेन जघान परमेश्वरी ॥ १८ ॥ विड़ालस्यासिना कायात्पातयामास वै शिरः। दुर्धरं दुर्मुखं चोभौ शरैर्निन्ये यमक्षयम् ॥ १९ ॥ एवं संक्षीयमाणे तु स्वसैन्ये महिषासुरः। माहिषेण स्वरूपेण त्रासयामास तान् गणान् ॥२०॥ कांश्चितुण्डप्रहारेण खुरक्षेपैस्तथापरान्। लाङ्गूलताड़ितांश्चान्यान् शृङ्गाभ्याञ्च विदारितान् ॥२१॥ वेगेन कांश्चिदपरान्नादेन भ्रमणेन च। निःश्वासपवनेनान्यान् पातयामासभूतले ॥ २२ ॥ निपात्य प्रमथानीकमभ्यधावत सोऽसुरः। सिंहं हन्तुं महादेव्याः कोपञ्चक्रे ततोऽम्बिका ॥ २३ ॥

मुष्टिभिस्तलैश्चपेटाभिश्च ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥

For Private and Personal Use Only

सोऽपि कोपान् महावीर्य्यः खुरक्षुण्णमहीतलः। शृङ्गाभ्यां पर्वतानुच्चांश्चिक्षेप च ननाद च ॥ २४ ॥ वेगभ्रमणविक्षुण्णा मही तस्य व्यशीर्य्यत। लाङ्गूलेनाहतश्चाब्धिः प्लावयामास सर्वतः॥ २५ ॥ धुतशृङ्गविभिन्नाश्च खण्डं खण्डं ययुर्घनाः। श्वासानिलास्ताः शतशो निपेतुर्नभसोऽचलाः॥ २६ ॥ इति क्रोधसमाध्मातमापतन्तं महासुरम्। दृष्ट्वा सा चण्डिका कोपं तद्बधाय तदाऽकरोत्॥ २७ ॥ सा क्षिप्त्वा तस्य वै पाशं तं बबन्ध महासुरम्। तत्याज माहिषं रूपं सोऽपि बद्धो महामृधे॥ २८ ॥ ततः सिंहो भवत्सद्यो यावत्तस्याम्बिका शिरः। छिनत्ति तावत् पुरुषः खड्गपाणिरदृश्यत॥ २९ ॥ तत एवाशु पुरुषं देवी चिच्छेद सायकैः। तं खड्गचर्म्मणा सार्द्धं ततः सोऽभून्महागजः॥ ३० ॥ करेण च महासिंहं तं चकर्ष जगर्ज च। कर्षतस्तु करं देवी खड्गेन निरकृन्तत॥ ३१ ॥

२४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥

३२ ॥ ततः क्रुद्धेति तुरीयापि चण्डिका प्रधानहननरूपं ज्ञात्वापि रजोगुणाविर्भावाधिक्येन स्वस्यां महालक्ष्मीत्वमापादितवतीति ध्वननाय मध्ये पानमाह, अतएवारुणलोचनत्वं मुखरागादिश्च युज्यते लक्ष्म्याः

ततो महासुरो भूयो माहिषं वपुरास्थितः। तथैव क्षोभयामास त्रैलोक्यं सचराचरम् ॥ ३२ ॥ ततः क्रुद्धा जगन्माता चण्डिका पानमुत्तमम्। पपौ पुनः पुनश्चैव जहासारुणलोचना ॥ ३३ ॥ ननर्द चासुरः सोऽपि बलवीर्य्यमदोद्धतः। विषाणाभ्याञ्च चिक्षेप चण्डिकां प्रति भूधरान् ॥ ३४ ॥ सा च तान् प्रहितांस्तेन चूर्णयन्ती शरोत्करैः। उवाच तं मदोद्धूतमुखरागाकुलाक्षरम् ॥ ३५ ॥ श्रीदेव्युवाच। गर्ज गर्ज क्षणं मूढ़! मधु यावत्पिबाम्यहम्। मया त्वयि हतेऽत्रैव गर्जिष्यन्त्याशु देवताः ॥ ३६ ॥

सुरायाश्च मादकत्वेन साम्यात् 'महत्यै वा एतद्देवतायै रूपं यन्मध्विति' श्रुतेश्च ॥ ३३ ॥ ३४ ॥ मदेन सुराजन्येन उद्धतः अतिशयितो मुखस्य रागो रक्तिमा आकुलान्यस्पष्टाक्षराणि च यस्मिन् कर्म्मणि तत् ॥ ३५ ॥ मधु यावत् पिबामि लक्ष्म्यावेशविशिष्टा यावद्भवामि, मया लक्ष्म्या इन्दिरालोकमातामेति कोशात् ॥ ३६ ॥

३७ ॥ ३८ ॥ तया देव्या या मधुपानेन परिचिता राजसी लक्ष्मीस्तया निपातित इत्यर्थः। शिरश्छेदोत्तरमपि

ऋषिरुवाच। एवमुक्त्वा समुत्पत्य सारूढा तं महासुरम्। पादेनाक्रम्य कण्ठे च शूलेनैनमताड़यत् ॥ ३७ ॥ ततः सोऽपि पदाक्रान्तस्तया निजमुखात्ततः। अर्द्ध-निष्क्रान्त एवाति देव्या वीर्य्येण संवृतः ॥ ३८ ॥ अर्द्धनिष्क्रान्त एवासौ युध्यमानो महासुरः। तया महासिना देव्या शिरश्छित्वा निपातितः ॥ ३९ ॥ ततो हाहा-कृतं सर्वं दैत्यसैन्यं ननाश तत्। प्रहर्षञ्च परं जग्मुः सकला देवतागणाः ॥ ४० ॥ तुष्टुवुस्तां सुरा देवीं सह दिव्यैर्महर्षिभिः। जगुर्गन्धर्वपतयो ननृतुश्चाप्सरोगणाः ॥ ४१ ॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये महिषासुरवधो नाम तृतीयोऽध्यायः ॥ ३ ॥

युद्धशेषः पुराणान्तरेषु द्रष्टव्यः ॥ ३९ ॥ ननाश पलायितम् ॥ ४० ॥ अत्र ऋषिद्वयं यथा स्थानमपेक्षितमेव देव्युक्तिरनपेक्षितैवास्तीति दिक् ॥ ४१ ॥ इति श्रीगुप्तवत्यां तृतीयोऽध्यायः ॥ ३ ॥

शक्रादय इति महर्षीणामुपलक्षणं उभयेषामर्थे तद्द्रष्टृत्वात् महिषान्तकरीसूक्तं दृष्टं देवैर्महर्षिभिरिति

स.टी. ४८

ऋषिरुवाच। शक्रादयः सुरगणा निहतेऽतिवीर्य्ये तस्मिन् दुरात्मनि सुरारिबले च देव्या। तां तुष्टुवुः प्रणतिनम्रशिरोधरांसा वाग्भिः प्रहर्षपुलकोद्गमचारुदेहाः॥ १ ॥ देव्या यया ततमिदं जगदात्मशक्त्या निःशेषदेवगणशक्तिसमूहमूर्त्या। तामम्बिकामखिलदेवमहर्षिपूज्यां भक्त्या नताः स्म विदधातु शुभानि सा नः॥ २ ॥ यस्याः प्रभावमतुलं भगवाननन्तो ब्रह्मा हरश्च न हि वक्तुमलं बलञ्च सा चण्डिकाऽखिल जगत्परिपालनाय नाशाय चाशुभभयस्य मतिं करोतु ॥ ३ ॥

तन्त्रान्तरात्। 'तस्मिन्' महिषासुरे, तां महालक्ष्मीं प्रणतिभिर्नम्राः शिरोधरा ग्रीवा अंसौ च येषां ते, पुलकोद्गमेन रोमाञ्चाविर्भावेन चारवः कण्टकिता इव देहा येषाम् ॥ १ ॥ २ ॥ ३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

'कृतधियां' पण्डितेषूत्तमानां विद्वत्सुकृतबुद्धय इति भारतात्। 'कुलजनप्रभवस्य' महाकुलोत्पन्नकुल-वधूसमूहस्य, स्येति विसर्गलोपोऽव्ययं वा ॥४॥ किं वर्णयाम तव रूपवीर्य्यचरितानि वाचामगोचरा इत्यर्थः॥५॥

या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः पापात्मनां कृतधियां हृदयेषु बुद्धिः।
श्रद्धा सतां कुलजनप्रभवस्य लज्जा तां त्वां नताः स्म परिपालय देवि! विश्वम् ॥४॥
किं वर्णयाम तव रूपमचिन्त्यमेतत् किञ्चातिवीर्य्यमसुरक्षयकारि भूरि। किं चाहवेषु चरितानि तवाद्भुतानि सर्वेषु देव्यसुरदेवगणादिकेषु ॥ ५ ॥ हेतुः समस्तजगतां त्रिगुणापि दोषैर्न ज्ञायसे हरिहरादिभिरप्यपारा। सर्वाश्रयाखिल-मिदं जगदंशभूतमव्याकृता हि परमा प्रकृतिस्त्वमाद्या ॥ ६ ॥

दोषैः बुद्धिमान्द्यादिभिः। अंशभूतं तवेति शेषः पादोऽस्य विश्वाभूतानीति श्रुतेः, अव्याकृता नामरूप-व्याक्रियातः पौर्वकालिका अतएवाद्या ॥ ६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सुरता देवता देवात्तलिति देवशब्दोऽर्थपरः यद्वा सुरसमूहः सौमापौष्णं त्रैतमालभेतेति वाक्ये त्रयाणां यमलानां समूहस्त्रिता तत्र भवस्त्रेत इत्यत्रेव प्रकृतेऽपि निर्वाहाय गजसहाभ्यां चेति वार्त्तिके चकारा-

यस्याः समस्तसुरता समुदीरणेन तृप्तिं प्रयाति सकलेषु मखेषु देवि ! । स्वाहासि वै पितृगणस्य च तृप्तिहेतुरुच्चार्य्यसे त्वमतएव जनैः स्वधा च ॥ ७ ॥ या मुक्ति-हेतुरविचिन्त्यमहाव्रता त्वमभ्यस्यसे सुनियतेन्द्रियतत्वसारैः । मोक्षार्थिभिर्मुनिभि-रस्तसमस्तदोषैर्विद्यासि सा भगवती परमा हि देवि ! ॥ ८ ॥

दन्यत्रापीति सुव्याख्यत्वात्, समस्तसुरशक्तिरूपात्वमित्यन्वयो वा, तृप्तिं प्रयाति देवगण इति शेषः ॥ ७ ॥ अस्तसमस्तदोषैः 'ऋतम्भरा तत्र प्रज्ञा' (१।४९) इति योगसूत्रोक्ताऽसत्वविषयकत्वादिदोषविरहितबुद्धिभिः । परमा विद्यासि निर्विकल्पकवृत्तिरूपात्वमेवासि ॥ ८ ॥

For Private and Personal Use Only

शब्दात्मिका नादब्रह्म, ऋग्यजुषामिति समासान्तोऽज्नेह अनित्यत्वात्, उद्गीथः पञ्चभक्तिकस्य साम्नो द्वितीया भक्तिरुत्तमत्वात् सैकैव निर्दिष्टा, रम्यपदपाठो देवतापदस्तोभैः कालपूरणं, भवभावनाय उत्पत्तिकृत्यार्थं, वार्त्ता जीवनस्थितिकृत्यम्, आर्त्तिहन्त्री अनुग्रहकृत्यवती तेन पञ्चकृत्यपरायणेति यावत् ॥ ९ ॥

शब्दात्मिका सुविमलर्ग्यजुषां निधानमुद्गीथरम्यपदपाठवतां च साम्नाम्। देवीत्रयी भगवती भवभावनाय वार्त्तासि सर्वजगतां परमार्त्तिहन्त्री ॥ ९ ॥ मेधासि देवि ! विदिताखिलशास्त्रसारा दुर्गासि दुर्गभवसागरनौरसङ्गा। श्रीःकैटभारिहृदयैककृताधिवासा गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा ॥ १० ॥ ईषत्सहासममलं परिपूर्णचन्द्रबिम्बानुकारिकनकोत्तमकान्तिकान्तम्। अत्यद्भुतं प्रहृतमात्तरुषा तथापि वक्त्रं विलोक्य सहसा महिषासुरेण ॥ ११ ॥

नौरसङ्गा सङ्गाभावस्यैव तारकत्वात्, सङ्गः सर्वात्मना त्याज्य इति वचनात् ॥१०॥ अत्यद्भुतमिति ईदृशवक्त्रालोकेनारिषड्वर्गध्वंसपूर्वकचित्तशुद्ध्या परतत्त्वावबोधस्य सद्योऽवश्यम्भावादिति भावः। तेन पापाधिक्यं ध्वनितम् ॥ ११ ॥

पुण्याधिक्यं वास्तीत्याह, दृष्ट्वेति उद्यदित्यारक्तताध्वननाय शशाङ्कं विशेषणम् ॥ १२ ॥ माचभाचमाभे श्रीधियावैश्वर्य्यपाण्डित्ये इति यावत्, पर उत्कृष्टेमाभे लभ्येते यस्मात् सपरमाभः प्रसादः तद्दतीत्वं चेद्भवाय

दृष्ट्वा तु देवि ! कुपितं भ्रुकुटीकरालमुद्यच्छशाङ्कसदृशच्छवि यन्न सद्यः । प्राणान् मुमोच महिषस्तदतीव चित्रं कैर्जीव्यते हि कुपितान्तकदर्शनेन ॥ १२ ॥ देवि ! प्रसीद परमाभवती भवाय सद्यो विनाशयसि कोपवती कुलानि। विज्ञातमेतदधुनैव यदस्तमेतन्नीतं बलं सुविपुलं महिषासुरस्य ॥ १३ ॥ ते सम्मता जनपदेषु धनानि तेषां तेषां यशांसि न च सीदति धर्मवर्गः । धन्यास्त एव निभृतात्मजभृत्यदारा येषां सदाभ्युदयदा भवती प्रसन्ना ॥१४॥

कुलाभिवृद्धये भवसि, कोपवती चेन्नाशयसि न केवलमेकमेव किं तु कुलानि अतोऽस्मासु प्रसीदेव; कोपफलं दर्शयति विज्ञातमेतदिति ॥ १३ ॥ प्रसादफलमाह ते सम्मता इति त्रिभिः । धन्याधनलाभवन्तः धनगणं लब्धेति यः ॥ १४ ॥

धर्म्याणि धर्मेण प्राप्याणि मौ वयोधर्मेत्यादिना यत् ॥ १५ ॥ १६ ॥ ईषत्सद्दासमितिश्लोकद्वयेनोक्त-

धर्म्याणि देवि! सकलानि सदैव कर्माण्यत्यादृतः प्रतिदिनं सुकृती करोति। स्वर्गं प्रयाति च ततो भवतीप्रसादाल्लोकत्रयेऽपि फलदा ननु देवि! तेन ॥ १५ ॥ दुर्गे स्मृता हरसि भीतिमशेषजन्तोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि। दारिद्र्य-दुःखभयहारिणि! का त्वदन्या सर्वोपकारकरणाय सदार्द्रचित्ता ॥१६॥ एभिर्हतै-र्जगदुपैति सुखं तथैते कुर्वन्तु नाम नरकाय चिराय पापम्। संग्राममृत्युमधिगम्य दिवं प्रयान्तु मत्वेति नूनमहितान्विनिहंसि देवि! ॥ १७ ॥ दृष्ट्वैव किं न भवती प्रकरोति भस्म सर्वासुरानरिषु यत् प्रहिणोषि शस्त्रम्। लोकान् प्रयान्तु-रिपवोऽपि हि शस्त्रपूता इत्थं मतिर्भवति तेष्वपि तेऽतिसाध्वी ॥ १८ ॥

मात्सर्यं परिहरति द्वाभ्यां एभिरिति ॥ १७ ॥ शस्त्रेण धारातीर्थत्वात्पावनेन पूताः ॥ १८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ १९ ॥ हृतदेवपराक्रमाणां दैत्यानां हन्तृ वीर्यमित्यन्वयः ॥ २० ॥ अतिहारि अतिसुन्दरम् वरदे वरान्

खड्गप्रभानिकरविस्फुरणैस्तथोग्रैः शूलाग्रकान्तिनिवहेन दृशोऽसुराणाम् । यन्ना-
गता विलयमंशुमदिन्दुखण्डयोग्याननं तव विलोकयतां तदेतत् ॥ १९॥ दुर्वृत्त-
वृत्तशमनं तव देवि ! शीलं रूपं तथैतदविचिन्त्यमतुल्यमन्यैः । वीर्य्यञ्च हन्तृ हृत-
देवपराक्रमाणां वैरिष्वपि प्रकटितैव दया त्वयेत्थम् ॥२०॥ केनोपमा भवतु तेऽस्य
पराक्रमस्य रूपं च शत्रुभयकार्य्यतिहारि कुत्र । चित्ते कृपा समरनिष्ठुरता च दृष्टा
त्वय्येव देवि ! वरदे ! भुवनत्रयेऽपि ॥२१॥ त्रैलोक्यमेतदखिलं रिपुनाशनेन त्रातं
त्वया समरमूर्द्धनि तेऽपि हत्वा । नीता दिवं रिपुगणा भयमप्यपास्तमस्माक-
मुन्मदसुरारिभवन्नमस्ते ॥२२॥ शूलेन पाहि नो देवि ! पाहि खड्गेन चाम्बिके ! ।
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च ॥ २३ ॥

ददासीति कृपा, वरान् दैत्यान् हंसि खण्डयसीति निष्ठुरता च ॥ २१ ॥ २२ ॥ २३ ॥

For Private and Personal Use Only

प्राच्यां रक्ष प्रतीच्यां च चण्डिके! रक्ष दक्षिणे। भ्रामणेनात्मशूलस्य उत्तरस्यां तथे-श्वरि! ॥ २४ ॥ सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते। यानि चात्यर्थ-घोराणि तै रक्षास्मांस्तथा भुवम् ॥ २५ ॥ खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके। करपल्लवसङ्गीनि तैरस्मान् रक्ष सर्वतः ॥ २६ ॥ ऋषिरुवाच। एवं स्तुता सुरैर्दिव्यैः कुसुमैर्नन्दनोद्भवैः। अर्चिता जगतां धात्री तथा गन्धानुलेपनैः २७ भक्त्या समस्तैस्त्रिदशैर्दिव्यैर्धूपैस्तु धूपिता। प्राह प्रसादसुमुखी समस्तान् प्रणतान् सुरान् ॥ २८ ॥ देव्युवाच। व्रियतां त्रिदशाः सर्वे यदस्मत्तोऽभिवाञ्छितम्। देवा ऊचुः। भगवत्या कृतं सर्वं न किञ्चिदवशिष्यते ॥२९॥ यदयं निहतः शत्रुरस्माकं महिषासुरः। यदि वापि वरोदेयस्त्वयास्माकं महेश्वरि! ॥ ३० ॥ संस्मृता संस्मृता त्वन्नो हिंसेथाः परमापदः। यश्च मर्त्यः स्तवैरेभिस्त्वांस्तोष्यत्यमलानने! ॥३१॥

भ्रामणेनेत्यनेन विदिक्ष्वध ऊर्द्ध्वं च रक्षेति ध्वनितम् ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥

हृद्वय इति अस्मादिति निमित्ते पञ्चमी प्रसन्ना सती सर्वदा सर्वपुरुषार्थप्रदा भवेथाः मर्त्यस्यापराधान्नि-

तस्य वित्तर्द्धिविभवैर्धनदारादिसम्पदाम् । वृद्धयेऽस्मत् प्रसन्नात्वं भवेथाः सर्वदा-
ऽम्बिके ! ॥ ३२ ॥ ऋषिरुवाच । इति प्रसादिता देवैर्जगतोऽर्थे तथात्मनः । तथे-
त्युक्त्वा भद्रकाली बभूवाऽन्तर्हिता नृप ! ॥ ३३ ॥ इत्येतत् कथितं भूप संभूता सा
यथा पुरा । देवी देवशरीरेभ्यो जगत्त्रयहितैषिणी ॥ ३४ ॥ पुनश्च गौरीदेहात् सा
समुद्भूता यथाऽभवत् । वधाय दुष्टदैत्यानां तथा शुम्भनिशुम्भयोः ॥ ३५ ॥

मित्तीकृत्य तस्मैमाक्रुध्य इति भावः । स्पष्टमन्यत् ॥ ३२ ॥ ३३ ॥ ३४ ॥ गौरीदेहादिति गौरवर्णशरीरप्रकट-
नाय नीलवर्णकोशरूपं पार्वत्या परित्यक्तमिति वक्ष्यते तादृशात् कोशादित्यर्थः ॥ ३५ ॥

अत्र चण्डीस्तवे देवकृतास्त्रयस्तवास्तत्तदारम्भे देवा ऊचुरित्यपेक्षितं तथा देवकृतवरप्रार्थनद्वयमपीति तयोरारम्भेऽपि द्विवारमिति पञ्चवारं तन्त्रान्तरे देवोक्तिरस्ति परं तु स्तवारम्भप्राक्‌श्लोकेषु नियमेन तदर्थस्योपनिबद्धत्वेन पौनरुक्त्यापत्त्या स्तवारम्भे त्रितयं नापेक्षितमित्याशयेन यामलपाठे प्रार्थनारम्भ एव द्विवारं

रक्षणाय च लोकानां देवानामुपकारिणी । तच्छृणुष्व मयाख्यातं यथावत् कथयामि ते ॥ ३८ ॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये शक्रादिस्तुतिः ॥ ४ ॥

देवोक्तिरादृता, प्रकृततन्त्रे त्वर्द्धजरतीयमेव, प्रथमस्तवस्य चरमस्तवस्य चारम्भे परिहृत्यै तदुत्तरं स्तवारम्भे प्रार्थनद्वयारम्भे चेति त्रिर्देवोक्तेरङ्गीकारादिति द्रष्टव्यम् । अतः प्रथमश्लोकोत्तरं देवा ऊचुरिति न वक्तव्यम् इतरद्यथास्थानं युक्तमेवेति दिक् । पूर्वाध्याये मध्ये मध्ये श्लोकान्तराण्यत्र फलश्रुतौ च तानि बहुत्वान्न प्रदर्शितानि ॥ ३६ ॥ इति श्रीगुप्तवत्यां मन्त्रव्याख्यायां शक्रादिस्तुतिवर्णनं नाम चतुर्थोऽध्यायः ॥ ४ ॥

(अथ द्वितीयाद्यध्यायत्रये पाठान्तराणि)। शरणं च प्रपन्नास्मः । 'च' परं शरणं प्रपन्ना आगतास्मो भवाम इति नार्मेशः । शरणं वः प्रपन्ना स्म इति पाठान्तरम् । वयमिन्द्रादयः सर्वे वो युष्मान् शरणं रक्षितॄन् दुःखेभ्यः पालयितॄन्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रपन्ना: प्राप्तास्ता:। वेदा: प्रमाणमिति वच्छरणमिहैकवचनान्तं विवक्षितम् इति शन्तनु:। अ०२ श्लो० ७॥ भ्रुकुटी-
कुटिलाननौ। भृकुटीकुटिलाननौ। भ्रूकुटीकुटिलाननौ। इति पाठत्रयम् अर्थस्त्वेकरूप एव 'भ्रुकुटी भृकुटी भ्रूकुटी-
स.टी. स्त्रियः इत्यमरात्। अ०२ श्लो०८ ॥ मध्यमैन्द्रेण। कुत्रचित् मध्यं चैन्द्रेण चेति पाठ: स च पूर्वेण व्याख्यात:। अ०२
५३ श्लो०१४॥ कालश्च दत्तवान् खड्गं तस्यै चर्म च० पाठान्तरम्। नागेशस्तु "तस्या" इति सम्बन्धत्वविवक्षायां षष्ठीत्याह।
अ० २ श्लो० २३॥ अददाज्जलधिरिति पाठे अददादिति डुदाञ्दाने इत्यस्य। अददत् इति पाठे तु अनुदात्ते-
त्वलक्षणमात्मनेपदमनित्यमाश्रित्य दददाने इत्यस्य लङिरूपम्। अ० २ श्लो० २८॥ जयेति च मुदा देवा:।
जयेति देवाश्च मुदा। जयेति देवाश्च तदा। इति पाठत्रयम् 'मुदा' हर्षेण 'तदा' तस्मिन् काले इत्यर्थ:। अ०२।३६॥
युयुधे चामरश्चान्यै:। अन्यै: प्रधानदैत्यै: सहितश्चामराख्य: इति नागेश:। चामरश्चान्य इति पाठान्तरं तत्र
चिक्षुरादन्यश्चामरश्चेत्यर्थ:। शन्तनु:। अ० २ श्लो० ४०॥ गजवाजिसहस्रौघैरित्यारभ्य पाठान्तराणि शान्तनव्यां
व्याख्यातान्यपि न कात्यायनीतन्त्रसम्मतानीत्युपेक्षितानि। विड़ालाक्ष इति गुप्तवतीसम्मत: पाठ: विड़ालाख्यो
महादैत्य: इति शान्तनु:। अ० २ श्लो० ४३॥ निरन्तरशरौघेणेति क्वचित् ५३। शैलानुकारिण इति पाठान्तरम्
शैलतुल्यास्तदर्थ: ५४॥ सद्यस्तत्र विसुस्रुवु:। पाठा० प्रसुस्रुवुरित्यर्थ:। शं० ६५॥ यथैषां तुतुषु:। यथैनां तुष्टुवु:।
यथैनांस्तुष्टुवुरिति पा० एनां देवीम्। एनान् गणान् अ०२।६८ ॥*॥ विव्याध चैनं गात्रेषु। पाठा० 'एनं' चिक्षुरम्।
अ० ३।४। तेन तच्छतधानीतं शूलं स च महासुर:। पाठा० अर्थस्त्वेकरूप एव। ८ शरैर्निन्ये यमक्षयमित:

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

परमधिकं श्लोकद्वयं शन्तनुव्याख्यातमपि कात्यायनीतन्त्रविरोधादुपेक्ष्यमेवमग्रेपि १६। पर्वतानुच्चैश्चिक्षेप। पा०। उच्चैश्चिक्षेप उच्चैर्ननाद चेति क्रियाविशेषणम् २४। अर्द्धनिष्क्रान्त एवाति देव्यावीर्य्येण संवृतः। अर्द्धनिष्क्रान्तः निःसृताद्धकाय एव देव्या वीर्य्येण अतिशयेन संवृतः प्रतिबद्धः निष्क्रमितुं नाशकदित्यर्थः। नागेशः। अर्द्धनिष्क्रान्त एवासोद्देव्या वीर्य्येण संवृत इति पाठा० अर्द्धनिष्क्रान्त एव देव्यावीर्य्येण संवृतः स्तम्भित आसीदित्यर्थः। पूर्वत्र च व्यवहितायेत्यनेनातीत्यस्य सम्बरणक्रियायामन्वयः २८ ॥*॥ चरितानि तवातियानि। पाठा०। युद्धेषु यानि चरितानि, तान्यप्यति, अति उत्कृष्टानि इति नागे०। तवाद्भुतानीति पाठे स्पष्टोऽर्थः अ० ४।६। त्रिगुणापि दोषैर्न ज्ञायसे। दोषैरागादिभिर्हेतुभिः। देवैर्न ज्ञायस इति पाठान्तरं तत्र देवैर्हरिहरादिभिरित्युत्तरत्रान्वयः अ० ४।७ समस्तसुरताः—प्रयान्तीति क्वचिद्बहुवचनम् अ० ४८। सद्यो विनाशयति। पाठा०, अत्र भवती कर्त्री १६। न च सीदति बन्धुवर्गः। पाठां० १४। तेष्वपि तेऽतिसाध्वी। तेष्वपि उपकारिकैव त्वमिति किं वक्तव्यं भक्तेष्विति भावः। नागे०। तेष्वहितेषु इति पाठे अहितेषु शत्रुष्वित्यर्थः। १८। यानि चात्यर्थ घोराणि। सौम्यानि सृष्टिस्थितिव्यापाराणि, अत्यर्थघोराणि संहारव्यापाराणि। नागे०। अत्यन्तघोराणीति पाठान्तरम्। तत्र अत्यन्तभयङ्कराणि रूपाणीत्यर्थः। ग्रं० २५। हिंसेथाः परमापदः। हिंसेथाः आर्षप्रयोगः। हिंसीथाः इति शन्तनुः हिंस्या इति च तदर्थमाह ३१ हृदयेऽस्मत् प्रपन्नात्वम्। पाठां० अस्माभिः प्रपन्ना प्रणता सेविता त्वमिति तदर्थः ३२)

For Private and Personal Use Only

श्रीरस्तु ॥ * ॥ अथ तन्त्रे सार्द्धद्वाविंशत्या श्लोकैः पञ्चमाद्यध्यायषट्कगतमन्त्रविभजनपरस्तृतीयः पटलः। ईश्वर उवाच। ऋषिवाक्यं पुरेत्याद्या विष्णुमायां प्रतुष्टुवुः इत्यन्ताः श्लोकमन्त्राः षट् देवा जगुस्ततःपरम्॥ नमो देव्या

स.टी. इति त्रिंशच्छ्लोकान्ते मन्त्रमूर्त्तिभिः। विष्णुमायादिकास्तेषु भ्रान्त्यन्ता एकविंशतिः॥ अवतारैः पृथङ्मन्त्रा-

५४ स्त्रिषष्ठ्याहुतयस्तु ताः। चितिरूपेण मन्त्रेणाप्याहुतित्रयमाचरेत्॥ एवं मन्त्रा अशीतिस्युरथो ऋषिरुवाच ह॥*॥

नमो देव्यै महादेव्यै इत्यारभ्यत्रिंशच्छ्लोकावर्त्तन्ते, तदन्तिमश्चरणः सर्वापदो भक्तिविनम्रमूर्त्तिभिरिति पठ्यते, तेषां त्रिंशतो मध्ये विष्णुमायेति शब्दितेत्यारभ्य भ्रान्तिरूपेण संस्थितेत्येतद् द्वितीयचरणवन्तः श्लोका एकविंशतिः सन्ति, इतरचरणत्रयस्य सर्वेषु साधारण्यादसाधारणमध्यमप्रतीकग्रहणं, ते एकरूपा एव भासमाना अपि महाकाली-महालक्ष्मी-महासरस्वतीरूपचण्डिकावतारैस्त्रिभिः प्रतिपाद्यैरर्थैर्भेदात् पृथगेव मन्त्रा मन्तव्याः प्रत्येकं त्रित्रिमन्त्ररूपा इति यावत्; ततश्च तैस्तैः पुनरुच्चरितैस्तिस्रस्तिस्र आहुतयः कार्य्या इति संहत्य त्रिषष्ठिः। एकविंशतिस्त्रिषष्ठिरिति च कथनेन तन्त्रान्तरे लक्ष्म्या उपरि धृतिस्तुष्टेरुपरि। पुष्टिश्चेति मन्त्रद्वयमधिकं स्फूर्त्तिमेधाद्वयमपि पठ्यमानमेतत्तन्त्रानुसारिभिर्नोपसंहर्त्तव्यमिति ध्वनितम्। चितिरूपेणेति मन्त्रस्यापि त्रिरावृत्तिरिति षट्षष्ठिः, त्रिंशत्यवशिष्टाः श्लोका अष्टौ, पुराशुम्भेत्यादयः पूर्वोक्ताः षडित्येवं चतुर्दशाहुतय इत्यशीति मन्त्राजाता इत्यर्थः, ऋषिदेववचसो रङ्गमन्त्रमध्ये पार्थक्येन निर्देश्यमाण-

(१) तै० सं० चतुर्थकाण्डे पञ्चमप्रपाठकस्यैकादशानुवाकेऽयं मन्त्रः समाम्नातः 'नमो रुद्रेभ्यो ये पृथिव्यां ये

त्वादिति भावः। मध्ये संख्यापिण्डकथनं तु श्लोकसंख्यातो मन्त्रसंख्याया अत्यन्तविप्रकर्षेण गणकबुद्धिभ्रमनिरासार्थम्, ऋषिदेववचसोर्नगणनमध्यायसमाप्तिभ्रमनिरासार्थम् ॥ अत्रैकैकश्लोकोद्भवमन्त्रत्रयस्यावतारत्रयरूपप्रतिपाद्यभेदेनैव भेदं वदता मन्त्राणां शब्दानुपूर्व्यामिथो वैलक्षण्याभावः सूचितः। न्यायश्च नमस्तस्या इत्यक्षरचतुष्टयस्यैकरूपत्वेऽपि तच्छब्दार्थानां महाकाल्यादिरूपाणां भेदात् सर्वत्र सहस्रनामसु नाम्नां पुनरुक्त्या सहस्रसंख्यान्यूनताप्रसक्तेः पुनरुक्तनाम्नामर्थभेदवर्णनेनैव भगवत्पादादिभिर्भाष्यकारैः परिह्रियमाणताया दर्शनात्, मन्त्राणामनुसन्धानार्थत्वेन तद्भेदाद्भेदस्य युक्तत्वाच्च। पूर्वार्द्धस्य तु प्रतिमन्त्रं पूर्वभागेऽनुषङ्गः चरमाक्षरचतुष्टयस्य तु प्रतिमन्त्रमन्तेऽनुषङ्गः 'यात' अग्ने अयाशया रजाशया हराशया तनूर्वर्षिष्ठा गह्वरेष्ठा उग्रं वचो अपावधीस्त्वेषं वचो अपावधी'रिति मन्त्रे अयाशयादित्रये प्रत्येकं पूर्वभागे यात' अग्ने इत्यस्याग्रे तनूरित्यादेश्च योगेन मन्त्रत्रयस्वरूपस्य "अनुषङ्गो वाक्यसमाप्तिः सर्वेषु तुल्ययोगित्वात्" (मीमां०२।१।४८) इत्यधिकरणे निर्णयदर्शनात्, तेनैव न्यायेन नमकचरममन्त्रस्यैकत्वेन पठितस्यापि(१)होमे

अन्तरिक्षे ये दिवि येषामन्नं वातो वर्षमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दध्मः।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विभज्यमन्त्रत्रयकल्पनापेक्षायां ये पृथिव्यामित्यादित्रये नमो रुद्रेभ्य इति पूर्वभागस्येषवस्तेभ्य इत्यादेरुत्तमभागस्य च पूर्वोत्तरस्थाने प्रत्येकमनुषङ्गेन मन्त्रत्रयस्य सर्वसम्मतत्वाच्च, तेन 'या देवी सर्वभूतेषु विष्णुमायेति शब्दिता नमस्तस्यै नमो नम' इति चतुर्विंशत्यक्षरोऽष्टाक्षरैस्त्रिभिः पादैरेको गायत्रीछन्दस्को मन्त्रः सिद्धः । अयमेव च त्रिः पठनीयः देवता तु भिन्नानुसन्धेयेति सिद्धम् । एवं सति यत्त्वयैवोक्तं प्रथमो विंशत्यक्षरो द्वितीयश्चतुरक्षरः तृतीयोऽष्टाक्षर इति तद्विभजनं केन न्यायेन केन वा वचनेन सिद्ध्यतीति स एव प्रष्टव्यः । ननु नमस्तस्यै इत्येतत्त्रयमेव प्रत्येकं परिपूर्णवाक्यत्वात् मन्त्रत्रयं 'तस्मिन् सीदामृत' इत्यस्येव तच्छब्दप्रयुक्ताकाङ्क्षायाः पूर्णत्वविघटकत्वाभावादिति त्वयैवोक्तेः तेनैव न्यायेन या देवीत्यस्य प्रत्येकं मन्त्रत्वप्राप्तौ त्रय एव प्रतिश्लोकं मन्त्रा इति वचनेनाधिक्यासम्भवाद्यत्र क्वचिदेकवाक्यतयाऽन्यतराकाङ्क्षामात्रेण योगे सिद्धे स्वाव्यवहितेनैव परेण योगः कल्प्यते तावतैव निराकाङ्क्षत्वात्, एवं नमो नम इत्यस्यापि स्वाव्यवहित पूर्वेणेति मध्यस्थस्य न केनापि योगः । अयाशयेत्यादेर्ये पृथिव्यामित्यादेश्च निराकाङ्क्षत्वाभावादुभयाकाङ्क्षया कल्प्यमानो योगो विनिगमना विरहात्त्रिष्वपि सिध्यतीति वैषम्यं । यत्त्वर्थभेदमात्रेण मन्त्रभेद इति तन्नानानार्थकशब्दमात्रोच्छेदापत्त्यादिना ललितासहस्रनामव्याख्याने बोधायनीयसहस्रभोजनखण्डव्याख्याने च त्वयैव निरस्तमिति न तत्साधकम्, अतएव ऋताषाडृतधामाग्निर्गन्धर्वस्तस्यौषधयोऽप्सरस ऊर्जो नाम स इदं

For Private and Personal Use Only

(१) अतएव ऋताषाडृतधामाऽग्निर्गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाडित्येको मन्त्रः। तस्यौषधयोऽप्सरस ऊर्जो नाम ताभ्यः स्वाहेति द्वितीयो मन्त्रः ता इदमित्याद्यंशं परिहृत्यैव शाखान्तरे समाम्नातः। (२) नमो वः किरिकेभ्यो देवानां हृदयेभ्यो नमो विक्षीणकेभ्यो नमो विचिन्वत्केभ्यो नम आनिर्हतेभ्यो नम आमीवत्केभ्यः

ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा ताभ्यः स्वाहेत्यत्र ताभ्यः स्वाहेत्येतावन्मात्रस्य परिपूर्णतया ता इदं ब्रह्मेत्यंशस्य योगस्याप्यनुषङ्गं परिहृत्यैव मन्त्रत्वं स्वीकृतं(१) सङ्कर्ष इति चेन्मैवं वाक्यशेषशेषिणोरानन्तर्यस्याप्रयोजकत्वात् बहुशेषस्याप्येकत्रैव लाघवाय पठनीयत्वेन यत्र क्वापि पाठे तस्याप्य वर्ज्यत्वादेव(म्) अतएवोक्तं जैमिनिना आनन्तर्यमचोदनेति, अन्यथा चित्पतिस्त्वा पुनातु वाक्पतिस्त्वा पुनातु देवस्त्वा सविता पुनात्विति वाक्यत्रयस्यापि प्रत्येकं परिपूर्णत्वेनाच्छिद्रेण पवित्रेण वसोः सूर्य्यस्य रश्मिभिरिति शेषस्य स्वाकांक्षामात्रेण कल्प्यमानो योग एकेनैव कल्पनीयः स्यात् इष्टश्च तस्य त्रिभिरपि योगो भाष्यकारादेः, कथमन्यथा शतरुद्रीये देवानां हृदयेभ्य इत्यस्य नमो वः किरिकेभ्य इत्यव्यवहितपूर्वेणान्वयमात्रेण विश्रान्ताकाङ्क्षस्य नमो विक्षीणकेभ्य इत्यादीनां (२) नमस्तस्या इति वत् पूर्णानामप्याकाङ्क्षोत्थापनेन तस्य पुनः पुन-

---

(तै० सं० का० ४ प्र० ५ अ० ८) अत्र देवानां हृदयेभ्य इति विक्षीणविचिन्वदानिर्हतामीवत्केष्वप्यनुषज्यते तेन नमो वः किरिकेभ्यो देवानां हृदयेभ्य इतिवत् नमो विक्षीणकेभ्यो देवानां हृदयेभ्य इत्यादावपि मन्त्रचतुष्टयं सम्पद्यते। अयञ्च विभागो होमादिष्वेव न स्वाध्यायादाविति भाष्यम्।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

राकर्षणेन महति प्रमेयात्तनेन बहुशेषतापादनं सर्वसम्मतं युज्यतां तस्मादन्यतराकाङ्क्षयाप्युत्थाप्यमाना परस्याकाङ्क्षाविनिगमनाविरहात्त्रयाणामपि शेषित्वयोग्यानामुत्थाप्यत इति त्रिभिरप्यावृत्याशेषस्याप्यन्वयो

स.टी. वाच्यः, ताभ्यः स्वाहेत्यस्यैव ता इदमित्यस्यापि पूर्णत्वेनान्यतराकांक्षाया अप्यभावेन वाक्यान्तरेण सन्दर्भ-

५६ पतिततयैव नानुषङ्गप्रसक्तिः कथन्तरमतानुसारेण तस्य प्रसक्तौ वा तयैव रीत्या स्वाहेत्यस्यापि अनुषङ्गेनैव सिद्धेर्द्विः पाठवैयर्थ्यापत्तिः तद्वशादेव च तावन्मात्रस्यैव भिन्नमन्त्रत्व ज्ञापनान्न दोषः । अथापि यदि य इदं या इदमिति यच्छब्दयोगेन पठ्येत तदानुषङ्गो ब्रह्मणापि न वार्येत, तच्छब्दपाठात्तु द्वयोरपि नैराकांक्ष्यान्नानुषङ्ग इति तु सङ्कर्षस्थ जैमिनीयाधिकरणाशयः । एतेन तत्र स्वाहाशब्दस्यैव प्रकृते नमः शब्दस्य प्रत्येकं पाठात्तावन्मात्रस्यैव मन्त्रत्वसम्भव इत्यपास्तम् । शेषस्य या देवीति यच्छब्दघटितत्वेन वचनबलेन स्वतन्त्रमन्त्रत्वायोगेन त्रिष्वप्याकाङ्क्षाया उत्थापनीयत्वात् पूजायान्तु नमोऽन्तमा इति वचनेनान्त्यभाग एव योजनीयस्य लौकिक नमः शब्दस्यानुषक्तनमो नमः शब्दस्य वा पूजार्थकत्वेन स्वाहाकृतस्य 'समुत्तृणतर्भुवः स्वाहेति ? मन्त्रमध्यपठितस्वाहापदस्य हविस्त्यागार्थकताया इव तादृश नमः शब्दस्यापि तदभावेन तत्पुनः पाठमात्रेण तावन्मात्रस्य मन्त्रत्वासिद्धेश्च, अतो न्यायाभासमूलक एव त्वत्कल्पितो विभागः, तादृशस्याप्युपादेयताया-मिद्धैवाव्यवस्थापत्तिः, यथा पूर्वार्द्धमेको मन्त्रः उत्तरार्द्धे तु समं स्यादिति न्यायाद्द्वौ पादौ द्वौ मन्त्रौ, यथा वा

For Private and Personal Use Only

द्वाविंशत्यक्षरश्चतुरक्षरः षडक्षर इति त्रयः, अथवा विंशत्यक्षरः षडक्षरौ द्वाविति मध्यममन्त्रस्य नमो हिरण्यबाहव इत्यस्येवोभयतो नमस्कारत्वसम्भवात्। अथवा द्वितीयतृतीय नमः शब्दयोः पूर्वत्र परत्रापि वारद्वयमन्वयः नमो भवाय च रुद्राय च नमः शर्वाय चेत्यादौ द्वितीयादि नमः शब्दानां काकाक्षिवदुभयत्रावृत्तिस्वीकारेण तेषामुभयतो नमस्कारात्मकत्वपक्षस्यापि स्वीकारात्, तेन द्वाविंशत्यक्षरषडक्षराष्टाक्षरा इति त्रयो मन्त्रा भवन्ति, नमो नम इत्येव वा नम इत्येव वा भिन्नो मन्त्रः, मध्यमः षडक्षरोऽष्टाक्षरो वा दशाक्षरो वा चतुरक्षरो वा इतरांश एकः, वशिष्ठस्मृतौ शूद्रधर्मप्रकरणेस्याभ्यनुज्ञातो नमस्कारो मन्त्र इति वाक्यस्य नम इति शब्दमात्रं द्व्यक्षरो मन्त्र इति व्याख्यानदर्शनात्, अतएव नमः शब्दौ द्वावपि वा भिन्नौ मन्त्रावन्यः सर्व एक इत्यादि बहुव्याकुलो स्यात्। यदप्यर्थभेदेन मन्त्रभेदो निरस्त इति तदपि न ललितासहस्रनामस्वपुनरुक्तताया एव सम्भवप्रदर्शनाय तन्निरासात्, सहस्रभोजनेप्येकस्यैव ब्राह्मणस्य दिनभेदेन द्विर्भोजननिरासार्थं तथोक्तेः अलाभे तु तस्याप्यङ्गीकारात्, कथमन्यथा विष्णुसहस्रनामादौ गतिः नामशब्दस्य प्रातिपदिकपरत्वेनार्थवच्छब्दरूपस्य विशिष्टस्य तस्यार्थैक्येऽपि शब्दभेदमात्रेणैव शब्दैक्येऽप्यर्थभेदमात्रेण भेदस्य विशेष्याभावादिप्रयुक्तविशिष्टाभावरूपस्यापततोर्दुर्निवारतायास्तत्रैवास्माभिः समर्थितत्वाच्च, अवतारैः पृथग्मन्त्रा इति वचनेनैवार्थभेदस्यैव प्रकृते मन्त्रभेदकत्वेन स्पष्टमेव मन्त्राणां साजात्यध्वननाच्च, एकस्यैव त्रिराम्नानेना-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भ्यासादपि मन्त्रभेदसिद्धेश्च, कथमन्यथा ऋचां दशसहस्राणीत्यादिना ऋग्वेदमन्त्राणां समुदितसंख्यापिण्डः कथ्यमानो युज्यतां, कतिपयानामृचामश्वावतीर्गोमतीरित्यादीनां पुनराम्नानात्; सावर्णिर्भविता मनुरिति
स॰टी॰ चरमचरणस्य सकृदाम्नातस्यापि त्वन्मतरीत्या द्विरुच्चारणविधानमात्रेण मन्त्रेण मन्त्रान्तरत्वस्वीकारे एक-
५७ जातीयस्यैव त्रिराम्नाने मन्त्रत्रयत्वस्य कैमुतिकन्यायेनैव सिद्धौ शब्दभेदानावश्यकत्वाच्च, वस्तुतस्तत्र त्रयोदशाध्यायान्तिमश्लोकस्यैव पुनरुच्चारणं विधीयते न चरणमात्रस्येति वक्ष्यते, तेन 'भद्र' .नो अति वा तपं मन इति दशाक्षरस्य ऋगन्तरावयवत्वपार्थक्याभ्यां मन्त्रभेदस्येव सावर्णिरिति चरणे पूर्वश्लोकशेषत्वस्वातन्त्र्याभ्यां द्वैविध्यस्य स्वीकारेण दृष्टान्तासिद्धावपि न क्षतिः चरमश्लोकद्वयस्यैव दृष्टान्तत्वसम्भवात्। तस्माद् गायत्रीछन्दस्क एक एव मन्त्रोऽवतारभेदानुसन्धानेन त्रिस्त्रिः पठनीय इति कृतमतयो मात्सर्य्यमुत्सार्य्यविदां कुर्वन्तु ॥*॥ आदावेवंस्तवादि स्यादन्ते कस्मान्न गृह्यते इति सप्तदशश्लोका मन्त्रा अथ ऋषिर्वचः॥ निशम्येत्यादयः श्लोका गिरेत्यन्तास्ततस्त्रयः। अथ दूत उवाचेति देवि दैत्येश्वरादयः॥ व्रजान्ता नवमन्त्रास्युरथो ऋषिरुवाच ह। इत्युक्ता सा तदेत्येकः श्लोको मन्त्रः सरस्वती देव्युवाचाऽथ चत्वारः श्लोकाः सत्यादयो लघु। दूतोक्तिरवलिप्तासि मैवमित्यादयस्ततः॥ श्लोकागमिष्यसीत्यन्ताश्चत्वारो देव्युवाच हि। एवमेतद्बलीदैत्य स च युक्तं करोतु यत्॥ इत्यन्तौ द्वौ मनूश्लोकावङ्गमन्त्राश्च ते नव। इत्यूनत्रिंशदधिकाः शतं मन्त्राः प्रकीर्त्तिताः॥

For Private and Personal Use Only

द्वाविंशत्यक्षरश्चतुरक्षरः षडक्षर इति त्रयः, अथवा विंशत्यक्षरः षडक्षरौ द्वाविति मध्यममन्त्रस्य नमो हिरण्यबाहव इत्यस्येवोभयतो नमस्कारत्वसम्भवात्। अथवा द्वितीयतृतीय नमः शब्दयोः पूर्वं च परत्रापि वारद्वयमन्वयः नमो भवाय च रुद्राय च नमः शर्वाय चेत्यादौ द्वितीयादि नमः शब्दानां काकाक्षिवदुभयत्रावृत्तिस्वीकारेण तेषा-मुभयतो नमस्कारात्मकत्वपक्षस्यापि स्वीकारात्, तेन द्वाविंशत्यक्षरषडक्षराष्टाक्षरा इति त्रयो मन्त्रा भवन्ति, नमो नम इत्येव वा नम इत्येव वा भिन्नो मन्त्रः, मध्यमः षडक्षरोऽष्टाक्षरो वा दशाक्षरो वा चतुरक्षरो वा इतरांश एकः, वशिष्ठस्मृतौ शूद्रधर्मप्रकरणेस्याभ्यनुज्ञातो नमस्कारो मन्त्र इति वाक्यस्य नम इति शब्द-मात्रं द्व्यक्षरो मन्त्र इति व्याख्यानदर्शनात्, अतएव नमः शब्दौ द्वावपि वा भिन्नौ मन्त्रावन्यः सर्व एक इत्यादि बहुव्याकुलो स्यात्। यदप्यर्थभेदेन मन्त्रभेदो निरस्त इति तदपि न ललितासहस्रनामस्वपुन-रुक्तताया एव सम्भवप्रदर्शनाय तन्निरासात्, सहस्रभोजनेप्येकस्यैव ब्राह्मणस्य दिनभेदेन द्विर्भोजननिरासार्थं तथोक्तेः अलाभे तु तस्याप्यङ्गीकारात्, कथमन्यथा विष्णुसहस्रनामादौ गतिः नामशब्दस्य प्रातिपदिक-परत्वेनार्थवच्छब्दरूपस्य विशिष्टस्य तस्यार्थैक्येऽपि शब्दभेदमात्रेणैव शब्दैक्येऽप्यर्थभेदमात्रेण भेदस्य विशेष्या-भावादिप्रयुक्तविशिष्टाभावरूपस्यापततोर्दुर्निवारतायास्तत्रैवास्माभिः समर्थितत्वाच्च, अवतारैः पृथग्मन्त्रा इति वचनेनैवार्थभेदस्यैव प्रकृते मन्त्रभेदकत्वेन स्पष्टमेव मन्त्राणां साजात्यध्वननाच्च, एकस्यैव त्रिराम्नानेना-

स·टी· ५७

भ्यासादपि मन्त्रभेदसिद्धेश्च, कथमन्यथा ऋचां दशसहस्राणीत्यादिना ऋग्वेदमन्त्राणां समुदितसंख्यापिण्ड: कथ्यमानो युज्यतां, कतिपयानामृचामश्वावतीर्गोमतीरित्यादीनां पुनराम्नानात्; सावर्णिर्भविता मनुरिति चरमचरणस्य सकृदाम्नातस्यापि त्वम्नतरीत्यादिरुच्चारणविधानमात्रेण मन्त्रेण मन्त्रान्तरत्वस्वीकारे एकजातीयस्यैव त्रिराम्नाने मन्त्रत्रयत्वस्य कैमुतिकन्यायेनैव सिद्धौ शब्दभेदानावश्यकत्वाच्च, वस्तुतस्तत्र त्रयोदशाध्यायान्तिमश्लोकस्यैव पुनरुच्चारणं विधीयते न चरणमात्रस्येति वक्ष्यते, तेन 'भद्रं .नो अति वा तपं मन इति दशाक्षरस्य ऋगन्तरावयवत्वपार्थक्याभ्यां मन्त्रभेदस्येव सावर्णिरिति चरणे पूर्वश्लोकशेषत्वस्वातन्त्र्याभ्यां द्वैविध्यस्य स्वीकारेण दृष्टान्तासिद्धावपि न क्षतिः चरमश्लोकद्वयस्यैव दृष्टान्तत्वसम्भवात्। तस्माद् गायत्रीछन्दस्क एक एव मन्त्रोऽवतारभेदानुसन्धानेन त्रिस्त्रिः पठनीय इति कृतमतयो मात्सर्यमुत्सार्य्यविदां कुर्वन्तु ॥*॥ आदाविवंस्तवादि स्यादन्ते कस्मान्न गृह्यते इति सप्तदशश्लोका मन्त्रा अथ ऋषिर्वचः॥ निशम्येत्यादयः श्लोका गिरेत्यन्तास्ततस्त्रयः। अथ दूत उवाचेति देवि दैत्येश्वरादयः॥ व्रजान्ता नवमन्त्रास्युरथो ऋषिरुवाच ह। इत्युक्ता सा तदेत्येकः श्लोको मन्त्रः सरस्वती देव्युवाचाऽथ चत्वारः श्लोकाः सत्यादयो लघु। दूतोक्तिरवलिप्तासि मैवमित्यादयस्ततः॥ श्लोकागमिष्यसीत्यन्ताश्चत्वारो देव्युवाच हि। एवमेतद्बलीदैत्य स च युक्तं करोतु यत्॥ इत्यन्तौ द्वौ मनूश्लोकावङ्कमन्त्राश्च ते नव। इत्यूनत्रिंशदधिकाः शतं मन्त्राः प्रकीर्त्तिताः॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

'अत्र लघ्विति पदस्य लघुन्ता इत्यर्थः सरस्वतीशब्दो देवीविशेषणं तृतीयचरित्रे तस्या एव देवतात्वद्योतनार्थं संख्यापिण्डकथनन्त्वध्यायसमाप्तिद्योतकम्' ॥ ऋष्युक्तिरित्याकर्ण्येति श्लोकाश्चर ईरिताः । पुनर्ऋषि रुवाचेति तेनाद्यम इति त्रयः श्लोकात्मकास्ततो मन्त्रा देव्युवाच ततः परम् ॥ दैत्येश्वरेण प्रहित इत्येकश्लोकमन्त्रकः ॥ अथर्षिवाक्यमित्युक्तः सोऽभ्यधावदिति ह्यमी । श्लोकाद्वादशमन्त्राः स्युः षष्ठेऽध्याये तु संहताः ॥ चतुर्विंशति संख्या का देवताहुतयः क्रमात् । ऋष्युक्तिराद्यमेत्याद्यास्त्रयोविंशतिमातरः ॥ ऋषिवाक्यं ततस्तावानीतौ द्वौ मातराविति । सप्तविंशतिसंख्याका भवन्त्याहुतयः प्रिये ॥ अत्राध्यायद्वये देवी धूम्राक्षीति प्रकीर्त्तिता । 'देवतामन्त्रयोरभेदान्मातृपदेन मन्त्रा एवोच्यन्ते' ॥ ऋषिश्चण्डे च निहते इत्याध्यायावसानकाः । त्रिषष्ठ्याहुतयः प्रोक्ता एकात्रार्धाहुतिर्मता ॥ रक्ताक्षी देवताष्टौ च महाशक्तयः प्रकीर्त्तिताः ॥ 'ऋष्याद्या अध्यायसमाप्तिपर्य्यन्तास्त्रिषष्टिमन्त्रास्तेष्वेकोऽर्द्धश्लोकमन्त्रएकऋषिरुवाचेतिमन्त्रएकषष्टिश्लोकमन्त्राः । अस्याध्यायस्य नवदेवताः, तेष्वेका रक्ताक्षी या चण्डिकाया ललाटफलकान्निष्पन्ना, अन्या ब्रह्मे-श-गुह-विष्णु-वराह-नृसिंह-शक्र-चण्डिकानां शक्तयोऽष्टावित्यर्थः । क्तिच् क्तौ च संज्ञायामिति शक्तेः क्तिचि कृदिकारादितिङीषिशक्तय इति रूपम् । स चार्धश्लोको 'मुखेन कालीजगृहे रक्तवीजस्य शोणितमिति, ततोऽसा वाजघानाथेत्याद्युत्तरश्लोकषट्कसामञ्जस्यस्य तदभावेऽनुपपत्तेः, एतेन मन्त्रार्थगन्धानभिज्ञेनोक्तास्तेषां मातृगण इत्यय-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मर्द्धमन्त्रत्वेन नोपादेयः' ॥ राजा विचित्रमित्यादिश्लोकद्वयमथो ऋषिः । चकारकोपमतुलमित्याद्याः श्लोकरूपकाः । सप्तत्रिंशच्च विज्ञेया देवतामन्त्ररूपकाः । इत्येकचत्वारिंशत् स्युर्नवमाहुतयः शिवे ॥ देवता भैरवी तारा शृणु गोप्यं वरानने । ऋषिर्निशुम्भं निहतमिति श्लोकावुभौ मनू ॥ ततो देवी वचः प्रोक्तमेकैवाहमिति द्वयम् । देव्युवाच ततश्चाहं विभूत्येत्येकलो मनुः ॥ ऋषिस्ततः प्रवद्वते सार्द्धा द्वाविंशतिर्मताः । द्वात्रिंशन्मनवः सर्वे तेष्वेकोऽर्द्धमनुर्मतः ॥ दशमे सिंहमारूढा शूलपाशविधारिणी । मुख्या चतुर्भुजा बाणचापहस्ता शुभेच्छया ॥ 'एकल एकः तत्रापि सा निराधारा युयुधे तेन चण्डिकेत्यर्द्धश्लोको मन्त्रो न तु सर्वान्तिम इति भ्रमितव्यं, नियुद्धं खेतदेत्यादीनामसामञ्जस्यापत्तेः' ॥ * ॥ इति श्रीगुप्तवत्यां कात्यायनीतंत्रस्य पटलस्य व्याख्या० अथै तत्संग्रहश्लोकाः सार्द्धत्रयोविंशतिः । अथर्षिवाक् पुरा शुम्भेत्यादयः श्लोककास्तु षट् । देवा ऊचुर्नमो देव्या इत्यादिश्लोकपञ्चकम् ॥ (ततः) श्लोकैकविंशत्या तुर्य्याङ्घ्रियोगोत्था एकविंशतिः । भवन्ति विष्णुमायादि भ्रान्त्यन्तपदगर्भिताः ॥ प्रथमा विष्णुमायोक्ता द्वितीया चेतना ततः । बुद्धिर्निद्राक्षुधाच्छायाशक्तिस्तृष्णा तथाष्टमी । क्षान्तिर्जातिरथो लज्जा शान्तिःश्रद्धा त्रयोदशी ॥ कान्तिर्लक्ष्मीस्ततो वृत्तिः स्मृतिरूपेण संस्थिता । दया तुष्टिस्तथा माता भ्रान्तिरित्येकविंशतिः ॥ स्वस्थानवृद्धपालिः प्रोक्तास्त्रिषष्ठिर्मनवः स्मृताः । इन्द्रियाणामिति श्लोक एको मन्त्रस्तदुत्तरः ॥ चितिरूपेण येत्येव प्राग्वन्मन्त्रत्रयात्मकः । स्तुतासुरैरिति श्लोकादृषि-

For Private and Personal Use Only

'अत्र लघ्वीति पदस्य लघ्वन्ता इत्यर्थः सरस्वतीशब्दो देवीविशेषणं तृतीयचरित्रे तस्या एव देवतात्वद्योतनार्थं संख्यापिण्डकथनन्त्वध्यायसमाप्तिद्योतकम्' ॥ ऋष्युक्तिरित्याकर्ण्येति श्लोकास्त्वर ईरिताः । पुनर्ऋषि रुवाचेति तेनाज्ञप्त इति त्रयः श्लोकात्मकास्ततो मन्त्रा देव्युवाच ततः परम् ॥ दैत्येश्वरेण प्रहित इत्येकश्लोकमन्त्रकः ॥ अथर्षिवाकरमित्युक्तः सोऽभ्यधावदिति ह्यमी । श्लोकाद्वादशमन्त्रा स्युः षष्ठेऽध्याये तु संहताः ॥ चतुर्विंशति संख्या का देवताहुतयः क्रमात् । ऋष्युक्तिराज्ञप्तेत्याद्यास्त्रयोविंशतिमातरः ॥ ऋषिवाक्यं ततस्तावानीतौ द्वौ मातराविति । सप्तविंशतिसंख्याका भवन्त्याहुतयः प्रिये ॥ अत्राध्यायद्वये देवी धूम्राक्षीति प्रकीर्त्तिता । 'देवतामन्त्रयोरभेदान्मातृपदेन मन्त्रा एवोच्यन्ते' ॥ ऋषिश्चण्डे च निहते इत्याध्यायावसानकाः । त्रिषष्ठ्याहुतयः प्रोक्ता एकात्रार्धाहुतिर्मता ॥ रक्ताक्षी देवताष्टौ च महाशक्तयः प्रकीर्त्तिताः ॥ 'ऋष्याद्या अध्यायसमाप्तिपर्य्यन्तास्त्रिषष्टिमन्त्रास्तेष्वेकोऽर्द्धश्लोकमन्त्रएकऋषिरुवाचेतिमन्त्रएकषष्टिश्लोकमन्त्राः । अस्याध्यायस्य नवदेवताः, तेष्वेका रक्ताक्षी या चण्डिकाया ललाटफलकान्निष्पन्ना, अन्या ब्रह्मे-श-गुह-विष्णु-वराह-नृसिंह-शक्र-चण्डिकानां शक्तयोऽष्टावित्यर्थः । क्तिच् क्तौ च संज्ञायामिति शक्तेः क्तिचि कृदिकारादिति ङीषि शक्त्य इति रूपम् । स चार्धश्लोको 'मुखेन कालीजगृहे रक्तबीजस्य शोणितमिति, ततोऽसा वाजघानाथे-त्याद्युत्तरश्लोकषट्कसामञ्जस्यस्य तदभावेऽनुपपत्तेः, एतेन मन्त्रार्थग्रन्थानभिज्ञेनोक्तस्तेषां मातृगण इत्यय-

मर्द्धमन्त्वत्वेन नोपादेयः' ॥ राजा विचित्रमित्यादिश्लोकद्वयमथो ऋषिः । चकारकोपमतुलमित्याद्याः श्लोकरूपकाः । सप्तत्रिंशच्च विज्ञेया देवतामन्त्ररूपकाः । इत्येकचत्वारिंशत् स्युर्नवमाहुतयः शिवे ॥ देवता भैरवी तारा शृणु गोप्यं वरानने । ऋषिर्निशुम्भं निहतमिति श्लोकावुभौ मनू ॥ ततो देवी वचः प्रोक्तमिकैवाहमिति द्वयम् । देव्युवाच ततश्चाहं बिभूत्येत्येकलो मनुः ॥ ऋषिस्ततः प्रवहते सार्द्धा द्वाविंशतिर्मताः । द्वात्रिंशन्मनवः सर्वे तेष्वेकोर्द्धमनुर्मतः ॥ दशमे सिंहमारूढा शूलपाशविधारिणी । मुख्या चतुर्भुजा बाण चापहस्ता शुभेक्षणा ॥ 'एकल एकः तत्रापि सा निराधारा युयुधे तेन चण्डिकेत्यर्द्धश्लोको मन्त्रो न तु सर्वान्तिम इति भ्रमितव्यं, नियुद्धं खेतदेत्यादीनामसामञ्जस्यापत्तेः' ॥ * ॥ इति श्रीगुप्तवत्यां कात्यायनीतंत्रस्य पटलस्य व्याख्या० अथै तत्संग्रहश्लोकाः सार्द्धत्रयोविंशतिः । अथर्षिवाक् पुरा शुम्भेत्यादयः श्लोककास्तु षट् । देवा ऊचुर्नमो देव्या इत्यादिश्लोकपञ्चकम् ॥ (ततः) श्लोकैकविंशत्या तुर्य्याङ्घ्रियोगोत्था एकविंशतिः । भवन्ति विष्णुमायादि भ्रान्त्यन्तपदगर्भिताः ॥ प्रथमा विष्णुमायोक्ता द्वितीया चेतना ततः । बुद्धिर्निद्राक्षुधाच्छायाशक्तिस्तृष्णा तथाष्टमी । क्षान्तिर्जातिरथो लज्जा शान्तिःश्रद्धा त्रयोदशी ॥ कान्तिर्लक्ष्मीस्ततो वृत्तिः स्मृतिरूपेण संस्थिता । दया तुष्टिस्तथा माता भ्रान्तिरित्येकविंशतिः ॥ स्वस्थानवृद्धयात्रिः प्रोक्तास्त्रिषष्ठिर्मनवः स्मृताः । इन्द्रियाणामिति श्लोक एको मन्त्रस्तदुत्तरः ॥ चितिरूपेण येत्येव प्राग्वन्मन्त्रत्रयात्मकः । स्तुतासुरैरिति श्लोकादृषि-

रेवंस्तवादिकाः ॥ श्लोकाः सप्तदशाथर्षिर्निशम्येति मनुत्रयम् । दूतोक्तिर्देवि दैत्येति नवश्लोका ऋषेर्वचः ॥ इत्युक्ता सा तदेत्येकः श्लोको देवीवचस्ततः । सत्यमुक्तमिति श्लोकचतुष्कमथ दूतवाक् ॥ अवलिप्तेति चत्वारः श्लोका देव्यास्ततो वच एवमेतदिति द्वावित्येकोनत्रिंशदुत्तरं शतं मन्त्राः पञ्चमे षट्सप्ततिश्लोकमण्डिते ॥ अथर्षिरित्याकर्ण्येति चतुःश्लोकी ऋषेर्वचः । तेनाज्ञप्त इति श्लोकत्रयं देवीवचस्ततः । दैत्येश्वरेणेत्येकोऽथ ऋषिरित्युक्त इत्यमौ ॥ द्वादशेति मताः षष्ठे चतुर्विंशतिमन्त्रकाः । अथर्षिवाक्यमाज्ञप्ता इत्याद्यास्त्र्यध्य-विंशतिः ॥ ऋषिस्तावित्युभावित्थं सप्तमे सप्तविंशतिः । अथर्षिवाणी चण्डे चेत्यारभ्याभिजघानतम् ॥ इत्यन्ताः पञ्चपञ्चाशच्छ्लोका मन्त्रास्ततः परम् । मुखेन कालीजगृहे इत्यर्द्धः श्लोकमन्त्रकः ॥ ततोऽसाविति षट्श्लोकास्त्रिषष्टिश्चेत्थमष्टमे । राजा विचित्रमित्यादि श्लोकद्वयमथो ऋषिः ॥ चकारकोपमित्याद्याः सप्त-त्रिंशदुदीरिताः । इत्येकचत्वारिंशत्सुर्नवमाध्यायमन्त्रकाः ॥ ऋषिर्निशुम्भं निहतमिति द्वावम्बिका वचः । एकैवेति द्वयं देवी तत एकोऽहमित्यृषिः ॥ ततः प्रववृते युद्धमिति श्लोकास्त्रयोदश । तत्रापि सा निरा-धारेत्यर्द्धश्लोकात्मको मनुः ॥ नियुद्धं खे तदा दैत्य इत्याद्या मनवो नव । इत्येवं दशमेध्याये द्वाविंशन्मनवो मताः ॥ * ॥

अथ मन्त्रव्याख्या, पुरेति कश्यपाद्दन्वामुत्पन्नौ नमुचेर्ज्येष्ठौ शिवदत्तवरौ शुम्भनिशुम्भाविति पुराणान्तरे स्थितं, क्वचिद्देशेत्विहाध्याय आदित एव श्लोकत्रयमधिकं पठ्यते। पुरा शुम्भनिशुम्भाख्यावसुरौ घोरदर्शनौ। अप्राप्तयौवनावेव चेरतुस्तप उत्तमम्॥ वर्षाणामयुतं दिव्यं राजन् विस्मापनप्रदम्। निराहारौ यतात्मानौ पुष्करे लोकपावने॥ ततः प्रसन्नो भगवान् ब्रह्मालोकपितामहः। मनोभिलषितान् कामान् तयोः प्रादादनुत्तमान्॥ ततः शुम्भनिशुम्भाभ्यामसुराभ्यां शचीपतेरित्यादि। अन्यच्च शिववरोप्यनयोरुक्तः।

(अथ उत्तमचरित्रस्य रुद्र ऋषिः महासरस्वती देवता अनुष्टुप् छन्दः भीमाशक्तिः भ्रामरीवीजं सूर्य्यस्तत्वं महासरस्वतीप्रीत्यर्थे जपे विनियोगः।) ऋषिरुवाच। पुरा शुम्भनिशुम्भाभ्यामसुराभ्यां शचीपतेः। त्रैलोक्यं यज्ञभागाश्च हृता मदबलाश्रयात्॥१॥

यत्तु शुम्भशब्दं तालव्यादिं बहवः पठन्ति तच्चिन्त्यं दक्षिणामूर्त्तिसंहिताविरोधात्, तत्र हि ज्वालामालिनीनित्या प्रकरणे जातवेदसेसुनवामसोममित्यृगक्षरादिदेवता नामकथनावसरे जाग्रती तपिनी वेदगर्भा दहनरूपिणी सेन्दुखण्डा सुम्भहन्त्री नभश्चारिण्यनन्तरमिति पाठात् अतएव दन्त्यादित्वेनैव द्रविड़देशे पाठः संगच्छते। मदबलाश्रयादिति समाहारः अनुचिताहरणे मदो हेतुः स च विद्यामदो धनमद इत्यादिरीत्या बहुविधः बलं सैन्यं शारीरं तपसश्च, तदुभयसाधारणो हेतुः आश्रयः शिवदत्तवररूपः दुर्गस्थानादि(वर)रूपश्च॥१

सूर्य्यतां सूर्य्यधर्मकालादिपरिच्छेदरूपमधिकारं, त्रैलोक्यपदेन स्वर्गस्यापि क्रोड़ीकारादितरदिक्पालत्रयमेवाह कौवेरमिति ॥२॥ दैत्यदानवरक्षसामैकयूथ्यत्वेन निर्ऋतेर्वैरदायकत्वेनोपजीव्यत्वादीशानस्य च परित्यागेन विदिक्पालद्वयमेवाह तावेवेति चकारद्वयेन वा द्वयोर्ग्रहणम् ॥३॥ चतुर्थश्लोकोत्तरार्द्धस्थाने श्लोकचतुष्टयमधिकं परे पठन्ति 'तेषु तेष्वथधिष्ण्येषु लोकेषु च महीपते। स्वभृत्याः प्रथिता दैत्या अधिकारे नियोजिताः(१)

तावेव सूर्य्यतां तद्वदधिकारं तथैन्दवम्। कौवेरमथ याम्यञ्च चक्राते वरुणस्य च ॥ २ ॥ तावेव पवनर्द्धिञ्च चक्रतुर्वह्निकर्म च। ततो देवा विनिर्द्धूता भ्रष्टराज्याः पराजिताः ॥ ३ ॥ हृताधिकारास्त्रिदशास्ताभ्यां सर्वे निराकृताः। महासुराभ्यां तां देवीं संस्मरन्त्यपराजिताम् ॥ ४ ॥

ततो देवाः सहेन्द्रेण बिभ्राणा मानुषीं तनुम्। विचेरुरवनौ राजन् मनुजैः संगताः कृशाः(२)एवं निवसतां तत्र देवानाममितौजसाम्। गतमासीन्महाराज चत्वारिंशच्चतुर्युगम्(३)ततो देवाः सहेन्द्रेण ब्रह्मणा च समेत्य वै। दुर्गां भगवतीं भक्त्या संस्मरन्तो पराजिताम् (४) इति ॥ ४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तयास्माकमिति यथा शब्द इति शब्दपर्य्यायः प्रकारार्थकत्वात्॥५॥६॥ नमो देव्या इत्यथर्वशीर्षस्थो मन्त्रः, स्मेत्यव्ययं प्रार्थनायां वा लोट्॥ ७॥ रौद्रोरसविशेषस्तद्वतीरौद्रा मत्वर्थीयोऽच् धात्र्यै पोषकत्वादुपमात्रे सुखायै अभेदेन सुखवत्यै शोभनेन्द्रियायै वा ॥ ८॥ प्रणतावृद्धैर प्रणतानामावृद्धिरूपा प्रणतौ सत्या-

तयास्माकं वरोदत्तो यथापत्सुस्मृताखिलाः। भवतां नाशयिष्यामि तत्क्षणात् परमापदः॥ ५॥ इति कृत्वा मतिं देवा हिमवन्तं नगेश्वरम्। जग्मुस्तत्र ततो देवीं विष्णुमायां प्रतुष्टुवुः॥ ६॥ देवा ऊचुः। नमो देव्यै महादेव्यै शिवायै सततं नमः। नमः प्रकृत्यै भद्रायै नियताः प्रणतास्मताम्॥ ७॥ रौद्रायै नमो नित्यायै गौर्य्यै धात्र्यै नमो नमः। ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः॥ ८॥ कल्याण्यै प्रणतावृद्धैर सिद्धैर कूर्म्यैं नमो नमः। नैरृत्यै भूभृतां लक्ष्मैर सर्वाण्यै ते नमो नमः॥ ९॥

ऋद्धिरूपेति पदद्वयं वा, कूर्मस्य विष्णोः स्त्री कूर्मी कुः पृथिवी तद्रूपा ऊर्म्यो वीच्यो यस्यामिति वा। कुर्मं इति पाठे प्रणताः सन्तो वयं नमस्कुर्मं इत्यन्वय इति केचित्, भूभृतां गिरीणां राज्ञां वा॥ ९॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दुर्गाया इति चरणत्रयं वक्त्रवृत्तस्य चतुर्थचरणः पथ्यायाः पथ्यायुज्योजिर्गौ पिङ्गलसूत्रे युक्पदस्य जाति-व्यक्तिपक्षभेदेन द्वेधा हलायुधेन व्याख्यातस्य छन्दोभाष्यराजेऽस्माभिः समर्थनात् अतो न वृत्तभङ्ग इति भ्रमितव्यम् ॥ १० ॥ सौम्यान् रौद्रांश्चातिक्रान्तातिसौम्यातिरौद्रा, कृत्यै यत्नरूपार्थभावनायै वेदोक्तधर्म-रूपेणेति यावत् अतएव जगत्प्रतिष्ठेति विशेषणं धर्मो विश्वस्य जगतः प्रतिष्ठेति श्रुतेः ॥ ११ ॥ विष्णुमायेति,

दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै। ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥ १० ॥ अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः। नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥ ११ ॥ या देवी सर्वभूतेषु विष्णुमायेति शब्दिता। नम-स्तस्यै नमस्तस्यै नमस्तस्यै नमोनमः ॥ १२ ॥

वराहपुराणे मेघवृष्टिशस्योत्पत्त्यादीनि बहूनि कार्य्याणि विष्णुमायात्मकत्वेन महता ग्रन्थेन प्रदर्शितानि, कालिकापुराणे तु 'अव्यक्तं व्यक्तरूपेण रजःसत्वतमोगुणैः। विभज्य यार्थं कुरुते विष्णुमायेति सोच्यते' इति संक्षिप्य स एवार्थः कथितः। इह लक्ष्म्या उत्तरं धृतिस्तुष्ट्युत्तरं पुष्टिश्चेति द्वयं तन्त्रान्तरसंमतं, ये तु कीर्त्तिप्रज्ञा-मेधाश्रुतिस्फूर्त्तिप्रभृतयो बहवो मन्त्राः पठ्यन्ते। ते तु तन्त्रत्रयस्यासम्मताः, स्फूर्त्ति मेधे सम्मते एवेत्यन्ये, प्रकृततन्त्रेत्वेकविंशतिरेवेति वेद्यम् ॥ १२ ॥

For Private and Personal Use Only

चेतना जीवनाड़ी ॥ १३ ॥ बुद्धिरध्यवसायः ॥ १४ ॥ निद्रा बाह्येन्द्रियव्यापारोपरमानुकूलोविकारः ॥ १५ ॥

या देवी सर्वभूतेषु चेतनेत्यभिधीयते। नमस्तस्यै० ॥ १३ ॥ या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता। नमस्तस्यै० ॥ १४ ॥ या देवी सर्वभूतेषु निद्रारूपेण संस्थिता। नमस्तस्यै० ॥ १५ ॥ या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता नमस्तस्यै० ॥ १६ ॥ या देवी सर्वभूतेषु छायारूपेण संस्थिता। नमस्तस्यै० ॥ १७ ॥ या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता। नमस्तस्यै० ॥ १८ ॥ या देवी सर्वभूतेषु तृष्णारूपेण० नमस्तस्यै० ॥ १९ ॥

क्षुधा बुभुक्षोत्पादकौदर्य्याग्निविकारः ॥ १६ ॥ छाया प्रतिवस्तुविद्यमाना तत्समानानातपवती ॥ १७॥ शक्तिः सामार्थ्यम् ॥ १८ ॥ तृष्णालोभः ॥ १९ ॥

क्षान्तिः क्षमा ॥ २० ॥ जातिर्जन्म ब्रह्मसत्ता वा ॥ २१ ॥ लज्जा त्रपा ॥ २२ ॥ शान्तिः शमः ॥ २३ ॥ श्रद्धा

या देवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता । नमस्तस्यै० ॥ २० ॥ या देवी सर्वभूतेषु जातिरूपेण संस्थिता । नमस्तस्यै० ॥ २१ ॥ या देवी सर्वभूतेषु लज्जारूपेण संस्थिता । नमस्तस्यै० ॥ २२ ॥ या देवी सर्वभूतेषु शान्तिरूपेण संस्थिता । नमस्तस्यै० ॥ २३ ॥ या देवी सर्वभूतेषु श्रद्धारूपेण संस्थिता । नमस्तस्यै० ॥२४॥ या देवी सर्वभूतेषु कान्तिरूपेण संस्थिता । नमस्तस्यै० ॥ २५ ॥ या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता । नमस्तस्यै० ॥ २६ ॥ या देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता । नमस्तस्यै० ॥ २७ ॥ या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता । नमस्तस्यै० ॥ २८ ॥

फलावश्यम्भावनिश्चयः ॥ २४ ॥ कान्तिर्लावण्यमिच्छा वा ॥ २५ ॥ लक्ष्मी सम्पत्तिः ॥ २६ ॥ वृत्तिर्जीविकामानता वा ॥ २७ ॥ स्मृतिः संस्कारजन्यं ज्ञानम् ॥ २८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दया निरुपाधिकपरदुःखप्रहाणेच्छा ॥२९॥ तुष्टिः सन्तोषः ॥३०॥ माता प्रमाता ॥३१॥ भ्रान्तिरप्रमा ॥३२॥

या देवी सर्वभूतेषु दयारूपेण संस्थिता। नमस्तस्यै० ॥ २९ ॥ या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता। नमस्तस्यै० ॥३०॥ या देवी सर्वभूतेषु मातृरूपेण संस्थिता। नमस्तस्यै० ॥ ३१ ॥ या देवी सर्वभूतेषु भ्रान्तिरूपेण संस्थिता। नमस्तस्यै० ॥३२॥ इन्द्रियाणामधिष्ठात्री भूतानां चाखिलेषु या। भूतेषु सततं तस्यै व्याप्त्यै देव्यै नमो नमः ॥ ३३ ॥ चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत्। नमस्तस्यै० ॥ ३४ ॥ सुतासुरैः पूर्वमभीष्टसंश्रयात्तथा सुरेन्द्रेण दिनेषु सेविता। करोतु सा नः शुभहेतुरीश्वरी शुभानि भद्राण्यभिहन्तु चापदः ॥ ३५ ॥

भूतानां पृथिव्यादीनां, भूतेषु प्राणिषु ॥ ३३ ॥ चितिर्निर्विषयकसंवित् ॥ ३४ ॥ पूर्वं महिषासुरकाले दिनेषु प्रतिदिनम् ॥ ३५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

३६ ॥ ३७ ॥ शरीरकोशतस्येति पुरा किल पार्वत्याः सम्बोधनं कालीति पदेन शिवः कदाचित् कृतवान् तच्छ्रुत्वा स्वीयनैल्यं मर्मस्थलेनोद्घाटितमिति धिया 'भूयसी च तवाऽप्रीतिरगौर इति मे वपुः । क्रीडोक्तिरपि कालीति घटेत कथमन्यथे'त्यादिकमुक्त्वा कुपिता पार्वती शिवेन यथाकथञ्चित् समाहितापि स्वकीय-

या साम्प्रतं चोद्धतदैत्यतापितै रस्माभिरीशा च सुरैर्नमस्य ते । या च स्मृता तत्-क्षणमेव हन्ति नः सर्वापदो भक्तिविनम्रमूर्त्तिभिः ॥ ३६ ॥ ऋषिरुवाच । एवं स्तवादियुक्तानां देवानां तत्र पार्वती । स्नातुमभ्याययौ तोये जाह्नव्या नृप-नन्दन ! ॥ ३७ ॥ साऽब्रवीत्तान् सुरान् सुभ्रूर्भवद्भिस्तूयतेऽत्र का । शरीरकोश-तश्चास्याः समुद्भूताऽब्रवीच्छिवा ॥ ३८ ॥

नीलरूपकोशनिरसनेच्छया शिवाज्ञयैव गौतमाश्रमं प्राप्य तत्र तपस्तप्त्वा भुजङ्गी कञ्चुकमिव कृष्णवर्णं कोशमुत्सृज्य गौरवर्णयुक्तशरीरेण गौरीति प्रसिद्धिं प्राप्य पुनः शिवसमीपं प्राप्ता । उत्सृष्टात् कोशादति-सुन्दरी नीलवर्णा काचित् पार्वत्या विभूतिरिव कन्यका प्रादुर्भूता सेयं पार्वत्या सहैव सञ्चरन्ती प्रत्युत्तरमाह-

For Private and Personal Use Only

त्यर्थः न तु साम्प्रतमेव सा प्रादुर्भूतेति मन्तव्यं, शिवपुराणे वायुसंहितायामीदृशस्यैव कथानकस्याम्नानात्
'दैत्यौ शुम्भनिशुम्भाख्यौ भ्रातरौ संबभूवतुः। ताभ्यां तपोबलाल्लब्धं ब्रह्मणः परमेष्ठिनः॥ अवध्यत्वं जग-
स.टी. त्यस्मिन् पुरुषैरखिलैरपि। अयोनिजा तु या कन्यास्त्वङ्गकोशसमुद्भवा॥ अजातपुंस्पर्शरतिरविलङ्घ्यपरा-
६२ क्रमा। तया तु नौ वधः संख्ये तस्यां कामाभिभूतयोः॥ इति चाभ्यर्थितो ब्रह्मा ताभ्यां प्राह तथास्त्विति'

स्तोत्रं ममैतत् क्रियते शुम्भदैत्यनिराकृतैः। देवैः समेतैः समरे निशुम्भेन पराजितैः॥ ३९॥ शरीरकोशाद्यत्तस्याः पार्वत्या निःसृताम्बिका। कौशिकीति समस्तेषु ततो लोकेषु गीयते॥ ४०॥

इत्यादिना। तथा तत्रैव का सा कौशिकीति शिवेन पृष्टा देव्युवाच, किं देवेन न सा दृष्टा या सृष्टा कौशिकी-मया॥ तादृशी कन्यका लोके न भूता न भविष्यति, तस्या वीर्यं बलं विद्धि निलयं विजयं तथा॥ शुम्भस्य च निशुम्भस्य मारणं च तया रणे। प्रत्यक्षफलदानं च लोकाय भजते सदा। देवानां रक्षणं चैव ब्रह्मा विज्ञाप-यिष्यतीत्याद्युक्तम्॥ ३८॥ ३९॥ ४०॥

तस्या विनिर्गतायामित्विति तस्या इति पञ्चमी यामित्विति तु तच्छब्दापेक्षितो यच्छब्दः प्रथमान्तः, परदेवता सकाशाद्या तु विनिर्गता कौशिकी सापि पार्वत्येव परन्तु कृष्णाभूदतः कालिकेत्याख्याता सती हिमाचल एव निखिलदेवप्रार्थितस्थाने तिष्ठति न पुनः स्नानाद्यर्थं ततो निर्गत्य गतेत्यर्थः, देवेषु सुवत्सु सत्सु तं स्तवमङ्गीकृतवत्याः कौशिक्यास्तानुपेक्ष्यान्यत्र गमनस्यानुचितत्वादिति भावः, परदेवता तु तां तत्रैवावस्थाप्य स्नानार्थं गतेति त्वर्थाल्लभ्यते, तदुक्तं वायुसंहितायां 'तत्कोशं सहसोत्सृज्य गौरी सा समजायत। तत्कोशादात्मनोत्सृष्टात् कौशिकी नाम नामतः॥ काली, कालाम्बुदप्रख्या कन्यका समपद्यते'त्यादिना। यदा तु

तस्यां विनिर्गतायान्तु कृष्णाऽभूत् सापि पार्वती। कालिकेति समाख्याता हिमाचलकृताश्रया ॥ ४१ ॥

प्रकृतश्लोके तस्यामिति विनिर्गतायामिति च पदद्वयं सप्तम्यन्तमेव बहुपुस्तकेषूपलम्भात् प्रामाणिकमित्याग्रहस्तदा तस्यामिति पदं परदेवता परं कृत्वा गौर्यां स्नातुं वा स्नात्वा कैलासं वा विनिर्गतायां सत्यां कृष्णा या पार्वत्यभूत् सा हिमाचल एव कालिका नाम्नी उवासेति कौशिक्या एव कार्ष्ण्यप्रवासौ व्याख्येयौ, शिवपुराणादिषु कौशिकीनिर्गमनोत्तरं परदेवताया गौरवर्णप्राप्तेः कथिताया विरोधेन परदेवतापि कृष्णाजातेति व्याख्याया अनुचितत्वादित्यवधेयम् ॥ ४१ ॥

परं रूपमिति रूपान्तरं कौशिकी नामकमित्यर्थः, उत्कृष्टं लावण्यं वा, स्थूलं सूक्ष्मं परं चेति त्रिविधदेवता-

ततोऽम्बिकां परं रूपं बिभ्राणां सुमनोहरम्। ददर्श चण्डोमुण्डश्च भृत्यौ शुम्भ-

स.टी. निशुम्भयोः ॥ ४२ ॥ ताभ्यां शुम्भाय चाख्याता अतीव सुमनोहरा। काप्यास्ते

६४ स्त्री महाराज! भासयन्ती हिमाचलम् ॥४३॥ नैव तादृक् क्वचिद्रूपं दृष्टं केनचिदु-

त्तमम्। ज्ञायतां काप्यसौ देवी गृह्यतां चासुरेश्वर! ॥४४॥ स्त्रीरत्नमतिचार्वङ्गी

द्योतयन्ती दिशस्त्विषा। सा तु तिष्ठति दैत्येन्द्र! तां भवान् द्रष्टुमर्हति ॥ ४५ ॥

यानि रत्नानि मणयो गजाश्वादीनि वै प्रभो!। त्रैलोक्ये तु समस्तानि साम्प्रत

भान्ति ते गृहे ॥ ४६ ॥ ऐरावतः समानीतो गजरत्नं पुरन्दरात्। पारिजाततरु-

श्चायं तथैवोच्चैः श्रवाहयः ॥ ४७ ॥

रूपश्लेषाच्चरमरूपमित्यर्थः। तत्पक्षे सुमनोहरं 'सर्वे देवा यत्रैकं भवन्ती'ति श्रुतिसिद्धसर्वदेवतातादात्म्यवत्।
चण्ड इति तु चण्डीपति परमिति तु रहस्यम् इतरत् प्रकटार्थं परमेव ॥४२॥४३ ॥४४॥४५॥४६॥४७॥

विमानं हंससंयुक्तमेतत्तिष्ठति तेऽङ्गणे । रत्नभूतमिहानीतं यदासीद्वेधसोऽद्भुतम् ॥ ४८
निधिरेष महापद्मः समानीतो धनेश्वरात् । किञ्जल्किनीं ददौ चाब्धिर्माला-
मम्लानपङ्कजाम् ॥ ४९ ॥ छत्रं ते वारुणं गेहे काञ्चनस्रावि तिष्ठति । तथायं
स्यन्दनवरो यः पुरासीत् प्रजापतेः ॥ ५० ॥ मृत्योरुत्क्रान्तिदा नाम शक्तिरीश !
त्वया हृता । पाशः सलिलराजस्य भ्रातुस्तव परिग्रहे ॥ ५१ ॥ निशुम्भस्याब्धि-
जाताश्च समस्ता रत्नजातयः । वह्निरपि ददौ तुभ्यमग्निशौचे च वाससी ॥ ५२ ॥
एवं दैत्येन्द्र! रत्नानि समस्तान्याहृतानि ते। स्त्रीरत्नमेषा कल्याणी त्वया कस्मान्न
गृह्यते ॥ ५३ ॥ ऋषिरुवाच । निशम्येति वचः शुम्भः स तदा चण्डमुण्डयोः ।
प्रेषयामास सुग्रीवं दूतं देव्यामहासुरम् ॥ ५४ ॥

॥ ४८ ॥ ४९॥५०॥५१॥ अग्निशौचे इति सदैवाग्निवन्निर्मले, अग्निप्रक्षेपापनेयमले वा॥ ५२ ॥ ५३ ॥ ५४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति चेति चेति स्वोक्तानुनयनैष्ठुर्य्यं वचसोऽभिनीय प्रदर्शनं, लघु क्षिप्रमभ्येतीत्यनेनान्वेति तेनोत्कण्ठाति-

स॰टी॰ इति चेति च वक्तव्या सा गत्वा वचनान्मम। यथा चाभ्येति संप्रीत्या तथा कार्य्यं

६५ त्वया लघु ॥५५॥ स तत्र गत्वा यत्रास्ते शैलोद्देशेऽतिशोभने। सा देवी तां ततः

प्राह श्लक्ष्णं मधुरया गिरा ॥ ५६ ॥ दूत उवाच। देवि! दैत्येश्वरः शुम्भस्त्रैलोक्ये

परमेश्वरः। दूतोऽहं प्रेषितस्तेन त्वत्सकाशमिहागतः ॥ ५७ ॥ अव्याहताज्ञः

सर्वासु यः सदा देवयोनिषु। निर्जिताखिलदैत्यारिः स यदाह शृणुष्व तत् ॥५८॥

मम त्रैलोक्यमखिलं मम देवावशानुगाः। यज्ञभागानहं सर्वानुपाश्नामि पृथक्

पृथक् ॥ ५९ ॥

शयध्वनिः ॥ ५५ ॥ ५६ ॥ देवीति। राजा भट्टारको देवस्तस्य स्त्रीति सिद्धवत्काराभिप्रायेण सम्बो-

धनम् ॥ ५७ ॥ ५८ ॥ पृथक् पृथक् एकोपि तत्तद् देवाधिकाररूपोपाधिभेदेन ॥ ५९ ॥

For Private and Personal Use Only

त्रैलोक्ये वररत्नानि मम वश्यान्यशेषतः। तथैव गजरत्नानि हृत्वा देवेन्द्रवाहनम् ॥ ६० ॥ क्षीरोदमथनोद्भूतमश्वरत्नं ममामरैः। उच्चैःश्रवससंज्ञन्तु प्रणिपत्य-समर्पितम् ॥ ६१ ॥ यानि चान्यानि देवेषु गन्धर्वेषूरगेषु च। रत्नभूतानि भूतानि तानि मय्येव शोभने ! ॥ ६२ ॥ स्त्रीरत्नभूतां त्वां देवि ! लोके मन्यामहे वयम्। सात्वमस्मानुपागच्छ यतो रत्नभुजो वयम् ॥६३॥ मां वा ममानुजं वापि निशुम्भ-मुरुविक्रमम्। भज त्वं चञ्चलापाङ्गि ! रत्नभूतासि वै यतः ॥६४॥ परमैश्वर्य्यमतुलं प्राप्स्यसि मत्परिग्रहात्। एतद्बुद्ध्या समालोच्य मत्परिग्रहतां व्रज ॥ ६५ ॥ ऋषिरुवाच। इत्युक्ता सा तदा देवी गम्भीरान्तःस्मिता जगौ। दुर्गा भगवती भद्रा ययेदन्धार्य्यते जगत् ॥ ६६ ॥ देव्युवाच। सत्यमुक्तं त्वया नात्र मिथ्या किञ्चित्त्वयोदितम्। त्रैलोक्याधिपतिः शुम्भो निशुम्भश्चापि तादृशः ॥ ६७ ॥

॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥

अल्पबुद्धित्वात् स्वस्वरूपापेक्षया मनोवृत्तिरूपाया बुद्धेरल्पत्वस्य स्वाभाविकत्वादेव ॥ ६८ ॥ पुरुषत्वं प्राप्ताया:
स्वस्या एव रूपं पाठान्तरेण वर्णयति यो मां जयतीति ; सृष्टिकल्पोपाधिक: परशिवो भव इत्युच्यते, तद्वदा-
 चरिष्यन् भविष्यन् लोको जन: शिव एव, तस्मिन् तत्सङ्घ मध्ये 'असंख्याता: सहस्राणि ये रुद्रा' इति श्रुत्यां

किं त्वत्र यत् प्रतिज्ञातं मिथ्या तत् क्रियते कथम्। श्रूयतामल्पबुद्धित्वात्
प्रतिज्ञा या कृता पुरा ॥ ६८ ॥ यो मां जयति संग्रामे यो मे दर्पं व्यपोहति।
यो मे प्रतिबलो लोके समे भर्त्ता भविष्यति ॥ ६९ ॥ तदागच्छतु शुम्भोऽत्र
निशुम्भो वा महासुर:। मां जित्वा किं चिरेणात्र पाणिं गृह्णातु मे लघु ॥ ७० ॥

तेषां बहुत्वात् तेष्वन्यतमो भर्त्तास्तीत्यर्थ:। संग्रामदर्पशब्दौ ग्राम्यधर्मकन्दर्पव्यञ्जकौ, ग्रामे सम्यक्त्व तद्धर्मस्यैव पौष्कल्यात्मकत्वात् ग्रामशब्दोयं बह्वर्थ: इति भाष्यात् सांग्रहणीं निर्वपेद् ग्रामकाम इति वशीकारार्थे प्रयोगात्तस्य च परस्परसामरस्य एव पर्य्यवसानात्, कन्दर्पो दर्पकोनङ्ग इति कोशात्। प्रतिबल: प्रत्यगात्मा ॥ ६९ ॥ पाणिं गृह्णातु मद्धस्तचपेटां स्वीकारो त्विति ध्वनि:, लघुपदेन हननोत्कण्ठातिशय ध्वनि: ॥ ७० ॥

॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ तत्र गच्छत मकारे विन्दुलोपश्छन्दोऽनुरोधात् सैनिकहिताभिप्रायकं बहु-

विच्छिन्नबाहुशिरसः कृतास्तेन तथापरे। पपौ च रुधिरं कोष्ठादन्येषां धुत-केसरः ॥ १४ ॥ क्षणेन तद्बलं सर्वं क्षयं नीतं महात्मना। तेन केसरिणा देव्या वाहनेनातिकोपिना ॥ १५ ॥ श्रुत्वा तमसुरं देव्या निहतं धूम्रलोचनम्। बलञ्च क्षयितं कृत्स्नं देवी केसरिणा ततः ॥ १६ ॥ चुकोप दैत्याधिपतिः शुम्भः प्रस्फु-रिताधरः। आज्ञापयामास च तौ चण्डमुण्डौ महासुरौ ॥ १७ ॥ हे चण्ड! हे मुण्ड! बलैर्बहुलैः परिवारितौ। तत्र गच्छत गत्वा च सा समानीयतां लघु॥१८ केशेष्वाकृष्य बद्ध्वा वा यदि वः संशयो युधि। तदा शेषायुधैः सर्वैरसुरैर्विनिहन्य-ताम् ॥ १९ ॥

वचनं वा उत्तरश्लोके व इति दर्शनात्, उत्तराध्याये आज्ञप्तास्त इत्युक्तेश्च ॥ १८ ॥ १९ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथाम्बिकामिति अथवा अम्बिकां जीवन्तीमेव बध्वा गृहीत्वागम्यतामित्यर्थः, अथ हननानन्तरं बध्वा

तस्यां हतायां दुष्टायां सिंहे च विनिपातिते। शीघ्रमागम्यतां बद्धा गृहीत्वा तामथाम्बिकाम् ॥ २० ॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये धूम्रलोचनवधो नाम षष्ठोऽध्यायः ॥ ६ ॥

शवमेव बध्वेत्यर्थः इति केचित्। इह चत्वार उवाचमन्त्राः ॥ २० ॥ इति श्रीगुप्तवत्यां मन्त्रव्याख्याने षष्ठोऽध्यायः ॥ ६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ऋषिरुवाच । आज्ञप्तास्ते ततो दैत्याश्चण्डमुण्डपुरोगमाः । चतुरङ्गबलोपेता ययुरभ्युद्यतायुधाः ॥१॥ ददृशुस्ते ततो देवीमीषद्धासां व्यवस्थिताम् । सिंहस्योपरि शैलेन्द्रशृङ्गे महति काञ्चने ॥ २ ॥ ते दृष्ट्वा तां समादातुमुद्यमं चक्रुरुद्यताः । आकृष्टचापासिधरास्तथान्ये तत्समीपगाः ॥ ३ ॥ ततः कोपं चकारोच्चैरम्बिका तानरीन् प्रति । कोपेन चास्यावदनं मसीवर्णमभूत्तदा ॥ ४ ॥ भ्रुकुटीकुटिलात्तस्या ललाटफलकाद् द्रुतम् । काली करालवदना विनिष्क्रान्तासिपाशिनी ॥५॥ विचित्रखट्वाङ्गधरा नरमालाविभूषणा । द्वीपिचर्म्मपरीधाना शुष्कमांसातिभैरवा ॥६॥ अतिविस्तारवदना जिह्वाललनभीषणा । निमग्ना रक्तनयना नादापूरितदिङ्मुखा ॥ ७ ॥ सा वेगेनाभिपतिता घातयन्ती महासुरान् । सैन्ये तत्र सुरारीणामभक्षयत तद्बलम् ॥ ८ ॥

॥१॥२॥३॥४॥५॥ खट्वाङ्गं दण्डारोपितनरशिरस्कं खट्वापाद एव वा, द्वीपिचर्म वैयाघ्रकृत्तिः ॥६॥ ७ ॥ ८ ॥

For Private and Personal Use Only

स.टी.
७०

पार्ष्णिग्राहाङ्कुशग्राहियोधघण्टासमन्वितान्। समादायैकहस्तेन मुखे चिक्षेप वारणान् ॥ ९ ॥ तथैव योधं तुरगैरथं सारथिना सह। निक्षिप्य वक्त्रे दशनैश्चर्वयन्त्यतिभैरवम्॥१०॥ एकं जग्राह केशेषु ग्रीवायामथ चापरम्। पादेनाक्रम्य चैवान्यमुरसान्यमपोथयत्॥ ११ ॥ तैर्मुक्तानि च शस्त्राणि महास्त्राणि तथासुरैः। मुखेन जग्राह रुषा दशनैर्मथितान्यपि ॥ १२ ॥ बलिनां तद्बलं सर्वमसुराणां महात्मनाम्। ममर्दाऽभक्षयच्चान्यानन्यांश्चाताडयत्तथा ॥ १३ ॥ असिना निहताः केचित् केचित् खट्वाङ्गताड़िताः। जग्मुर्विनाशमसुरा दन्ताग्राभिहतास्तथा ॥१४॥ क्षणेन तद्बलं सर्वमसुराणां निपातितम्। दृष्ट्वा चण्डोभिदुद्राव तां कालीमतिभीषणाम् ॥ १५ ॥ शरवर्षैर्महाभीमैर्भीमाक्षीं तां महासुरः। छादयामास चक्रैश्च मुण्डः क्षिप्तैः सहस्रशः ॥ १६ ॥

॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥

॥ १७ ॥ १८ ॥ उत्थाय चेति। उत्थाय्येत्यर्थः, महासिं महाखड्गं हं इति कोपोक्तिः एतच्छ्लोकोत्तरं क्वचिन्न

तानि चक्राण्यनेकानि विशमानानि तन्मुखम्। बभुर्यथार्कबिम्बानि सुबहूनि घनोदरम् ॥ १७ ॥ ततो जहासातिरुषा भीमं भैरवनादिनी। काली कराल-वक्त्रान्तर्दुर्दर्शदशनोज्ज्वला ॥ १८ ॥ उत्थाय च महासिं हं देवीचण्डमधावत। गृहीत्वा चास्यकेशेषु शिरस्तेनासिनाऽच्छिनत् ॥ १९ ॥ अथ मुण्डोऽभ्यधावत्तां दृष्ट्वा चण्डं निपातितम्। तमप्यपातयद्भूमौ सा खड्गाभिहतं रुषा ॥ २० ॥ हतशेषं ततः सैन्यं दृष्ट्वा चण्डं निपातितम्। मुण्डञ्च सुमहावीर्य्यं दिशो भेजे भयातुरम् ॥२१॥ शिरश्चण्डस्य काली च गृहीत्वा मुण्डमेव च। प्राह प्रचण्डाट्ट-हासमिश्रमभ्येत्यचण्डिकाम् ॥ २२

शिरसि दैत्येन्द्रश्चक्रे नादं सभैरवं तेन नादेन महता त्रासितं भुवनत्रयमित्येकः श्लोकोऽधिकः क्वचित्पठ्यते ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥

मया तवात्रेति युद्धस्य यज्ञत्वेन रूपकबलाच्छुम्भनिशुम्भयोरपि चण्डमुण्डवदुपहारयोग्यमहापशुत्वध्वननेन

स.टी.
७१

मया तवात्रोपहृतौ चण्डमुण्डौ महापशू। युद्धयज्ञे स्वयं शुम्भं निशुम्भञ्च
हनिष्यसि ॥ २३ ॥ ऋषिरुवाच। तावानीतौ ततो दृष्ट्वा चण्डमुण्डौ महासुरौ।
उवाच कालीं कल्याणी ललितं चण्डिका वचः ॥ २४ ॥ यस्माच्चण्डञ्च मुण्डञ्च
गृहीत्वा त्वमुपागता। चामुण्डेति ततो लोके ख्याता देवी भविष्यसि ॥ २५ ॥
इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये चण्डमुण्डवधो
नाम सप्तमोध्यायः ॥ ७ ॥

पूर्वार्द्धोक्तविशेषणयोरिहाप्यन्वयः सूचितः तेन एवमेतद्बली शुम्भ इति पाञ्चमिकश्लोकध्वन्यार्थस्य स्पष्टमिद-
मुपबृंहणम् ॥ ॥ २३ ॥ २४ ॥ २५ । इति गुप्तवत्यां मन्त्रव्याख्याने सप्तमोऽध्यायः ॥ ७ ॥

॥ १ ॥ २ ॥ कम्बूनां कोटिशतकानां चतुरा च सा अशीतिश्चतुराशीतिः ॥ ३ ॥ कोटिवीर्य्याणि धौम्राः

ऋषिरुवाच । चण्डे च निहते दैत्ये मुण्डे च विनिपातिते । बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वरः ॥ १ ॥ ततः कोपपराधीनचेताः शुम्भः प्रतापवान् । उद्योगं सर्वसैन्यानां दैत्यानामादिदेशह ॥ २ ॥ अद्य सर्वबलैर्दैत्याः षड़शीतिरुदायुधाः । कम्बूनां चतुराशीतिर्निर्यान्तु स्वबलैर्वृताः ॥ ३ ॥ कोटिवीर्य्याणि पञ्चाशदसुराणां कुलानि वै । शतं कुलानि धौम्राणां निर्गच्छन्तु ममाज्ञया ॥ ४ ॥ कालका दौर्हृदा मौर्य्याः कालकेयास्तथासुराः । युद्धाय सज्जानिर्य्यान्तु आज्ञया त्वरिता मम ॥५॥ इत्याज्ञाप्यासुरपतिः शुम्भो भैरवशासनः । निर्जगाम महासैन्यसहस्रै-र्बहुभिर्वृतः ॥ ६ ॥

कालकादयश्च कुलनामानि ॥ ४ ॥ ५ ॥ ६ ॥

॥ ७ ॥ उपबृंहयत् आगमशास्त्रत्वादडऽभावः ॥ ८ ॥ 'घण्टानां' तन्नादानां कर्म्मणि षष्ठी। जिग्ये

स.टी. आयान्तीं चण्डिका दृष्ट्वा तत्सैन्यमतिभीषणम्। ज्यास्वनैः पूरयामास धरणी-
७२ गगनान्तरम् ॥ ७ ॥ ततः सिंहो महानादमतीव कृतवान्नृप!। घण्टास्वनेन तन्नाद-
मम्बिका चोपबृंहयत् ॥ ८ ॥ धनुर्ज्यासिंहघण्टानां नादापूरितदिङ्मुखा। निनादै-
र्भीषणैः काली जिग्ये विस्तारितानना ॥ ९ ॥ तन्निनादमुपश्रुत्य दैत्यसैन्यैश्चतु-
र्दिशम्। देवी सिंहस्तथा काली सरोषैः परिवारिता: ॥ १० ॥ एतस्मिन्नन्तरे भूप!
विनाशाय सुरद्विषाम्। भवायामरसिंहानामतिवीर्य्यबलान्विता:॥ ११॥ ब्रह्मेश गुह-
विष्णूनां तथेन्द्रस्य च शक्तयः। शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चण्डिकां ययुः॥१२॥ यस्य
देवस्य यद्रूपं यथा भूषणवाहनम्। तद्वदेव हि तच्छक्तिरसुरान् योद्धुमाययौ १३ हंस-
युक्तविमानाग्रे साक्षसूत्रकमण्डलुः। आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते १४

जितवती ॥९॥ सरोषैः कुपितैः स इति सिंहपरं भिन्नपदं वा ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥

For Private and Personal Use Only

॥ १५ ॥ १६ ॥ शङ्खचक्रेति शार्ङ्गपदेन बाणा अप्युपलक्ष्यन्ते बाहुभिर्गरुडारूढा शङ्खचक्रगदासिनी शार्ङ्गबाणधरायाता वैष्णवीरूपधारिणीति वामनपुराणात् अतएव षड्भजेयं, केचित्तु अभ्युपाबाहुमूलं स्यादिति

माहेश्वरी वृषारूढा त्रिशूलवरधारिणी । महाहिवलया प्राप्ता चन्द्ररेखाविभूषणा ॥ १५ ॥ कौमारी शक्तिहस्ता च मयूरवरवाहना । योद्धुमभ्याययौ दैत्यानम्बिका गुहरूपिणी ॥ १६ ॥ तथैव वैष्णवी शक्तिर्गरुडोपरिसंस्थिता । शङ्खचक्रगदाशार्ङ्गखड्गहस्ताभ्युपाययौ ॥ १७ ॥ यज्ञवाराहमतुलं रूपं या बिभ्रती हरेः । शक्तिः साप्याययौ तत्र वाराहीं बिभ्रती तनुम् ॥ १८ ॥ नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः । प्राप्ता तत्र सटाक्षेप क्षिप्तनक्षत्रसंहतिः ॥ १९ ॥

कोशोऽस्ति तेन कक्षे खड्गोऽर्थात् पृष्ठे इषुधिरिति चतुर्भुजत्वमेव परिष्कुर्वन्ति तत् कोशसत्त्व एव विश्वसनीयम् ॥ १७ ॥ १८ ॥ १९ ॥

॥ २० ॥ मम प्रीत्याह मम प्रिये इति वक्तव्ये चरमाच्चरलोपो रभसावेशात् ॥ २१ ॥ शिवाशतानाम्

वज्रहस्ता तथैवैन्द्री गजराजोपरिस्थिता । प्राप्ता सहस्रनयना यथा शक्रस्तथैव सा ॥ २० ॥ ततः परिवृतस्ताभिरीशानो देवशक्तिभिः । हन्यन्तामसुराः शीघ्रं मम प्रीत्याह चण्डिकाम् ॥ २१ ॥ ततो देवी शरीरात्तु विनिष्क्रान्तातिभीषणा । चण्डिका शक्तिरत्युग्रा शिवाशतनिनादिनी ॥२२॥ सा चाह धूम्रजटिलमीशानमपराजिता । दूतत्वं गच्छ भगवन् ! पार्श्वं शुम्भनिशुम्भयोः ॥ २३ ॥ ब्रूहि शुम्भं निशुम्भञ्च दानवावतिगर्वितौ । ये चान्ये दानवास्तत्र युद्धाय समुपस्थिताः ॥२४॥

घमन्तसृगालानां नादेन युक्ता ॥ २२ ॥ दूतत्वं दौत्यं गच्छ प्राप्नु हि पार्श्वं समीपमुद्दिश्येति त्वर्थात्, हे दूत ! तयोः पार्श्वं प्रति त्वं गच्छेति वा ॥ २३ ॥ २४ ॥

॥ २५ ॥२६॥ शिवदूतीति । शिवेन दूतयति सन्देशं प्रापयतीत्यर्थ गौरादेराकृतिगणत्वात् ङीप् बहुव्रीहौ तु

त्रैलोक्यमिन्द्रो लभतां देवाः सन्तु हविर्भुजः । यूयं प्रयात पातालं यदि जीवितु-
मिच्छथ ॥ २५ ॥ बलावलेपादथ चेद्भवन्तो युद्धकाङ्क्षिणः । तदागच्छत तृप्यन्तु
मच्छिवाः पिशितेन वः ॥ २६ ॥ यतो नियुक्तो दौत्येन तया देव्या शिवः स्वयम् ।
शिवदूतीति लोकेऽस्मिंस्ततः सा ख्यातिमागता ॥ २७ ॥ तेऽपि श्रुत्वा वचो देव्याः
शर्वाख्यातं महासुराः । अमर्षापूरिता जग्मुर्यतः कात्यायनी स्थिता ॥ २८ ॥
ततः प्रथममेवाग्रे शरशक्त्यृष्टिवृष्टिभिः । ववर्षुरुद्धतामर्षास्तां देवीममरारयः ॥२९॥

टाप् स्यादित्याहुः वस्तुतस्तु दुनोतेर्दुतनिभ्यां दीर्घश्चेति निष्ठायां दीर्घे सत्यल्पसन्देशप्रापकत्वविवक्षायां स्वाद-
स्पाख्यायामिति बहुव्रीहावपि ङीप् सम्भवतीति समर्थितं ललितानामभाष्येऽस्माभिः ॥ २७ ॥ २८ ॥ २९ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ ३० ॥ तस्या अग्रत इति वक्तव्ये पादपूरणायाकारलोपः सोचिलोपे चेदिति ज्ञापकादिति दुर्घटवृत्ति-

सा च तान् प्रहितान् बाणान् शूलशक्तिपरश्वधान्। चिच्छेद लीलयाध्मातधनु-

र्मुक्तैर्महेषुभिः ॥ ३० ॥ तस्याग्रतस्तथा काली शूलपातविदारितान्। खट्वाङ्गपोथि-
तांश्चारीन् कुर्वती व्यचरत्तदा ॥ ३१ ॥ कमण्डलुजलाक्षेपहतवीर्य्यान् हतौजसः।
ब्रह्माणी चाकरोच्छत्रून् येन येन स्म धावती ॥ ३२ ॥ माहेश्वरी त्रिशूलेन तथा
चक्रेण वैष्णवी। दैत्यान् जघान कौमारी तथा शक्त्यातिकोपना ॥ ३३ ॥ ऐन्द्री
कुलिशपातेन शतशो दैत्यदानवाः। पेतुर्विदारिताः पृथ्व्यां रुधिरौघप्रव-
र्षिणः॥ ३४ ॥ तुण्डप्रहारविध्वस्ता दंष्ट्राग्रक्षतवक्षसः। वाराहमूर्त्यान्यपतंश्चक्रेण
च विदारिताः ॥३५॥ नखैर्विदारितांश्चान्यान् भक्षयन्ती महासुरान्। नारसिंही
चचाराजौ नादापूर्णदिगन्तरा ॥ ३६ ॥

कारः ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥

For Private and Personal Use Only

३७॥ नैस्त: पलायिता: ॥ ३८ ॥ रक्तवीजो महासुर इत्यस्योत्तरमेक: श्लोकोऽधिक:, भागिनेयो महा-

चण्डाट्टहासैरसुरा: शिवदूत्यभिदूषिता:। पेतु: पृथिव्यां पतितांस्तांश्चखादाथ सा तदा ॥ ३७ ॥ इति मातृगणं क्रुद्धं मर्दयन्तं महासुरान्। दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्देवारिसैनिका: ॥ ३८ ॥ पलायनपरान् दृष्ट्वा दैत्यान्मातृगणार्दितान्। योद्धुमभ्याययौ क्रुद्धो रक्तवीजो महासुर: ॥ ३९ ॥ रक्तविन्दुर्यदा भूमौ पतत्यस्य शरीरत:। समुत्पतति मेदिन्यास्तत्प्रमाणो महासुर: ॥४०॥ युयुधे स गदापाणिरिन्द्रशक्त्या महासुर:। ततश्चैन्द्री स्ववज्रेण रक्तवीजमताड़यत्॥ ४१ ॥ कुलिशेनाहतस्याशु बहु सुस्राव शोणितम्। समुत्तस्थुस्ततो योधास्तद्रूपास्तत्पराक्रमा: ४२ यावन्त: पतितास्तस्य शरीराद्रक्तविन्दव:। तावन्त: पुरुषा जातास्तद्वीर्य्यबलविक्रमा: ॥ ४३ ॥

वीर्य्यस्तयो: शुम्भनिशुम्भयो: क्रोधवत्या: सुतो ज्येष्ठो महाबलपराक्रम' इति॥ ३९ ॥ ४० ॥ ४१ ॥४२॥४३॥

ते चापि युयुधुस्तत्र पुरुषा रक्तसम्भवाः। समं मातृभिरत्युग्रशस्त्रपातातिभीषणम् ॥ ४४ ॥ पुनश्च वज्रपातेन क्षतमस्य शिरो यदा। ववाह रक्तं पुरुषास्ततो

स.टी. जाताः सहस्रशः ॥४५॥ वैष्णवी समरे चैनं चक्रेणाभिजघान ह। गदया ताडयामास

७५ ऐन्द्री तमसुरेश्वरम् ॥ ४६ ॥ वैष्णवीचक्रभिन्नस्य रुधिरस्रावसम्भवैः। सहस्रशो जगद्व्याप्तं तत्प्रमाणैर्महासुरैः ॥ ४७ ॥ शक्त्या जघान कौमारी वाराही च तथासिना। माहेश्वरी त्रिशूलेन रक्तबीजं महासुरम् ॥ ४८॥ स चापि गदया दैत्यः सर्वा एवाहनत् पृथक्। मातृः कोपसमाविष्टो रक्तबीजो महासुरः ॥ ४९ ॥ तस्याहतस्य बहुधा शक्तिशूलादिभिर्भुवि। पपात यो वै रक्तौघस्तेनासंश्च्छतशोऽसुराः ॥ ५० ॥ तैश्चासुरासृक्सम्भूतैरसुरैः सकलं जगत्। व्याप्तमासीत्ततो देवा भयमाजग्मुरुत्तमम् ॥ ५१ ॥

॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥

॥ ५२ ॥ मच्छस्त्रपातेति । रक्तविन्दोः रक्तवीजादिति पञ्चमी मच्छस्त्रपातेन रक्तवीजतः सम्भूतान् रक्तविन्दोः

तान् विषमान् सुरान् दृष्ट्वा चण्डिका प्राह सत्वरा । उवाच कालीं चामुण्डे ! विस्तीर्णं वदनं कुरु ॥ ५२ ॥ मच्छस्त्रपातसम्भूतान् रक्तविन्दून् महासुरान् । रक्तविन्दोः प्रतीच्छ त्वं वक्त्रेणानेन वेगिना ॥५३॥ भक्षयन्ती चर रणे तदुत्पन्नान् महासुरान् । एवमेष क्षयं दैत्यः क्षीणरक्तो गमिष्यति ॥ ५४ ॥ भक्ष्यमाणास्त्वया चोग्रा न चोत्पत्स्यन्ति चापरे। इत्युक्त्वा तां ततो देवी शूलेनाभिजघान तम् ॥ ५५ ॥ मुखेन काली जगृहे रक्तवीजस्य शोणितम् । ततोऽसावाजघानाथ गदया तत्र चण्डिकाम् ॥ ५६ ॥ न चास्या वेदनाञ्चक्रे गदापातोऽल्पिकामपि । तस्याहतस्य देहात्तु बहु सुस्राव शोणितम् ॥ ५७ ॥ यतस्ततस्तद्वक्त्रेण चामुण्डा संप्रतीच्छति । मुखे समुद्गता येऽस्या रक्तपातान्महासुराः ॥ ५८ ॥

एकवचनादेकैकविन्दुसम्भिन्नोऽप्यनेकानित्यर्थः ॥ ५३ ॥ ५४ ॥ ५५ ॥५६॥५७॥ प्रतीच्छति गृह्णाति ॥५८॥

तांश्चखादाथ चामुण्डा पपौ तस्य च शोणितम्। देवी शूलेन वज्रेण बाणै-
रसिभि र्ऋष्टिभिः ॥ ५९ ॥ जघान रक्तवीजं तं चामुण्डापीतशोणितम्। स पपात
स.टी. महीपृष्ठे शस्त्रसङ्घसमाहतः ॥ ६० ॥ नीरक्तश्च महीपाल! रक्तवीजो महासुरः।
७६ ततस्ते हर्षमतुलमवापुस्त्रिदशा नृप ! ॥ ६१ ॥ तेषां मातृगणो जातो ननर्त्तासृङ्
मदोद्धतः ॥ ६२ ॥ इति मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
रक्तवीजवधो नाम अष्टमोऽध्यायः ॥ ८ ॥

असिभिरित्यत्र रेफलोपश्छान्दसः ॥५९॥६०॥६१॥६२॥ इति गुप्तवत्यां मन्त्रव्याख्यायामष्टमोऽध्यायः ॥ ८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अस्मिन्नवमेऽध्याये तृतीयश्लोकोत्तरमुत्पातान् बहूनुक्त्वाताननादृत्यैव युद्धाय निर्गताविति कथा बहुभिः

राजोवाच । विचित्रमिदमाख्यातं भगवन् ! भवता मम । देव्याश्चरितमाहात्म्यं रक्तबीजवधाश्रितम् ॥१॥ भूयश्चेच्छाम्यहं श्रोतुं रक्तबीजे निपातिते । चकार शुम्भो यत्कर्म निशुम्भश्चातिकोपनः ॥ २ ॥ ऋषिरुवाच । चकार कोपमतुलं रक्तबीजे निपातिते । शुम्भासुरो निशुम्भश्च हतेष्वन्येषु चाहवे ॥ ३ ॥ हन्यमानं महासैन्यं विलोक्यामर्षमुद्वहन् । अभ्यधावन्निशुम्भोऽथ मुख्यया सुरसेनया ॥ ४ ॥ तस्याग्रतस्तथा पृष्ठे पार्श्वयोश्च महासुराः । संदष्टौष्ठपुटाः क्रुद्धा हन्तुं देवीमुपाययुः ॥५॥ आजगाम महावीर्यः शुम्भोऽपि स्वबलैर्वृतः । निहन्तुं चण्डिकां कोपात् कृत्वा युद्धं तु मातृभिः ॥ ६ ॥ ततो युद्धमतीवासीद्देव्याः शुम्भनिशुम्भयोः । शरवर्षमतीवोग्रं मेघयोरिव वर्षतोः ॥ ७ ॥

श्लोकैः क्वचित्पठ्यते ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

For Private and Personal Use Only

चिच्छेदेति। अस्तान् क्षिप्तान् ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥

स.टी. चिच्छेदास्तांश्छरांस्ताभ्यां चण्डिका स्वशरोत्करैः। ताड़यामास चाङ्गेषु शस्त्रौघै-
७७ रसुरेश्वरौ ॥ ८ ॥ निशुम्भो निशितं खड्गं चर्म चादाय सुप्रभम्। अताड़यन्
मूर्द्धि सिंहं देव्या वाहनमुत्तमम् ॥ ९ ॥ ताड़िते वाहने देवी क्षुरप्रेणासिमुत्तमम्।
निशुम्भस्याशु चिच्छेद चर्म चाप्यष्टचन्द्रकम् ॥ १० ॥ छिन्ने चर्मणि खड्गे च शक्तिं
चिक्षेप सोऽसुरः। तामप्यस्य द्विधा चक्रे चक्रेणाभिमुखागताम् ॥ ११ ॥ कोपा-
ध्मातो निशुम्भोऽथ शूलं जग्राह दानवः। आयान्तं मुष्टिपातेन देवी तच्चाप्य
चूर्णयत् ॥ १२ ॥ आविध्याथ गदां सोऽपि चिक्षेप चण्डिकां प्रति। सापि देव्या
त्रिशूलेन भिन्ना भस्मत्वमागता ॥ १३ ॥

जग्राह गृहीत्वा विव्याध ॥ १२ ॥ आविध्य भ्रामयित्वा शूलक्षेपोत्तरं आदायेति वा तदर्थः ॥ १३ ॥

आपातयत मूर्च्छां प्रापयतेति यावत् ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥

ततः परशुहस्तं तमायान्तं दैत्यपुङ्गवम्। आहत्य देवी बाणौघैरपातयत भूतले॥१४॥ तस्मिन्निपतिते भूमौ निशुम्भे भीमविक्रमे। भ्रातर्यतीव संक्रुद्धः प्रययौ हन्तुमम्बिकाम्॥ १५॥ सरथस्थस्तदात्युच्चैर्गृहीतपरमायुधैः। भुजैरष्टाभिरतुलैर्व्याप्याशेषं बभौ नभः॥ १६॥ तमायान्तं समालोक्य देवी शङ्खमवादयत्। ज्याशब्दं चापि धनुषश्चकारातीव दुःसहम्॥ १७॥ पूरयामास ककुभो निजघण्टास्वनेन च। समस्तदैत्यसैन्यानां तेजोवधविधायिना॥१८॥ ततः सिंहो महानादैस्त्याजितेभमहामदैः। पूरयामास गगनं गां तथोपदिशो दश॥ १९॥ ततः काली समुत्पत्य गगनं क्ष्मामताडयत्। कराभ्यां तन्निनादेन प्राक्स्वनास्ते तिरोहिताः॥ २०॥

ततः कालीति गगनं समुत्पत्यक्ष्मामताडयदित्यन्वयः। प्राक्स्वनाः शङ्खज्याघण्टासिंहशब्दाः ॥ २० ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्तेसुः भयमापुः ॥ २१ ॥ २२ ॥ महोल्कया तत्तुल्यया तन्नामिकया वा शक्त्या ॥ २३ ॥ निर्घातेति ।

अट्टाट्टहासमशिवं शिवदूती चकार ह । तैःशब्दैरसुरास्त्रेसुः शुम्भः कोपं परं

ययौ ॥ २१ ॥ दुरात्मंस्तिष्ठतिष्ठेति व्याजहाराम्बिका यदा । तदा जयेत्यभिहितं

देवैराकाशसंस्थितैः ॥ २२ ॥ शुम्भेनागत्य या शक्तिर्मुक्ता ज्वालातिभीषणा ।
आयान्ती वह्निकूटाभा सा निरस्ता महोल्कया ॥ २३ ॥ सिंहनादेन शुम्भस्य
व्याप्तं लोकत्रयान्तरम् । निर्घातनिःस्वनो घोरो जितवानवनीपते ! ॥ २४ ॥ शुम्भ-
मुक्तान् शरान् देवी शुम्भस्तत्प्रहितान् शरान् । चिच्छेद स्वशरैरुग्रैः शतशोऽथ
सहस्रशः ॥ २५ ॥ ततः सा चण्डिका क्रुद्धा शूलेनाभिजघान तम् । स तदाभि-
हतो भूमौ मूर्च्छितो निपपात ह ॥ २६ ॥

देवीशक्त्या शुम्भशक्तेर्यः प्रतिघातस्तज्जन्यो निःस्वन एव शुम्भकृतसिंहनादापेक्षयाधिकं लोकान् व्याप्त इत्यर्थः ॥ २४ ॥ २५ ॥ २६ ॥

For Private and Personal Use Only

ततो निशुंभः संप्राप्य चेतनामात्तकार्मुकः। आजघान शरैर्देवीं कालीं केशरिणं तथा ॥ २७ ॥ पुनश्च कृत्वा बाहूनामयुतं दनुजेश्वरः। चक्रायुधेन दितिजश्छादयामास चण्डिकाम् ॥२८॥ ततो भगवती क्रुद्धा दुर्गा दुर्गार्त्तिनाशिनी। चिच्छेद तानि चक्राणि स्वशरैः सायकांश्च तान् ॥ २९ ॥ ततो निशुंभो वेगेन गदामादाय चण्डिकाम्। अभ्यधावत वै हन्तुं दैत्यसेनासमावृतः ॥ ३० ॥ तस्यापतत एवाशु गदां चिच्छेद चण्डिका। खड्गेन शितधारेण स च शूलं समाददे ॥ ३१ ॥ शूलहस्तं समायान्तं निशुंभममरार्दनम्। हृदि विव्याध शूलेन वेगाविद्धेन चण्डिका ॥ ३२ ॥ भिन्नस्य तस्य शूलेन हृदयान्निःसृतोऽपरः। महाबलो महावीर्यस्तिष्ठेति पुरुषो वदन् ॥ ३३ ॥ तस्य निष्क्रामतो देवी प्रहस्य स्वनवत्ततः। शिरश्चिच्छेद खड्गेन ततोऽसावपतद्भुवि ॥ ३४ ॥

॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

खखादेति उग्राभिः दंष्ट्राभिः क्षुण्णाः चूर्णीकृताः शिरोधरा ग्रीवा येषां तान् ॥ ३५ ॥ नेशुः मृताः ३६ ॥

ततः सिंहश्च खादोग्रदंष्ट्राक्षुण्णशिरोधरान् । असुरांस्तांस्तथा काली शिवदूती तथाऽपरान् ॥ ३५ ॥ कौमारीशक्तिनिर्भिन्नाः केचिन्नेशुर्महासुराः । ब्रह्माणी मन्त्रपूतेन तोयेनान्ये निराकृताः ॥ ३६ ॥ माहेश्वरी त्रिशूलेन भिन्नाः पेतुस्तथा परे । वाराहीतुण्डघातेन केचिच्चूर्णीकृता भुवि ॥ ३७ ॥ खण्डं खण्डञ्च चक्रेण वैष्णव्या दानवाः कृताः । वज्रेण चैन्द्रीहस्ताग्रविमुक्तेन तथापरे ॥ ३८ ॥ केचिद्विनेशुरसुराः केचिन्नष्टा महाहवात् । भक्षिताश्चापरे- काली-शिवदूती-मृगाधिपैः ॥ ३९ ॥ इति मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये निशुंभवधो नाम नवमोऽध्यायः ॥ ९ ॥

॥ ३७ ॥ ३८ ॥ विनेशुः मृताः नष्टाः पलायिताः ॥ ३९ ॥ इति गुप्तवत्यां मन्त्रव्याख्याने नवमोऽध्यायः ॥९॥

For Private and Personal Use Only

॥१॥२॥ एकैवाहमिति एकमेवाद्वितीयमिति श्रुतेः। पश्येत्यस्यैता इत्येव कर्म्म, वाक्यार्थं एव वा कर्म्म॥३॥ तनौ

ऋषिरुवाच। निशुंभं निहतं दृष्ट्वा भ्रातरं प्राणसम्मितम्। हन्यमानं बलञ्चैव शुंभः क्रुद्धोऽब्रवीद्वचः ॥१॥ बलावलेपाद् दुष्टे! त्वं मा दुर्गे! गर्वमावह। अन्यासां बलमाश्रित्य युध्यसे यातिमानिनी ॥ २ ॥ देव्युवाच। एकैवाहं जगत्यत्र द्वितीया का ममापरा। पश्यैता दुष्ट! मय्येव विशन्त्यो मद्विभूतयः ॥३॥ ततः समस्तास्ता देव्यो ब्रह्माणीप्रमुखालयम्। तस्या देव्यास्तनौ जग्मुरेकैवासीत्तदाम्बिका ॥ ४ ॥ देव्युवाच। अहं विभूत्या बहुभिरिह रूपैर्यदास्थिता। तत्संहृतं मयैकैव तिष्ठाम्याजौ स्थिरोभव ॥ ५ ॥ ऋषिरुवाच। ततः प्रववृते युद्धं देव्याः शुंभस्य चोभयोः। पश्यतां सर्वदेवानामसुराणाञ्च दारुणम् ॥ ६ ॥

लयं जग्मुरित्यन्वयः। स्तनाविति छेदे तु प्राप्ये विशेषः ॥ ४ ॥ यत् आस्थितेति छेदः ॥ ५ ॥ ६ ॥

शरवर्षैः शितैः शस्त्रैस्तथास्त्रैश्चैव दारुणैः। तयोर्युद्धमभूद्भूयः सर्वलोकभय-
ङ्करम् ॥ ७ ॥ दिव्यान्यस्त्राणि शतशो मुमुचे यान्यथाम्बिका। बभञ्ज तानि
स॰टी॰ दैत्येन्द्रस्तत्प्रतीघातकर्तृभिः ॥ ८ ॥ मुक्तानि तेन चास्त्राणि दिव्यानि परमे-
८० श्वरी। बभञ्ज लीलयैवोग्रहुङ्कारोच्चारणादिभिः ॥ ९ ॥ ततः शरशतैर्देवीमाच्छा-
दयत सोऽसुरः। सापि तत्कुपिता देवी धनुश्चिच्छेद चेषुभिः ॥ १० ॥ छिन्ने
धनुषि दैत्येन्द्रस्तथा शक्तिमथाददे। चिच्छेद देवी चक्रेण तामप्यस्य करे
स्थिताम् ॥ ११ ॥ ततः खड्गमुपादाय शतचन्द्रञ्च भानुमत्। अभ्यधावत तां
देवीं दैत्यानामधिपेश्वरः ॥ १२ ॥ तस्यापतत एवाशु खड्गं चिच्छेद चण्डिका।
धनुर्मुक्तैः सितैर्बाणैश्चर्म चार्ककरामलम् ॥ १३ ॥ हताश्वः स तदा दैत्यश्छिन्न-
धन्वा विसारथिः। जग्राह मुद्गरं घोरमम्बिकानिधनोद्यतः ॥ १४ ॥

॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ शतचन्द्रमिति चर्म्म, भानुमदिति विशेषणम् ॥ १२ ॥ १३ ॥ १४ ॥

चिच्छेदापततस्तस्य मुद्गरं निशितैः शरैः। तथापि सोऽभ्यधावत्तां मुष्टिमुद्यम्य वेगवान्॥ १५ ॥ स मुष्टिं पातयामास हृदये दैत्यपुङ्गवः ॥ १६ ॥ देव्यास्तं चापि सा देवी तलेनोरस्यताड़यत्। तलप्रहाराभिहतो निपपात महीतले ॥ १७ ॥ स दैत्यराजः सहसा पुनरेव तथोत्थितः। उत्पत्य च प्रगृह्योच्चैर्देवीं गगनमास्थितः ॥ १८ ॥ तत्रापि सा निराधारा युयुधे तेन चण्डिका। नियुद्धं खे तदा दैत्यश्चण्डिका च परस्परम् ॥ १९ ॥ चक्रतुः प्रथमं सिद्धमुनिविस्मयकारकम्। ततो नियुद्धं सुचिरं कृत्वा तेनाम्बिका सह ॥ २० ॥ उत्पात्य भ्रामयामास चिक्षेप धरणीतले। स क्षिप्तो धरणीं प्राप्य मुष्टिमुद्यम्य वेगितः॥२१॥ अभ्यधावत दुष्टात्मा चण्डिकानिधनेच्छया। तमायान्तं ततो देवी सर्वदैत्यजनेश्वरम् ॥२२॥

॥१५॥१६॥१७॥१८॥१९॥२०॥ उत्पात्य कश्चिद्रवयवं धृत्वा स्वमस्तकादुपरिभाग उत्तोल्य ॥ २१ ॥ २२ ॥

॥२३॥२४॥२५॥२६॥२७॥२८॥ अत्र देव्युवाचेति। मन्त्रद्वयस्याव्यवधानेन स्वीकरणं वचनबलान्न दुष्यति

जगत्यां पातयामास भित्वा शूलेन वक्षसि। स गतासुः पपातोर्व्यां

 देवीशूलाग्रविक्षतः॥ २३॥ चालयन् सकलां पृथ्वीं साब्धिद्वीपां सपर्वताम्।

 ततः प्रसन्नमखिलं हते तस्मिन् दुरात्मनि॥ २४॥ जगत् स्वास्थ्यमतीवाप

निर्मलं चाभवन्नभः। उत्पातमेघाः सोल्का ये प्रागासंस्ते शमं ययुः॥ २५॥ स-

रितो मार्गवाहिन्यस्तथासंस्तत्र पातिते। ततो देवगणाः सर्वे हर्षनिर्भर-

मानसाः॥ २६॥ बभूवुर्निहते तस्मिन् गन्धर्वा ललितं जगुः। अवादयंस्तथैवान्ये

ननृतुश्चाप्सरोगणाः॥२७॥ ववुः पुण्यास्तथा वाताः सुप्रभोऽभूद् दिवाकरः जज्वलु-

श्चाग्नयः शान्ताः शान्ताऽऽग्जनितस्वनाः॥२८॥ इति मार्कण्डेयपुराणे सावर्णिके

मन्वन्तरे देवीमाहात्म्ये शुम्भनिशुम्भवधो नाम दशमोऽध्यायः॥ १०॥

न पुनस्तदुपपत्तय ऋषिरुवाचेति पठनीयं तत समस्तास्ता इत्यस्य वस्तुतः ऋषिवाक्यत्वेनैव तदुपपत्तेः॥*॥

इति गुप्तवत्यां मन्त्रव्याख्याने दशमोऽध्यायः॥ १०॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥*॥ अथ सार्द्धैश्चतुर्दशभिः श्लोकैरेकादशाद्यध्यायत्रयगतमन्त्रविभजनार्थकश्चतुर्थः पटलः। ईश्वर उवाच। ऋषेः सुमेधसः ख्यातं प्रोक्तं देव्या हते शुभे। चतुस्त्रिंशदिति श्लोकाः मन्त्रास्तत्संख्यकाश्च ते॥ ततो देव्येकमन्त्रेण वरदाहं सुरेश्वरि! देवा ऊचुस्ततः सर्वा बाधा प्रशमनं तथा, श्लोकेनैकेन देवेशि! देव्युवाच ततः परम्। वैवस्वतेऽन्तरे प्राप्त इति सार्द्धाश्चतुर्दश, श्लोका आहुतयः सर्वाः पञ्चाशत्पञ्चसंयुताः। वैष्णवी देवता ह्यत्र महागरुड़वाहिनी॥ 'ऋषेः प्रोक्तं' वच इत्यर्थः। 'शुभे' इति संबुद्धिः मन्त्रेण श्लोकेनेतीत्थम्भूतलक्षणे तृतीया 'सार्द्धाः' शाकम्भरीति विख्यातिं तदा यास्याम्यहं भुवीत्यर्द्धमन्त्रेण सहिताः तत्रैव च बधिष्यामीत्यादीनां श्लोकमन्त्राणां तथात्व एव साम-ञ्जस्यात् 'अत्र' एकादशेऽध्याये॥ देव्युवाचेति च तत एभिस्तवैश्च मामिति। दूरेत्यर्द्धेन सहिता अष्टाविंशति-रूपकाः॥ ततश्चर्षिरुवाचेतीत्युक्त्वा श्लोकादिकैश्च तैः। अर्द्धयुङ् नवभिः श्लोकैस्तत्संख्या मनवो मताः॥ एवं तु द्वादशे एकचत्वारिंशन्मिताहुतिः॥ एभिरित्यारभ्य दूरादेवेत्यर्द्धोत्तरमृषिरुवाचेत्येतत्पर्य्यन्तं सार्द्धाष्टविंशति-श्लोकाः सन्ति इदं च श्लोकसंख्यामात्रमिति तु रूपका इत्यनेन ध्वनितम् आद्यार्द्धस्याद्यप्रतीकवदन्यार्द्धस्यान्त्य-प्रतीकग्रहणेन निर्देशयुक्तोऽपि तदाद्यप्रतीक एव गृहीत इत्येव विशेषः, षड्विंशतिरित्येव ब्रूयादित्यादौ मध्यप्रतीकग्रहणादेरपि दर्शनात्ततश्च इत्युक्त्वा सा भगवतीत्यर्द्धयुक्तनवश्लोकैस्तैः पूर्वनिर्दिष्टैरर्द्धसहिताष्टा-विंशतिश्लोकैश्च 'तत् संख्या' एकोनविंशत्संख्या दशसंख्याश्च मनवो ज्ञेया इत्यर्थः। तेन दूरादेवेति प्रतीक-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ग्रहणमपि श्लोकसंख्यानिर्देशमात्राभिप्रायकं न तु मन्त्रत्वस्यापि बोधकं, तत्संख्या इति वाक्यान्तरेणैव पूर्वनिर्दिष्टयोरुभयोरपि श्लोकगणयोर्मन्त्रत्वविधानात्, अर्द्धमन्त्रविशेषनिर्णयस्तु यथा पूर्वं लक्षणानुसारेणैवेति

भावः ततश्च सर्वं ममैतन्माहात्म्यं मम सन्निधिकारकमित्यर्द्धं निशुम्भे च महावीर्ये शेषाः पाताल-

मायययुरित्यर्द्धञ्च मन्त्रद्वयं क्रमेण ज्ञेयम्। यद्यपि निशुम्भे चेत्यर्द्धस्य दैत्याश्च देव्येत्येतत्पूर्वश्लोकस्य च परस्पर साकाङ्क्षत्वादेकवाक्यत्वमेव तथापि सार्द्धश्लोकस्यैकमन्त्रत्वायोगादनायत्यातदीयाये स्थिता इत्यस्य हते इत्यस्य वाध्याहारेणोभयोरप्यवान्तरवाक्यत्वं प्रकल्प्य ये तेऽपि इत्यप्यध्याहृत्य महावाक्यता यथा कथञ्चित् कल्पनीया। एवमेव पशुपुष्पार्घधूपैश्चेति श्लोके या प्रीतिरित्यध्याहार्य्यम्, अरण्ये प्रान्तरेवापीति श्लोकत्रये यः स्यादित्यध्याहार्य्यं, पश्चात्तेषामुत्तरश्लोकेन महावाक्यता कल्पनीयेत्यादिकमूहनीयम्॥ ततस्त्रयोदशेऽध्याये ऋषिरुवाच वाक्यतः। एतत्ते कथितं भूपेत्यादि सार्द्धत्रयं मनुः॥ अर्द्धेन सह चत्वारो मनव इत्यर्थः। मार्कण्डेय उवाचेति इति तस्य वचो मुखम्। श्लोकषट्कं ततो देवीवचनं परमेश्वरि!‘वचो मुखं’ वचः श्रुत्वा सुरथः इत्यादिकं, यत्प्रार्थ्यते त्वया भूप त्वयेति श्लोक एककः। मार्कण्डेय उवाचेति ततो वव्रे मनुद्वम्॥ देव्युवाच पुनः स्वल्पैरिति श्लोकत्रयेण वै। अर्द्धानामेव मन्त्रत्वाङ्गवन्त्याहुतयोऽत्र षट्॥ ततो मार्कण्डेय वच इति दत्वा तयोरिति द्वौ मन्त्रौ पुनरुच्चार्य्य सावर्णिर्भविता मनुः, एकोनत्रिंशत्संख्याकाहुतिरत्र विधीयते॥ इति दत्वा तयोर्देवीति श्लोकौ द्वौ दण्ड-

For Private and Personal Use Only

कलितवत् पुनरुच्चार्य्य मन्त्रद्वयवर्द्धनेनोनत्रिंशत्संख्याका मन्त्रा इह ज्ञेया इत्यर्थः। उत्तरत्र मन्त्रान्तराभाव-द्योतनाय चरमश्लोकचरमावयव एव कण्ठरवेण पठितः। तथा च सङ्कर्षातिमसूत्रं 'वाच्यकालत्वाद्यथा याज्या संप्रैषो यथा याज्या संप्रैषो यथा याज्या संप्रैष' इति शास्त्रं समाप्तमिति तु तदर्थः। एवमस्मिन्नध्यायेऽर्द्धमन्त्राः सप्तैव॥ काण्वस्तु इति तस्य वचः श्रुत्वेत्यर्द्धमन्त्रस्तथा स्मृतः श्लोकमन्त्रास्ततो ज्ञेयाश्चत्वारोऽथार्द्ध उच्यते इत्या-द्युक्तांते मार्कण्डेयस्ततः पादद्वयं मन्त्रत्रयं स्मृतम् आवृत्त्या ह्यधिको मन्त्रः सावर्णिर्भविता मनुरिति स्वकृतकारिकाद्वयं प्रललाप, तत्तुच्छं तन्त्रे द्वौ मन्त्राविति प्रथमान्तौ पूर्वान्वयिनौ सावर्णिर्भवितेति षड़क्षर-प्रतीकेन चरमचरणमुपलक्ष्य इति पुनरुच्चार्य्य पुनरुच्चरितश्चेदेको मनुर्भवतीत्यर्थः इत्यष्टाक्षरमपि प्रतीकी-कृत्य इति पुनरुच्चार्य्ययोजनयैकोनत्रिंशत्संख्या भवतीत्यर्थः इति वा व्याख्याय यथा कथञ्चित्पादस्य मन्त्र-त्वोपपादनसम्भवेऽपीति तस्येति श्लोकषट्के प्रथमोपान्त्ययोरर्द्धयोरेव मन्त्रत्वस्वीकारे प्रमाणालाभात्, समु-दितसंख्याद्वयाद् द्वौ मन्त्रावित्यस्य द्वितीयान्तत्वेनोच्चारणकर्म्मत्वस्वीकारमात्रेणोपपत्तेः, अत एतच्छ्लोकवाक्यार्थ-भ्रममूलिकैवार्द्धनवककल्पना, एतेन चरमप्रतीकग्रहणेन चरमश्लोकस्यैव द्विरुच्चारणपरमिति केषाञ्चिद्योजन-मप्यपास्तम्। कश्चित्तु एकादशार्द्धाहुतयो द्वादशश्लोकमन्त्रकाः। उवाच वचनैः षड्भिर्मन्त्राः स्युः प्रोक्त-संख्यका इति जजल्प, तेन सावर्णिरिति तन्त्रोक्तेरस्मदुक्तमेव सार्थक्यमभिप्रेतं स्यान्न कण्वोक्तं परं त्वर्द्ध-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वर्द्धने प्रमाणाभावस्तुल्य एवेति न किञ्चिदेतत्। अथ तन्त्रे समुदितसंख्यामाह, एवं त्रयोदशाध्याया होम-
पूजनतृप्तिषु। शतानि सप्तसंख्यानि तव प्रोक्तानि शैलजे॥ मकारादिनुकारान्तो मनुः परमदुर्लभः ससम्प्रदाय-
स.टी. विधिना ज्ञातव्यो मम वल्लभे॥ अन्यथा विफलो मन्त्रः सत्यं सत्यं मयोदितम्। होमे स्वाहान्तिमा मन्त्राः
८३ पूजायान्तु नमोऽन्तिमाः, तर्पणे तर्पयाम्यन्ता ऊहनीया बुधैरिमे॥*॥ तृप्तिस्तर्पणं ब्राह्मणभोजनं वा मकारादि-
र्मार्कण्डेय उवाचेत्यारभ्य नुकारान्तः सावर्णिर्भविता मनुरित्येतत्पर्य्यन्तः मकारपदेन व्यञ्जनमात्रं प्राथमिकं
विवक्षितम् अकारस्तूच्चारणमात्रार्थोऽकारो व्यपेतो व्यञ्जनानामिति तैत्तिरीयप्रातिशाख्यसूत्रसिद्धो वा न
विवक्षितः नुकारः इत्यत्रोकारस्तु विवक्षित एव तेन जगाम गहनं वनमिति मन्त्रान्त्यनकारादेर्निरासः,
तथैव च महाहनुरित्यस्य मन्त्रान्तत्वाभावादेव निरासः। मन्त्रान्त्यस्य नुरित्यक्षरस्याऽन्यस्याभावादेव
नातिप्रसङ्गः तेन मनुरिति पदस्याक्षमालेत्यक्षपदस्येव प्रत्याहारपरत्वेनाप्ययमेव मन्त्रो मुख्यत्वार्थद्योतना-
याह मनुरिति, (अतः) मकारादिरिति केचित्पठन्ति तच्चित्यम्॥ तर्पयामीति पल्लवे चण्डिकामित्यपि परे योज-
यन्ति, तद्धोमपूजनयोरपि तुल्यन्यायेन चतुर्थ्यन्तयोजनापत्त्या न युक्तम् अतो यावद्वचनमेव मन्त्रान् पठतापेक्षि-
तांशोऽध्याहारेणिशत्त्वेत्यादाविव पूरयता वाक्यार्थोऽनुसन्धातव्य इत्येव युक्तम्॥ इति गुप्तवत्यां कात्यायनीतन्त्रस्य
त्रयोविंशपटलस्य व्याख्या॥*॥ अथैतत्संग्रहश्लोका द्वाविंशतिः। ऋषिर्देव्याहेत्याद्याः श्लोकास्त्रिंशच्चतुर्युता देवी

For Private and Personal Use Only

वाग्वरदेत्येको देवा: सर्वेति चैकक: ॥ देवी वैवस्वतेत्यष्टावथ शाकम्भरी मनु: अर्द्धश्लोकात्मक: पश्चाच्छ्लोका-स्तत्रैव चेति षट् ॥ एवमेकादशे मन्त्रा: पञ्चशञ्चाशदीरिता: देवी वागेभिरित्याद्या: श्लोका अष्टादशोदिता: ॥ सर्वं ममैतदित्यर्द्धम् पश्चाद्या: श्लोकका दश ऋषेर्वचनमित्युक्तेत्याद्या: श्लोकास्ततस्त्रय: ॥ निशुम्भे चेत्यर्द्धमनुरेवं भगवतीति षट् इत्येकचत्वारिंशत् स्युर्द्वादशाध्यायमन्त्रका: ॥ ऋषिरेतत्त इत्यर्द्धश्लोको मन्त्रस्ततस्त्रय: एवं प्रभावा सेत्याद्या मार्कण्डेय उवाच ह ॥ इति तस्येति षट्श्लोका देवी यदिति चैकक: मार्कण्डेय उवाचाथ ततो वव्रे मनुद्वयम् ॥ देव्युवाच तत: स्वल्पैरहोभिरिति षण्मता: अर्द्धश्लोकात्मका मन्त्रा मार्कण्डेय वचस्तत: ॥ इति दत्वा तयोरेवं देव्या वरमिति द्वयं द्विर्दण्डकलितन्यायादावृत्तं स्याच्चतुष्टयम् ॥ इत्येवमेकोनत्रिंशन्मनव: स्युस्त्रयोदशे अत्रापरे नवार्द्धानि केचिदेकादशाभ्यधु: । न तत् कात्यायनीतन्त्रजल्पितं किन्तु कल्पितम् ॥ इत्युत्तमचरित्रेऽस्मिन्नध्याय त्रितयात्मनि संभूयमन्त्रसंख्यैकचत्वारिंशच्चतु:शती । अर्द्धश्लोकात्मका मन्त्रास्तेषु द्वादशकीर्त्तिता: त्रिपान्मन्त्रास्तु षट्षष्ठिर्द्वौ श्लोकौ पुनरुक्तकौ श्लोका अपुनरुक्तास्तु त्रिशती सप्तविंशति: । राजैको देव दूतोक्तिर्द्वे द्वे देव्युक्तयो दश मार्कण्डेयोक्तयस्तिस्र ऋषिवाक्यानि षोड़श: । इत्युवाचाङ्किता मन्त्राश्चतुस्त्रिंशदिति स्थिति: । अथ सर्वे मिलिताश्चेदध्यायेषु त्रयोदशसु पञ्च शतानि श्लोका अष्टा सप्तति युतानि तेष्वन्त्यौ ; श्लोकौ द्विगुणौ भवतस्त्रेधा द्वाविंशतिभाग:, एकोनविंशतिश्च द्वेधा ते पञ्चषष्ठिरतिरिक्ता:, ब्रह्मा भगवान्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दूतो वैश्यो देवा नृपो मृकण्डुसुत:। देव्यृषयश्चैककद्विद्वित्रिचतु:शरार्क ऋचमिता:। इति सप्ताधिकपञ्चाश-दुवाच पदाङ्किता अमी अधिका, द्वाविंशतिशतमेषां श्लोकैर्योगेन मन्त्रसप्तशती, इति विभजनमुदितं प्रति-मन्त्र कात्यायनीतन्त्रे तस्मादेतत् प्राकृतिकमपूर्णमन्यत् तु यामलप्रभृति॥ श्लोकमन्त्रस्त्रिपान्मन्त्र: पुनरुक्तोर्द्ध-मन्त्रक: उवाचाङ्कित इत्येवं मन्त्र: प्रोक्तोऽत्र पञ्चधा ॥७०॥ मन्त्रपिण्ड: श्लोकपिण्डोऽध्यायपिण्ड इति त्रिधा इत्यष्टौ सुगभ: ४२७ स्तोष: ६६ श्रीर्२र्जलं ३८ सोम ५७ उन्नस: ७०० दुस्थेमा ५७८ लोक १३ इत्याख्या संख्यास्तन्त्रेऽत्र वर्णिता: ॥ * ॥

For Private and Personal Use Only

अथ मन्त्रव्याख्या। देव्येति वह्निपुरोगमाः अग्निरग्रेप्रथमो देवानामिति श्रुतेः ॥ १ ॥ २ ॥ ३ ॥

ऋषिरुवाच। देव्या हते तत्र महासुरेन्द्रे सेन्द्राः सुरा वह्निपुरोगमास्ताम्। कात्यायनीं तुष्टुवुरिष्टलम्भाद् विकाशिवक्त्रास्तु विकाशिताशाः ॥ १ ॥ देवि! प्रपन्नार्त्तिं हरे! प्रसीद प्रसीद मातर्जगतोऽखिलस्य। प्रसीद विश्वेश्वरि! पाहि विश्वं त्वमीश्वरी देवि! चराचरस्य ॥ २ ॥ आधारभूता जगतस्त्वमेका मही-स्वरूपेण यतःस्थितासि। अपां स्वरूपस्थितया त्वयैतदाप्याय्यते कृत्स्नमलंघ्य-वीर्य्ये ॥ ३ ॥ त्वं वैष्णवी शक्तिरनन्तवीर्य्या विश्वस्य वीजं परमासि माया। संमोहितं देवि! समस्तमेतत्त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ॥ ४ ॥

नारायणीमुक्ताख्यं स्तवमाह, देवीति संमोहितं त्वयैवेति शेषः ॥ ४ ॥

विद्या इति । सकलाश्चतुःषष्टिकलासहिताः षोड़शकामकलासहिताश्चेति क्रमेण विद्यास्त्रियोरन्वेति एतत्परिदृश्यमानं जगत् स्तव्यविषये परा वा अपरा वोक्तिरपि त्वमेवेति त्वदन्या स्तुतिः का ॥ ५ ॥ इममेवार्थं

विद्याः समस्तास्तव देवि! भेदाः स्त्रियः समस्ताः सकला जगत्सु । त्वयैकया पूरितमम्बयैतत् का ते स्तुतिः स्तव्यपरा परोक्तिः॥५॥ सर्वभूता यदा देवी स्वर्गमुक्तिप्रदायिनी । त्वं स्तुता स्तुतये का वा भवन्तु परमोक्तयः ॥६॥ सर्वस्य बुद्धिरूपेण जनस्य हृदि संस्थिते । स्वर्गापवर्गदे देवि! नारायणि नमोऽस्तु ते॥७॥ कलाकाष्ठादिरूपेण परिणामप्रदायिनि । विश्वस्योपरतौ शक्ते नारा॰ ॥ ८ ॥

विवृण्वन्नाह, सर्वभूतेति सर्वस्येत्याद्याः षोड़शश्लोका नारायणीलिङ्गकाः क्वचिदष्टादश पठ्यन्ते तत्र द्वयमनाकरं क्वचिदेकोनविंशतिः पठ्यन्ते तदपि तथैव तन्त्रान्तरोक्तसंख्यायां वा तेषां प्रवेशोऽस्तु ॥ ६ ॥ ७ ॥ कलाकाष्ठेति परिणामेति षड्भावविकाराणामुपलक्षणम् ॥ ८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ ९ ॥ १० ॥ ११ ॥ कौशेति कुशं जलं तस्येदं कमण्डलु कौशं तद्धताम्भः सेचिके ॥१२॥१३॥ मयूरेति । तस्य कुक्कुटः पुत्रः पुच्छं वा 'कुक्कुटः ककुभे पुच्छे पुत्रे च चरणायुधे' इति मेदिनीति बहवः । वस्तुतस्तु मयूरः कुक्कुटश्चेति द्वे अपि स्कन्दस्य तृतीयावरणस्थदेवते तदुक्तं शिवार्चनचन्द्रिकायां सुब्रह्मण्य मनुप्रकरणे दलाग्रेषु

सर्वमङ्गलमङ्गल्ये शिवे ! सर्वार्थसाधिके । शरण्ये त्र्यम्बके गौरी नारा० ॥ ९ ॥

सृष्टिस्थितिविनाशानां शक्तिभूते सनातनि । गुणाश्रये गुणमये नारा० ॥ १० ॥

शरणागतदीनार्त्तपरित्राणपरायणे । सर्वस्यार्त्तिहरे देवि ! नारा० ॥११॥ हंसयुक्त-विमानस्थे ब्रह्माणीरूपधारिणि । कौशाम्भः क्षरिके देवि ! नारा० ॥ १२ ॥

त्रिशूलचन्द्राहिधरे महावृषभवाहिनि । माहेश्वरीस्वरूपेण नारा० ॥ १३ ॥

मयूरकुक्कुटवृते महाशक्तिधरेऽनघे । कौमारीरूपसंस्थाने नारा० ॥ १४ ॥

च पूर्वादियजदेवाननन्तरं देवसेनापतिं शक्तिं विघ्नं कुक्कुटमेव च मेधां मयूरं वज्रं च द्वयं लोकेश्वरांस्तत इति । स्कन्देन हतः शूरपद्मासुर एव मयूरः कुक्कुटश्चेति रूपद्वयं बिभ्रत् स्वामिनो वाहनं ध्वजश्चेति क्रमेणाभवदिति स्कान्दे कथा च ॥ १४ ॥

For Private and Personal Use Only

शङ्खचक्रादिभिः सहगृहीते परमायुधे खड्गबाणरूपे यया सा ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥२१॥

शङ्खचक्रगदाशार्ङ्गगृहीत परमायुधे । प्रसीद वैष्णवीरूपे नारा० ॥१५॥ गृहीतोग्र-महाचक्रे दंष्ट्रोद्धृतवसुन्धरे । वराहरूपिणि शिवे ! नारा० ॥१६॥ नृसिंहरूपेणोग्रेण हन्तुं दैत्यान् कृतोद्यमे । त्रैलोक्यत्राणसहिते नारायणि नमोऽस्तु ते ॥ १७ ॥ किरीटिनि महावज्रे सहस्रनयनोज्ज्वले । वृत्रप्राणहरे चैन्द्रि नारा० ॥ १८ ॥ शिवदूतीस्वरूपेण हतदैत्यमहाबले । घोररूपे महारावे नारा० ॥ १९ ॥ दंष्ट्रा करालवदने शिरोमालाविभूषणे । चामुण्डे मुण्डमथने नारा० ॥२०॥ लक्ष्मिलज्जे महाविद्ये श्रद्धे पुष्टिस्वधे ध्रुवे । महारात्रि महाऽविद्ये नारा० ॥ २१ ॥ मेधे सरस्वतिवरे भूतिबाभ्रवि ! तामसि । नियते त्वं प्रसीदेशे नारा० ॥ २२ ॥

भूतिबाभ्रवीत्येकं पदं बभ्रुसु नकुले विष्णावित्यमरः, बभ्रू रजोगुण इति केचित् ॥ २२ ॥

भयेभ्य इति दुर्गे इति च वाक्यभेदेन देवीति संबुद्धिद्वयम् ॥ २३ ॥ २४ ॥२५॥ अनः सुतानिव प्राणधानन:,

सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते। भयेभ्यस्त्राहि नो देवि ! दुर्गे ! देवि ! नमोऽस्तु ते ॥ २३ ॥ एतत्ते वदनं सौम्यं लोचनत्रयभूषितम्। पातु नः सर्वभूतेभ्यः कात्यायनि ! नमोऽस्तु ते ॥ २४ ॥ ज्वालाकरालमत्युग्रमशेषासुरसूदनम्। त्रिशूलं पातुनो भीतेर्भद्रकालि ! नमोऽस्तु ते ॥२५॥ हिनस्ति दैत्यतेजांसि स्वनेनापूर्य्य या जगत्। सा घण्टा पातु नो देवि ! पापेभ्योनः सुतानिव ॥ २६ ॥ असुरासृग्-वसापङ्कचर्चितस्ते करोज्ज्वलः। शुभाय खड्गो भवतु चण्डिके ! त्वां नताव-यम् ॥ २७ ॥ रोगानशेषानपहंसि तुष्टा रुष्टा तु कामान् सकलानभीष्टान्। त्वामाश्रितानां न विपन्नराणां त्वामाश्रिताह्याश्रयतां प्रयान्ति ॥ २८ ॥

मात्रपरोप्यनः शब्दोऽस्तीति कश्चित् ॥ २६ ॥ २७ ॥ २८ ॥

एतत्कृतं यत्कदनं त्वयाद्य धर्मद्विषां देवि ! महासुराणाम् । रूपैरनेकैर्बहुधात्ममूर्त्तिं कृत्वाम्बिके ! तत् प्रकरोति कान्या ॥ २९ ॥ विद्यासु शास्त्रेषु विवेकदीपेष्वाद्येषु वाक्येषु च का त्वदन्या ममत्वगर्त्तेऽतिमहान्धकारे विभ्रामयत्येतदतीव विश्वम् ॥ ३० ॥ रक्षांसि यत्रोग्रविषाश्च नागा यत्रारयो दस्युबलानि यत्र । दावानलो यत्र तथाब्धिमध्ये तत्र स्थिता त्वं परिपासि विश्वम् ॥ ३१ ॥ विश्वेश्वरी त्वं परिपासि विश्वं विश्वात्मिका धारयसीति विश्वम् । विश्वेशवन्द्या भवती भवन्ति विश्वाश्रया ये त्वयि भक्तिनम्राः ॥ ३२ ॥ देवि ! प्रसीद परिपालय नोऽरिभीतेर्नित्यं यथासुरवधादधुनैव सद्यः । पापानि सर्वजगतां प्रशमं नयाशु उत्पातपाकजनितांश्च महोपसर्गान् ॥ ३३ ॥

॥ २९ ॥ आद्येषु वाक्येषु वेदेषु ॥३०॥३१॥३२॥ उत्पातानां पाके फलकाले जातानुपसर्गान् विघ्नान् ॥ ३३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ ३४ ॥ ३५ ॥ सर्वाश्च ता आबाधाश्च सर्वाबाधाः ॥ ३६ ॥ युगे चतुर्युगे तत्रापि कलिद्वापरसन्धौ ॥ ३७ ॥

प्रणतानां प्रसीद त्वं देवि ! विश्वार्त्तिहारिणि ! । त्रैलोक्यवासिनामीड्ये ! लोकानां वरदा भव ॥ ३४ ॥ देव्युवाच । वरदाहं सुरगणा वरं यं मनसेच्छथ । तं वृणुध्वं प्रयच्छामि जगतामुपकारकम् ॥ ३५ ॥ देवा ऊचुः । सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि ! । एवमेव त्वया कार्य्यमस्मद्वैरिविनाशनम् ॥ ३६ ॥ देवा ऊचु । वैवस्वतेऽन्तरे प्राप्ते अष्टाविंशति मे युगे । शुम्भोनिशुम्भश्चैवान्यावुत्पत्स्येते महासुरौ ॥ ३७ ॥ नन्दगोपगृहे जाता यशोदागर्भसम्भवा । ततस्तौ नाशयिष्यामि बिन्ध्याचलनिबासिनी ॥ ३८ ॥ पुनरप्यतिरौद्रेण रूपेण पृथिवीतले । अवतीर्य्य हनिष्यामि वैप्रचित्तांस्तु दानवान् ॥ ३९ ॥

बिन्ध्याचले तत्रापि गङ्गातीरे निवासिनी ॥ ३८ ॥ वैप्रचित्तान् विप्रचित्तिवंश्यान् ॥ ३९ ॥

For Private and Personal Use Only

सर्वावयवावच्छेदेन रक्ताया अपि रक्तचामुण्डात्वेन प्रसिद्धाया एव दन्तांशे रक्तिमाधिक्याद्रक्तदन्तीति नामित्याहुः

भक्षयन्त्याश्च तानुग्रान् वैप्रचित्तान् महासुरान्। रक्तादन्ता भविष्यन्ति दाडिमी-
कुसुमोपमाः ॥ ४० ॥ ततो मां देवताः स्वर्गे मर्त्यलोके च मानवाः। स्तुवन्तोव्या-
हरिष्यन्ति सततं रक्तदन्तिकाम् ॥४१॥ भूयश्च शतवार्षिक्यामनावृष्ट्यामनम्भसि।
मुनिभिः संस्तुता भूमौ संभविष्याम्ययोनिजा ॥ ४२॥ ततः शतेन नेत्राणां निरी-
क्षिष्यामि यन्मुनीन्। कीर्त्तयिष्यन्ति मनुजाः शताक्षीमिति मां ततः ॥ ४३ ॥
ततोऽहमखिलं लोकमात्मदेहसमुद्भवैः। भरिष्यामि सुराः! शाकैरावृष्टेः प्राण-
धारकैः ॥ ४४ ॥ शाकम्भरीति विख्यातिं तदा यास्याम्यहं भुवि। तत्रैव च
वधिष्यामि दुर्गमाख्यं महासुरम् ॥ ४५ ॥

॥४०॥४१॥४२॥ शताक्षी-शाकम्भरी-दुर्गाणां स्थानानि तु कृष्णवेणीतुङ्गभद्रयोर्मध्यभागे सह्याद्रेरीषत् प्राच्यां प्रसिद्धाः ॥ ४३ ॥ ४४ ॥ ४५

॥४६॥४७॥ भीमा देव्यवतारस्तु नाद्यापि जातः, वैवस्वत एव मन्वन्तरे पञ्चाशत्तमे चतुर्युगे भविष्यतीति लक्ष्मीतन्त्रादिति केचित्, वस्तुतस्तु रक्तदन्त्यादयः षडप्यवतारा भाविन एव, मूले पुनरपि, भूयश्च, पुनश्चाहं, यदारुणाख्य, इत्येभिः पदैरुत्तरोत्तरकालस्यैव कीर्त्तनात् 'तस्मिन्नेवान्तरे शक्र चत्वारिंशत्तमे युगे' इत्युपक्रम्य

दुर्गादेवीति विख्यातं तन्मे नाम भविष्यति। पुनश्चाहं यदा भीमं रूपं कृत्वा हिमाचले ॥४६॥ रक्षांसि भक्षयिष्यामि मुनीनां त्राणकारणात्। तदा मां मुनयः सर्वे- स्तोष्यन्त्यानम्रमूर्त्तयः ॥४७॥ भीमादेवीति विख्यातं तन्मे नाम भविष्यति। यदाऽरुणाख्यस्त्रैलोक्ये महाबाधां करिष्यति॥४८॥ तदाहं भ्रामरं रूपं कृत्वाऽसंख्येय- षट्पदम्। त्रैलोक्यस्य हितार्थाय वधिष्यामि महासुरम् ॥ ४९ ॥

शताक्ष्यवतारस्य तन्त्रान्तरे कथनात्, तस्मिन्नेवेत्यस्य वैवस्वत इत्यर्थः। 'चतुर्युगेऽत्र पञ्चाशत्तमे मुनिभिरर्चिते'- त्युपक्रम्य भीमादेवीकथनाच्च, तत्रैव 'युगे षष्ठितमे, कश्चिदरुणो नाम दानव' इत्यादि कथनाच्च, परन्तु साम्प्रतिकाच्छ्वेतवराहकल्पात् प्राक्तनकल्पेष्वपि देव्यवताराणामेतेषां मन्वन्तरयुगभेदेन जातत्वाच्छाक- म्भर्य्यादीनां तत्तत् कुलदेवतात्वेनार्चनमधुनातनानां सङ्गच्छत एव ॥ ४८ ॥ ४९ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भ्रामरी तु भीमरथीकाकिन्योः सङ्गमेऽनुगुणठाख्य क्षेत्रे ततः प्राच्यां सन्नितिक्षेत्रे च चन्द्रकलापरमेश्वरीति नाम्ना प्रसिद्धा सैवास्माकं कुलदेवता ॥५०॥ 'तदा तदावतीर्य्य' एलाम्बातुलजैकवीरायोगलादिनाम्नावतीर्य्य,

भ्रामरीति च मां लोकास्तदा स्तोष्यन्ति सर्वतः। इत्थं यदा यदा बाधा दानवोत्था भविष्यति ॥ ५० ॥ तदा तदाऽवतीर्य्याहं करिष्याम्यरिसंक्षयम् ॥ ५१ ॥ इति मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये नारायणीस्तुतिर्नाम एकादशोऽध्यायः ॥ ११ ॥

एताः पद्मपुराणेऽष्टशतदेवीतीर्थमालाध्याये गणितास्तत एवावगन्तव्याः। ऋषिर्देवी देवा देवीति चत्वार एवोवाच मन्त्राः यथास्थानमेव सन्ति स्तोत्रारम्भे तु देवा ऊचुरिति नास्ति ॥ ५१ ॥ इति श्रीगुप्तवत्यां मन्त्रव्याख्याने एकादशोऽध्यायः ॥ ११ ॥

For Private and Personal Use Only

देवीति। इत उत्तरोभागश्चरित्रत्रयशेषोऽप्युत्तमचरित्र एवाऽव्यवस्थितत्वादन्तर्भवति, एवं प्रथमचरित्रस्य योगनिद्रां

देव्युवाच। एभिस्तवैश्च मां नित्यं स्तोष्यते यः समाहितः। तस्याहं सकलां बाधां नाशयिष्याम्यसंशयम् ॥ १ ॥ मधुकैटभनाशञ्च महिषासुरघातनम्। कीर्त्तयिष्यन्ति ये तद्वद्बधं शुम्भनिशुम्भयोः ॥ २ ॥ अष्टम्यां च चतुर्दश्यां नवम्यां चैकचेतसः। श्रोष्यन्ति चैव ये भक्त्या मम माहात्म्यमुत्तमम् ॥ ३ ॥ न तेषां दुष्कृतं किञ्चिद् दुष्कृतोत्था न चापदः। भविष्यति न दारिद्र्यं न चैवेष्टवियोजनम् ॥४॥ शत्रुतो न भयं तस्य दस्युतो वा न राजतः। न शस्त्रानलतोयौघात् कदाचित् संभविष्यति ॥ ५ ॥

यदा विष्णुरित्यादिः पूर्वभागेऽपि ज्ञेयम् ॥ १ ॥ मधुकैटभेत्यादि चरित्रत्रयोपलक्षणम् ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

तस्मान्ममैतदिति । अस्य पठनश्रवणविधिरूपत्वेऽपि मन्त्रत्वं वसन्तायकपिञ्जलानालभेतेत्यादिविधीनामिव न विरुध्यते, एवमेतत्पूर्वोत्तराणां कालफलोद्देशेन कर्मविधिरूपाणामपि मन्त्रत्वम्। श्रोतव्यं चेति चकारः

स.टी.

९०

तस्मान्ममैतन्माहात्म्यं पठितव्यं समाहितैः । श्रोतव्यञ्च सदा भक्त्या परं स्वस्त्य-
यनं महत् ॥ ६ ॥ उपसर्गानशेषांस्तु महामारीसमुद्भवान् । तथा त्रिविधमुत्पातं
माहात्म्यं शमयेन्मम ॥ ७ ॥ यत्रैतत्पठ्यते सम्यङ् नित्यमायतने मम । सदा न
तद्विमोक्ष्यामि सान्निध्यं तत्र मे स्थितम् ॥ ८ ॥ बलिप्रदाने पूजायामग्निकार्य्ये
महोत्सवे । सर्वं ममैतच्चरितमुच्चार्य्यं श्राव्यमेव च ॥ ९ ॥

पादपूरणार्थमेव न समुच्चयार्थः पाठाशक्तौ शृणुयाद्वेत्यर्थः । श्रवणे फलाधिक्यमिति तु कश्चित् ॥६॥ 'त्रिविध-मुत्पातं' दिव्यभौमान्तरिक्षभेदेन आध्यात्मिकाधिदैविकाधिभौतिकभेदेन वा ॥ ७ ॥ पुरुषार्थत्वेन विधाय क्रत्वर्थतयापि विधत्ते बलिप्रदान इति तत्र (तथा न ?) दध्ना जुहुयादितिवदङ्गाङ्गिभावो द्रष्टव्यः ॥ ८ ॥

क्रतूपकारकत्वेनाङ्गत्वं द्रढ़यति 'जानतेति' ज्ञात्वा कर्माणि कुर्वीतेति वचनादिना ज्ञानस्य कर्माङ्गत्वेन तत्स्वरूपमजानता कृतानां बल्यादिकर्मणां यद्वैगुण्यं तदेतत्पठनश्रवणान्यतरेण निवर्त्तत इति भावः। प्रतीच्छिष्यामि गृह्णामि ॥ १० ॥ 'शरत्काले' शारदनवरात्रे 'वार्षिकी' वर्षस्य वत्सरस्यारम्भे क्रियमाणा चैत्रनवरात्र

जानताऽजानता वापि बलिपूजां तथा कृताम्। प्रतीच्छिष्याम्यहं प्रीत्या वह्निहोमं तथा कृतम् ॥ १० ॥ शरत्काले महापूजा क्रियते या च वार्षिकी। तस्यां ममैतन्माहात्म्यं श्रुत्वा भक्तिसमन्वितः ॥ ११ ॥ सर्वाबाधाविनिर्मुक्तो धनधान्यसमन्वितः। मनुष्यो मत्प्रसादेन भविष्यति न संशयः ॥ १२ ॥

इत्यर्थः। चकारादाषाढ़पौषनवरात्रयोर्ग्रहणं तयोरपि देवीभागवतादौ प्रसिद्धत्वात्, प्रतिसंवत्सरं कुर्याच्छारदं वार्षिकं तथेति तन्त्रान्तरे द्वयोरेव ग्रहणमुपलक्षणमित्यपि सुवचम्, आषाढ़स्य प्रथमदिवसमेघमाश्लिष्टसानुमिति व्यवहारादिभिः वार्षिकपदं वृष्ट्यारम्भे क्रियमाणपरमित्यपि सुवचमेव, प्रतिवर्षक्रियमाणेति व्याख्यातुमातीव स्वरसा ॥ ११ ॥ १२ ॥

उत्पतय इति द्वितीयायाजसादेशः ॥ १३ ॥ १४ ॥ नैमित्तिकत्वेनार्थ्ये तद्विवक्ते शान्तीति, शृणुयादिति पाठस्याप्युपलक्षणम् ॥१५॥ दुःस्वप्नमिति दुष्टोऽसत्फलप्रदः स्वप्नो यस्य दर्शनस्य विषयस्तत् दृष्टं दर्शनं सुस्वप्नं

स.टी. सुफलप्रदस्वप्नविषयकं भवति । नृभिरित्यस्य पठितश्रोतृमनुष्यपरत्वेन तद्विशेषणांशस्य कारणत्वाभिप्रायेण

८१ श्रुत्वा ममैतन्माहात्म्यं तथा चोत्पत्तयः शुभाः। पराक्रमं च युद्धेषु जायते निर्भयः पुमान् ॥ १३ ॥ रिपवः संक्षयं यान्ति कल्याणं चोपजायते। नन्दते च कुलं पुंसां माहात्म्यं मम शृण्वताम् ॥ १४ ॥ शान्तिकर्म्मणि सर्वत्र तथा दुःस्वप्नदर्शने। ग्रहपीड़ासु चोग्रासु माहात्म्यं शृणुयान्मम ॥ १५ ॥ उपसर्गाः शमं यान्ति ग्रहपीड़ाश्च दारुणाः। दुःस्वप्नञ्च नृभिर्दृष्टं सुस्वप्नमुपजायते ॥ १६ ॥ बालग्रहाभिभूतानां बालानां शान्तिकारकम्। सङ्घातभेदे च नृणां मैत्रीकरणमुत्तमम् ॥१७॥

विशिष्टे तृतीया, दृष्टमिति तु भावे क्तः। दुःस्वप्नादिपदयोः बहुव्रीह्योस्तद्विशेषणत्वान्नपुंसकता, छान्दसो लिङ्गव्यत्यय इति तु केचित्, लक्षणया तत्फलत्वान्नपुंसकतेति कतिपयानां समर्थनं तु चिन्त्यमेव गङ्गापदस्य तीरपरत्वेऽपि नपुंसकत्वादर्शनात् ॥ १६ ॥ सङ्घातभेदे सजातीयानां मिथो वैमनस्ये ॥ १७ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दुर्वृत्तानामिति 'वादी मूकति रङ्कति क्षितिपतिर्वैश्वानरः शीतति क्रोधी शान्तति दुर्जनः सुजनति क्षिप्रानुगः

दुर्वृत्तानामशेषाणां बलहानिकरं परम्। रक्षोभूतपिशाचानां पठनादेव नाशनम् ॥ १८ ॥ सर्वं ममैतन्माहात्म्यं मम सन्निधिकारकम्। पशुपुष्पार्घधूपैश्च गन्धदीपैस्तथोत्तमैः ॥ १९ ॥ विप्राणां भोजनैर्होमैः प्रोक्षणीयैरहर्निशम्। अन्यैश्च विविधैर्भोगैः प्रदानैर्वत्सरेण या ॥ २० ॥ प्रीतिर्मे क्रियते सास्मिन् सकृत् सुचरिते श्रुते। श्रुतं हरति पापानि तथारोग्यं प्रयच्छति ॥ २१ ॥ रक्षां करोति भूतेभ्यो जन्मनां कीर्त्तनं मम। युद्धेषु चरितं यन्मे दुष्टदैत्यनिबर्हणम् ॥ २२ ॥

स्खलती'त्यादिश्लोकप्रसिद्धफलप्रद इत्यर्थः ॥ १८ ॥ १९ ॥ प्रोक्षणीयैः पञ्चामृतपञ्चीरादिमहाभिषेकैः ॥ २० ॥
॥ २१ ॥ २२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

युष्माभिरिति अत्र प्रथमचरणे देवीसूक्तनारायणीसूक्ताख्यस्तोत्रयोर्निर्देशः द्वितीयचरणे ब्रह्मणा च ऋषिभिश्चेति इन्द्रान् महिषान्तकारीसूक्ताख्यस्य तत्र ऋषीणामपि द्रष्टृत्वोक्तेरिति व्याचक्षते, ब्रह्मर्षिणा सुमेधसा

 कृताः 'तथापि मम तावत्त' इत्यादिका इत्यपि कश्चित्, तृतीयचरणेन विश्वेश्वरीं जगद्धात्रीमिति सूक्तस्य

तस्मिन् श्रुते वैरिकृतं भयं पुंसां न जायते। युष्माभिस्तुतयो याश्च याश्च ब्रह्मर्षिभिः कृताः ॥ २३ ॥ ब्रह्मणा च कृता यास्ताः प्रयच्छन्ति शुभां मतिम्। अरण्ये प्रान्तरे वापि दावाग्निपरिवारितः ॥ २४ ॥ दस्युभिर्वा वृतः शून्ये गृहीतो वापि शत्रुभिः। सिंहव्याघ्रानुयातो वा वने वा वनहस्तिभिः ॥ २५ ॥ राज्ञा क्रुद्धेन चाज्ञप्तो वध्यो बन्धगतोऽपि वा। आघूर्णितो वा वातेन स्थितः पोते महार्णवे ॥ २६ ॥

निर्देशः। लक्ष्मीतन्त्रे एतेषां स्तवानाम् अनादित्वस्मरणात् कृता इत्यस्य दृष्टा इत्येवार्थं इत्याहुः वस्तुतः षडङ्गानामिव सकर्तृकाणामपि प्रवाहानादितानविरुध्यते ॥ २३ ॥ प्रान्तरे दूरशून्याऽध्वनि ॥ २४ ॥ ॥ २५ ॥ ॥ २६ ॥

For Private and Personal Use Only

पतत्सु चापि शस्त्रेषु संग्रामे भृशदारुणे सर्वाबाधासु घोरासु वेदनाभ्यर्दितोऽपि वा ॥२७॥ स्मरन्ममैतच्चरितं नरोमुच्येत सङ्कटात् । मम प्रभावात् सिंहाद्या दस्यवो वैरिणस्तथा ॥ २८ ॥ दूरादेव पलायन्ते स्मरतश्चरितं मम । ऋषिरुवाच । इत्युक्त्वा सा भगवती चण्डिका चण्डविक्रमा ॥ २९ ॥ पश्यतामेव देवानां तत्रैवान्तरधीयत । तेऽपि देवा निरातङ्काः स्वाधिकारान् यथा पुरा ॥ ३० ॥ यज्ञभाजभुजः सर्वे चक्रुर्विनिहतारयः । दैत्याश्च देव्या निहते शुम्भे देवरिपौ युधि ॥ ३१ ॥ जगद्विध्वंसिनि तस्मिन् महोग्रे तुलविक्रमे । निशुम्भे च महावीर्य्ये शेषाः पातालमाययुः ॥ ३२ ॥ एवं भगवती देवी सा नित्यापि पुनः पुनः । संभूय कुरुते भूप ! जगतः परिपालनम् ॥ ३३ ॥

॥ २७ ॥ २८ ॥ २९ ॥ पश्यतामेवेति षष्ठी चाऽनादरे ॥ ३० ॥ ॥ ३१ ॥ ॥ ३२ ॥ ॥ ३३ ॥

For Private and Personal Use Only

'प्रसूयते' प्रसूते, सा अयाचितेति छेदः निष्कामाराधितेति तदर्थः 'विज्ञानं' विशिष्टमुत्कृष्टं कैवल्यजनकं, विज्ञानं शिल्पशास्त्रयोरित्यस्याश्रयणेतु याचितेत्येव छेदः ॥ ३४ ॥ ३५ ॥ ३६ ॥ 'भवकाले' वैभवकाले 'अभावे' विप-

तयैतन्मोह्यते विश्वं सैव विश्वं प्रसूयते। सा याचिता च विज्ञानं तुष्टा ऋद्धिं प्रयच्छति ॥ ३४ ॥ व्याप्तं तयैतत्सकलं ब्रह्माण्डं मनुजेश्वर ! । महाकाल्या महाकाले महामारी-स्वरूपया ॥ ३५ ॥ सैव काले महामारी सैव सृष्टिर्भवत्यजा। स्थितिं करोति भूतानां सैव काले सनातनी ॥ ३६ ॥ भवकाले नृणां सैव लक्ष्मी-वृद्धिप्रदा गृहे। सैवाभावे तथाऽलक्ष्मीर्विनाशायोपजायते ॥ ३७ ॥ स्तुता संपूजिता पुष्पैर्धूपगन्धादिभिस्तथा। ददाति वित्तं पुत्रांश्च मतिं धर्मे तथा शुभाम् ॥३८॥ इति मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये भगवतीवाक्यं नाम द्वादशोऽध्यायः ॥ १२ ॥

त्काले अलक्ष्मीरिति छेदः ॥ ३७ ॥ तादृशकाले तन्निरसनोपायमाह स्तुतेत्यादिना ॥ ३८ ॥ इति गुप्तवत्यां मन्त्रव्याख्याने द्वादशोऽध्यायः ॥ १२ ॥

॥ १ ॥ ॥ २ ॥ ॥ ३ ॥ ॥ ४ ॥ ॥ ५ ॥

ऋषिरुवाच । एतत्ते कथितं भूप! देवीमाहात्म्यमुत्तमम् । एवं प्रभावा सा देवी ययेदं धार्य्यते जगत् ॥ १ ॥ विद्या तथैव क्रियते भगवद्विष्णुमायया । तया त्वमेष वैश्यश्च तथैवान्ये विवेकिनः ॥ २ ॥ मोह्यन्ते मोहिताश्चैव मोहमेष्यन्ति चापरे । तामुपैहि महाराज ! शरणं परमेश्वरीम् ॥ ३ ॥ आराधिता सैव नृणां भोग-स्वर्गापवर्गदा। मार्कण्डेय उवाच। इति तस्य वचः श्रुत्वा सुरथः स नराधिपः॥४॥ प्रणिपत्य महाभागं तमृषिं शंसितव्रतम् । निर्विण्णोऽति ममत्वेन राज्यापहरणेन च ॥ ५ ॥ जगाम सद्यस्तपसे स च वैश्यो महामुने ! । सन्दर्शनार्थमम्बाया नदी-पुलिनसंस्थितः ॥ ६ ॥

'अम्बाया' इति तुरीयाया इत्यर्थः देवी सूक्तजपाल्लिङ्गात् प्रत्यक्षं प्राह चण्डितकेति वाक्यशेषाच्च ॥ ६ ॥

नदीपुलीनं तत्तीरभागं 'स च' राजा च 'देवीसूक्तं' वह्वृचेष्वतिप्रसिद्धमेकं, तन्त्रान्तरेष्वध्याय-त्रयात्मकं प्राच्येषु प्रसिद्धकल्पमपरम्, मालामन्त्रात्मकमपि गद्यात्मकं क्वचित् प्रसिद्धमन्यत्, लक्ष्मीतन्त्रे

स च वैश्यस्तपस्तेपे देवीसूक्तं परं जपन्। तौ तस्मिन् पुलिने देव्याः कृत्वा मूर्त्तिं महीमयीम् ॥ ७ ॥ अर्हणां चक्रतुस्तस्याः पुष्पधूपाग्नितर्पणैः। यताहारौ निराहारौ तन्मनस्कौ समाहितौ ॥ ८ ॥ ददतुस्तौ बलिञ्चैव निजगात्रासृगुक्षितम्। एवं समाराधयतोस्त्रिभिर्वर्षैर्यतात्मनोः ॥ ९ ॥ परितुष्टा जगद्धात्री प्रत्यक्षं प्राह चण्डिका। देव्युवाच। यत्प्रार्थ्यते त्वया भूप! त्वया च कुलनन्दन! ॥१०॥ मत्तस्तत् प्राप्यतां सर्वं परितुष्टा ददामि तत्

व्यवहारदर्शनात् नमो देव्या इत्यादिकमितरत् इति चत्वारः पञ्चाव्याख्यातृभेदेनोक्ता यथा सम्प्रदायं व्यवस्थिता ज्ञेयाः ७ ॥ आदौ यताहारौ कतिपयकालोत्तरं निराहारौ ॥ ८ ॥ ब्राह्मणेतरवर्णत्वेन निषेधाभावात् आह निजगात्रेति ॥ ९ ॥ कुलनन्दनेति वैश्यस्य संबुद्धिः ॥ १० ॥

For Private and Personal Use Only

॥११॥ ममेति। ममताहन्ताभ्यां प्रकर्षेणाज्ञः सन्नित्यर्थः, समस्तमर्द्धमेकमेव समस्तपदं तन्मध्येबुद्धिमद्वाचकस्य

मार्कण्डेय उवाच। ततो वव्रे नृपो राज्यमविभ्रंश्यन्यजन्मनि॥११॥ अत्र चैव निजं राज्यं हतशत्रुबलं बलात्। सोऽपि वैश्यस्ततो ज्ञानं वव्रे निर्विण्णमानसः॥ १२ ॥ ममेत्यहमिति प्राज्ञः सङ्ग-विच्युतिकारकम्। देव्युवाच। स्वल्पैरहोभिर्नृपते! स्वं राज्यं प्राप्स्यते भवान्॥ १३ ॥ हत्वा रिपूनस्खलितं तव तत्र भविष्यति। मृतश्च भूयः संप्राप्य जन्मदेवाद्विवस्वतः॥ १४ ॥ सावर्णिकोमनुर्नाम भवान् भुवि भविष्यति। वैश्यवर्य्य! त्वया यश्च वरोऽस्मत्तोभिवाञ्छितः॥ १५ ॥ तं प्रयच्छामि संसिद्ध्यै तव ज्ञानं भविष्यति।

प्राज्ञपदस्येह निवेशः छान्दसो नरावाशंसमित्यत्र वेति केचित्॥ १२ ॥ 'तत्र' स्वदेशे आधिपत्यं भविष्यति ॥ १३ ॥ ॥ १४ ॥ ॥ १५ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥१६॥१७॥ 'सावर्णिर्भविता' सूर्य्यसावर्णि-दक्षसावर्णि-ब्रह्मसावर्णि-धर्म्मसावर्णि-रुद्रसावर्णि-रौच्य भौत्येषु सप्तसु

मार्कण्डेय उवाच । इति दत्वा तयोर्देवी यथाभिलषितं वरम् ॥१६॥ बभूवान्तर्हिता सद्यो भक्त्या ताभ्यामभिष्टुता । एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः ॥१७॥ सूर्य्याज्जन्मसमासाद्य सावर्णिर्भविता मनुः ॥१८॥ इति मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे श्रीदेवीमाहात्म्ये सुरथवैश्ययोर्वरप्रदानं नाम त्रयोदशोऽध्यायः ॥ १३ ॥

भाविषु प्रथमो मनुर्भविष्यति । अत्र षडुवाच मन्त्रा यथास्थानं सन्ध्येवेति शिवम् ॥ १८ ॥ इति गुप्तवत्यां मन्त्रव्याख्याने त्रयोदशोऽध्यायः ॥ १३ ॥

---

* (पञ्चमाध्यायमारभ्यत्रयोदशाध्यायान्तं पाठान्तराणि) गजरत्नञ्च हृत्वा० पा० हृत्वेत्याद्युत्तरान्वयीति नागे० । गजरत्नञ्च हृतम् इति क्वचित्, गजरत्नानीति पाठे वश्यानीति पूर्वेणान्वयः अ० ५।६०। उच्चैः श्रवससंज्ञं तत् इति पा० ६१ चपलापाङ्गीति पा० । ६४ केशाकर्षणनिर्धूतगौरवा वा गमिष्यति । गौरवान्नागमिष्यसीति वा पाठान्तरम् ७४ । आक्रम्य चरणेनान्यान् इति पा० । अ० ६।१२ गच्छन्त तत्र गत्वा चेति पा० १८ ॥ मषीवर्णमिति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मूर्द्धन्यः पाठः क्वचित् अ० ७।४ । अङ्कुशग्राही, अङ्कुशग्राहेति वा पाठद्वयम् ९ असुराणां महात्मनां, महच्छरीराणामित्यर्थः। दुरात्मनामिति पा० १३ मुण्डच्छिन्नैरिति पाठे मुण्डा मस्तका निच्छिन्नान्यपनीतानि यैः तानि तैरिति शं० १६ । गृहीत्वा मौण्डमेव चेति पाठे शिरसान्वयः अन्यथा मुण्डं नाम मशिरस्कं तद्देहमित्यर्थः कार्य्यः २२ ॥ धूम्राणामिति पाठे धूम्रनाम्नाम् । अ० ८।४ तन्नादानिति बहुवचनपाठो वा । ८ शरौघैः परिवारिताः, पा० १० विमानस्था, साचेति पा० १४ दूत्येनेति शन्तनुः २७ पूर्णदिगम्बरा दिगन्तरेति च पाठद्वयम् ३६ मेदिन्यामिति पाठान्तरम् ४० विस्तरं वदनम् पा० ५२ वेगिता । पा० ५३ हते मातृगणस्तस्मिन्ननर्दाऽसृङ्मदोद्धतः । पा० ६३ ॥ तथा चास्त्रैः सुदारुणैः अ०१०।७ उत्पाट्य उत्पाद्य उत्च्छिप्येति पाठत्रयम् २० शान्तदिग्जनितस्वनाः । शान्ताः दिक्षुजनिताः स्वना उत्पातजनकस्फुटनादिशब्दा येषां ते । ना० २८ ॥ अत्राध्याये गुप्तवतीमते त्रयोदशश्लोकोत्तरम् 'अश्वांश्च पातयामासरथं सारथिना सहे'त्यर्द्धमधिकं जज्वलुश्चेत्याद्यन्तिमोऽर्द्धश्च परित्यक्त इति बोध्यम् । इष्टलाभाद् इति पाठा० अ० ११।१॥ सर्वमङ्गलमाङ्गल्ये इति पाठान्तरम् । अ० ११।९ ॥ महारात्रे महामाये० पा० ११ । २१ । ददासि कामान् सकलानभीष्टान् ११।२८ । एवमेतत्त्वया पा० ११।३६ ॥ प्रतीच्छिष्यामि पा० प्रतीच्छतिर्ग्रहणार्थः । अ० १२।१० । धनधान्यसुतान्वित इति पा० । अ० १२।१२ । तथोत्पत्तीः पृथक् शुभाः । पा० १२।१३ । कल्याणं चोपपद्यते । १४ ॥ जगद्विध्वंसके पा० १३।३२ निराहारौ यतात्मानौ पा०।८ । मत्तस्तत्प्राप्तर्थ्यतामिति पा० १३।११ । अत्रैव चेति पा० १३।१५ ।) *

For Private and Personal Use Only

एवं कात्यायनीतन्त्रे प्रतिमन्त्रं विशिष्टविभागो विस्तरेण वर्णितः। यामले त्वीषत्प्रकारभेदेन चतुःश्लोक्या सङ्क्षिप्य दर्शितः। यथा नवार्णेनहुनेदादौ षोडशाहुतिभिस्तथा चण्डिका वैश्य एवैको ब्रह्मैको भगवानपि ॥ मार्कण्डेयास्तथा पञ्च राजानो वेदसंमिताः। षड्विंशतिस्तु ऋषयो देव्य एकादशस्मृताः ॥ देवौ द्वावथ दूतौ द्वावध्यायास्तु त्रयोदश। श्लोकाः पञ्चशतानि स्युः सप्तपञ्चाशदुत्तराः ॥ श्लोकार्द्धानि चतुश्चत्वारिंशत्संख्यानि निर्दिशेत्। सर्वान्ते तु नवार्णेन षोडशाहुतयः पुनरिति ॥ अत्र चण्डिका देव्य एकादशेति विभज्यनिर्देशेऽपि देवीत्वेनैक्याद् द्वादश देव्युक्तय इत्येव द्रष्टव्यं। केचित्तु विभज्योक्तबलात् सर्वारम्भे 'ओं नमश्चण्डिकायै' इत्यस्य मन्त्रान्तरत्वमिच्छन्ति, तत्पक्षे मकारादिर्नुकारान्त इति वचनं विरुध्यते, कतमो देव्युवाच मन्त्रो निरसनीय इत्यनिर्धारणञ्च स्यात्। अयमपि पक्षो निष्कृष्य शतश्लोक्यां संगृहीतः सार्द्धैरष्टभिश्लोकैः। यामले तु त्रिपान्मन्त्राः पुनरुक्ताश्च नेष्यते। वाङ्मन्त्रेषु त्रयं न्यूनमर्द्धेषु क्रतबोधिकाः ॥ विंशतिश्लोकसंख्यायामध्याया अपि मन्त्रकाः आद्यंतयोर्नवार्णस्योक्तयः षोडश षोडश ॥ एकोऽधिकः श्लोकपिण्डे शेषः सर्वोऽपि पूर्ववत्। तथाहि प्रथमो वैश्यश्चरमर्षिश्च नादिमे ॥ प्रीतौ स्वस्तव युद्धेनेत्यर्द्धश्लोकात्मको मनुः आवां जहीत्यर्द्धतः प्राक्, पञ्चमे नास्ति देववाक् ॥ दशमे जज्वलुश्चेति मनुरर्द्धोऽधिकोऽन्तिमः एवं प्रभावा सा देवी तामुपैहीति पद्ययोः द्वे द्वे अर्द्धे पृथङ्मन्त्राविति भेदस्त्रयोदशे ॥ तेन ब्रह्मा भगवान् वैश्यश्चैकैकशश्चतू राजा द्विर्द्विर्दूतौ देवाः मार्कण्डेयाम्बिके

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शराकमिति॥ षड्विंशतिश्च ऋषयस्त्रयोदशाध्यायवाक्यानि श्लोकास्तु सप्तपञ्चाशदधिकशतपञ्चकप्रमिताः ॥ अर्द्धानि चतुश्चत्वारिंशत्तत् सार्द्धषष्टिषट्शतकं षोड़शनवार्णमन्त्रैः पुटितं चेद्यामलोक्तसप्तशती ॥ ८० ॥

कात्यायनीतन्त्रे विभागस्य सामस्त्ये नोक्ते रितरतन्त्रयोरपूर्णतयोक्तेर्दर्शसौर्य्ययोरिव साजात्यात् प्रकृतिविकृति भावः, प्रकृतौ च पञ्चविधा मन्त्रसंख्या त्रिविधा पिण्डसंख्या चेति पूर्वं प्रदर्शितम्, इदानीं विकारांशमात्रं प्रदर्शयति पञ्चमाध्यायस्थैर्य्यादेवीत्यादिभिर्द्वाविंशतिश्लोकैः षट्षष्ठिमन्त्रा निष्पादितास्ते यामलपक्षे न सन्ति विभजनाभावात् द्वाविंशतिः श्लोकमन्त्रा एव ; इति दत्वा तयोर्देवीति श्लोकद्वयं सकृदेव पठनीयं न द्विः, उवाच मन्त्रेषु प्रथमाध्याये वैश्यर्षिद्वयं पञ्चमे स्तोत्रारम्भे देवा ऊचुरित्येकमिति मन्त्रत्रयं नास्तीति संहृत्य प्रकृतित एकसप्ततिमन्त्रान्यूनाः तत्सम्पत्त्यर्थं यादेवीति द्वाविंशत्यां विंशतिः श्लोकाः प्राकृतश्लोकमन्त्रेषु वर्द्धिताः अवशिष्ट-द्वयस्य प्रत्याम्नायरूपमेवं प्रभावा तामुपैहीति प्राकृतश्लोकमन्त्रद्वयं गृहीत्वा चत्वारोऽर्द्धमन्त्राः कृताः, प्रीतौ स्वस्तवयुद्धेन श्लाघ्यस्त्वं मृत्युरावयोरित्यर्द्धं प्रथमाध्याये, जज्वलुश्चाग्नयः शान्ताः शान्तादिग् जनितस्वना इत्यर्द्धं दशमाध्यायान्ते च प्रकृतावविद्यमानमेव निक्षिप्तमिति षड्भिरर्द्धैः प्राकृतार्द्धमन्त्रसंख्यापि वर्द्धिता एवं षड्-विंशतिः । अध्यायवाक्यानां त्रयोदशानां मन्त्रत्वं प्रकृतावविद्यमानं स्वीकृतं, तानि तु 'इति मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये मधुकैटभवध' इत्यादिरूपाण्येव सम्प्रदायात् न तु प्रथमोऽध्याय इत्यादि-

For Private and Personal Use Only

रूपाणि, पुराणे तस्य चतुःसप्ततितमाऽध्यायत्वेन प्रथमादिपदप्रक्षेपे मानाभावात्, देवीमाहात्म्यान्तर्गतत्वेन प्राथम्यादिसमर्थनेऽपि स्वकल्पितपदप्रक्षेपे मन्त्रत्वहान्यापत्तेः ऊहप्रापकन्यायाभावात्, एवमूनचत्वारिंशदव-
स. टी. शिष्टद्वात्रिंशत्संख्यापूर्त्यर्थं नवार्णमन्त्र एव पुनः पुनरावृत्याशरणीकृतः, अप्राकृतार्द्धद्वयप्रयुक्तैकश्लोकः प्राकृत-
८७ श्लोकपिण्डसंख्यायामभिवृद्धः अवशिष्टार्द्धविशेषनिर्धारणादिकं प्रकृतिवद्वैवेत्यर्थः साष्टषष्ठिषट्शतकमित्येताव न्मात्रम् मकारादिनुकारान्तमन्त्रान्तर्गतमन्यत्तुवहिष्ठादानेयमिति प्रकृतितो गौणोऽयं वैकृतो विभाग इति ध्वननाय पार्थक्येन तावन्मात्रं समुदायीकृत्य प्रदर्शितम्, किं च नमो देव्या इति श्लोकपञ्चके कस्यापि त्रय-स्यार्धीकरणसम्भवात् नारायणीस्तुतौ सर्वतः पाणिपादान्त इति श्लोकस्य तैस्तैः पठ्यमानस्य निवेशसम्भवा-न्यायविरोधाभावेनानध्यवसाये दोषः निश्चायकस्पष्टतन्त्रवचनादर्शनात् संप्रदायपारम्पर्यस्योच्छिन्नकल्पत्वाच्च अतः प्राकृत एव मन्त्रविभागो निष्कम्पप्रवृत्तिर्युक्तेति । इति गुप्तवत्यां यामलतन्त्रोक्तमन्त्रविभागनिष्कर्षः ॥*॥
अथ तन्त्रस्था च चतुःश्लोकी, ब्रह्मैको भगवानेको मार्कण्डेयास्तु मार्गणाः । दूतवैश्यौ पुनर्द्वौ द्वौ राजोवाचेति शाखिनः ॥ देवाः पञ्चर्षयस्त्रिंशद्देव्युवाचेति भास्कराः । श्लोकाश्चतुरशीतिस्तु तथा पञ्चशतान्यपि॥ अर्द्धानि सप्त च द्वे च अध्यायास्तु त्रयोदश । पादानि पूर्वपरयोस्तथा षोड़श षोड़श ॥ तानि श्वेताननादीनि सत्यं-ऽन्तानीति षोड़श । एते मिलित्वा मन्त्राः स्युः सप्तशत्यभिधानका इति । शाखिनो वेदाश्चत्वारः सप्त च द्वे च

नवैवेत्यर्थः, अयमपि पक्षः शतश्लोक्यां निरूप्य पञ्चदशभिः श्लोकैः संगृह्योक्तः, अथतन्त्रान्तरे नेष्टौ पुनरुक्त-विपाप्मनू एकोनत्रिंशदूनानि मन्त्रार्द्धेष्वथ वाग्मनौ पञ्चाधिकाः सप्तचत्वारिंशत् श्लोकमनुष्वपि ॥ आद्य-न्तयोर्वैकृतिकरहस्यपतितं द्विशः श्वेताननादिसत्यन्तनामषोड़शकं पठेत् ॥ सार्द्धदशश्लोका पिण्डेऽध्यायमन्त्रादि-पूर्ववत् । प्रकृतितो द्वौ षट्षष्ठिरूनत्रिंशच्चेति मिलित्वा सप्तनवतिर्मन्त्रान्यूनाः तत्प्रयुक्ता द्वाविंशतिः सार्द्ध-चतुर्दश चेति श्लोका लब्धाः सार्द्धदशश्लोका अप्राकृतानिच्छिप्ता इति सप्तचत्वारिंशच्छ्लोकमन्त्राः पञ्चशत्यु-त्तरसप्तत्रिंशदूपप्राकृतश्लोकमन्त्रसंख्यायां वर्द्धिताः ते च षोड़शनाम्नां द्वैगुण्येनाध्यायमन्त्रत्रयोदशकेनोवाच-मन्त्रपञ्चकेन च वर्द्धितेन मिलिताः सप्तनवतिः संपद्यन्ते, नवार्द्धप्रयुक्तसार्द्धश्लोकचतुष्टयस्य च योगेन श्लोक-पिण्डसंख्या पञ्चशतानि सार्द्धाष्टाशीतिश्च भवन्तीति प्रकृतिपिण्डसंख्यातः सार्द्धदशकमपि वृद्धं भवतीत्यर्थः, एतदेवाध्यायभेदेन व्यवस्थापयितमाह, तथाहि प्रथमे सोऽचिन्तयदित्यर्द्धमन्त्रकः अन्येऽष्टसप्ततिः श्लोकमन्त्रा एव नवाधिकाः, प्रोतौ स्व इति योगेन श्लोक आवां जहोत्यपि । द्वितीये सप्तमश्लोकात् परतो वाग्ऋषेर्मता ॥ चतुर्थे प्रथमश्लोकात्परतो देववागपि । व्रियतां त्रिदशा इत्यस्योत्तरार्द्धे ददाम्यहम् ॥ ततः कर्त्तव्यमित्यर्द्धद्वयेऽर्द्धं यथा स्थितम् । पञ्चमे धृतिपुष्टिभ्यां द्वौ श्लोकावधिकौ मनू ॥ भक्ष्यमाणास्त्वया चोग्रा इत्यर्द्धमनुरष्टमे । तत्पश्चादृषि-वाक् प्रोक्ता श्लोकाः सर्वे ततः परे ॥ अध्याये दशमे श्लोकत्रयोत्तरमृषेर्वचः । तत्रापि नेत्यर्द्धमेव जज्वलुस्वार्द्धमत्र

न॥ एकादशे तु प्रथमश्लोकान्ते देववाग्भवेत्। द्वाविंशत्सर्वतः पाणिपादेति श्लोककोऽधिकः॥ शाकम्भरीति विख्यातिमित्यर्द्धात्मैव मन्त्रकाः। द्वादशे द्वावर्द्धमन्त्रौ व्यवधानेन संस्थितौ॥ सर्वं ममैतदित्येको निशुम्भे च महापरः। एतत्ते कथितं भूपेत्यर्द्धमन्त्रस्त्रयोदशे॥ इत्थं त्रयोदशाध्याय्यामर्द्धमन्त्रा नवैव हि। श्लोकवद्वं यथा सम्प्रदायमन्विष्य निक्षिपेत्॥ ११॥ चतुर्थाध्याये व्रियतामित्यर्द्धस्योत्तरं ददाम्यहमिति प्रीत्यास्तवैरेभिः सुपूजिता कर्त्तव्यमपरं यच्च दुष्करं तन्निवेद्यताम् इत्येकः श्लोकः। पञ्चमे लक्ष्मीरूपेणेत्यस्योत्तरं धृतिरूपेणेति तुष्टिरूपेणेत्यस्योत्तरं पुष्टिरूपेणेति च द्वौ श्लोकौ। एकादशे 'सर्वतः पाणिपादान्ते सर्वतोऽक्षिशिरो मुखे। सर्वतः श्रवणघ्राणे नारायणि नमोऽस्तु ते॥ इत्येक इति चत्वारः श्लोका बहुसंवादान्निक्षेप्या, एवं प्रीतौ स्व इत्यर्द्धं जज्वलुश्चेत्यर्द्धं चेति द्वयमपि यद्यपि बहुसंवाद्येव तथापि तयोराद्यमेव निक्षेप्यं न द्वितीयं नवैवार्द्धानीति विधिविरोधापत्तेः तथाहि प्रकृताष्टमदशमैकादशत्रयोदशाध्यायगतश्लोकसंख्यानामेव सार्द्धत्वाच्चत्वार्य्यर्धान्यनयोद्यानि, तथा प्रथमे सोऽचिन्तयदित्येकमावां जहीत्यन्यदिति द्वे, चतुर्थे व्रियतां हृदयेऽस्मदिति द्वे, द्वादशे सर्वं ममैतन्निशुम्भे चेति द्वे, इत्येवं षडर्द्धान्यर्द्धान्तरेण सम्पर्काभावादव्यवहितश्लोकमन्त्रावयवेन मेलने बहूनां मन्त्राणां वाक्यलक्षणभङ्गापत्तेः कतिपयश्लोकगर्भेषूवाच मन्त्रप्रक्षेपापत्तेः आनयनोद्यान्येवेति दशानामावश्यकत्वापत्तिः एतद् द्योतनायैव व्यवधानेन संस्थितावित्येकत्वोक्तमपि विशेषणं योग्यतया सर्वार्द्धान्वयि, अतः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रीतौ स्व इत्यस्यावां नहीत्येतत् समीपे पाठेन तयोरवान्तरवाक्यरूपयोर्महावाक्यरूपैकमन्त्रत्वसम्भवात् तथा स्वीकारेण नवाङ्गत्वमुपपाद्यम्, इतराण्यङ्गानि तु प्रथमाध्याये द्वाविंशतिस्त्रयोदशे षड़ित्यष्टाविंशतिरवशिष्यन्ते तानि परस्पराऽव्यवधानेन चतुर्दशयुग्मरूपाण्येव संपद्यन्त इति श्लोकमन्त्रेष्वेव तन्निवेश इति स्थितिः, अतएवाशयेन जज्वलुश्चाङ्गमत्रनेत्युक्तम् एवं चावशिष्टाः षट्श्लोकास्तत्र तत्र दृश्यमाना बहुशोऽस्माभिः पूर्वं लिखिता अपि विसंवादभूयस्त्वादग्रेनिर्णयतया संप्रदायलाभोत्तरमेव विश्वसनीया इत्याशयेन श्लोकषट्कं यथा सम्प्रदायमन्विष्येत्युक्तम् एतेनास्मिन् पक्षेऽप्यनध्यवसायानपायेन प्रकृतिपक्ष एव निष्कम्पप्रवृत्तिर्युक्तेति ॥ किञ्च कर्त्तव्यमपरं यच्चेत्यङ्गस्यापि क्वचिद्देशे पाठाभावदर्शनाद् त्रियतामित्यङ्गस्य ददाम्यहमित्यङ्गान्तरयोजनेन श्लोकत्वात्तावताप्यङ्गनवकोपपत्तेरनध्यवसाय एवेति ध्वनितम्। अतएवोवाचमन्त्रेषु वरप्रार्थनारम्भस्थदेवोक्तिद्वयमेव स्वीकृत्य तृतीयदेवं, प्रथमाध्याये चरममृषिं प्रथमवैश्यञ्च परित्यज्य, द्वितीयाष्टमदशमाध्यायेष्वधिकत्वेन तन्त्रान्तरोक्तमृषिवाक्यमन्त्रत्रयं स्वीकर्त्तुं न्याय्यमपि प्रत्यक्षवचनविरोधात्तन्त्रद्वयसाङ्कर्येण कल्पितपक्षान्तरस्य समञ्जसस्याप्यविश्वसनीयत्वाच्च त्यक्तव्यमेवेत्यपि ध्वनितं, वचनेन न्यायानामाभासीकरणादिति । यद्यल्पसंवादेनैव षड़पि श्लोका निर्धार्य्यास्तदा पञ्चमेऽध्याये बुद्धिरूपेणेति मन्त्रात्परतो द्वौ मन्त्रौ स्फूर्त्तिमेधा पदघटितौ योज्यौ, एवं सप्तमे उत्थाय च महासिंहमिति श्लोकोत्तरमेकः श्लोकः 'छिन्ने शिरसि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दैत्येन्द्रशङ्खेनादं सुभैरवं तेन नादेन महता त्रासितं भुवनत्रयमिति' अष्टमेऽध्याये योद्धुमभ्याययौ क्रुद्धो रक्तबीजो महासुर इत्यस्योत्तरं 'भागिनेयो महावीर्यस्तयोः शुम्भनिशुम्भयोः। क्रोधवत्याः सुतज्येष्ठो महाबलपराक्रम' इत्येकश्लोकः॥ एकादशेऽध्याये नारायणीस्तुतौ द्वौ श्लोकौ दंष्ट्रा करालवदन इति श्लोकोत्तरं, 'कालरात्रिस्वरूपेण त्रैलोक्यमथनोद्यमे। महाकाले महामाये ना०॥ महालक्ष्मीशिवे! शान्ते! सर्वसिद्धे पराजिते। महारात्रि! महाविद्ये नारायणि नमोऽस्तु ते'॥ इति। एतान् षट्श्लोकान् क्वचिद्देशे केश्चिदादृतत्वाद्वा संख्यापूरणाय गृह्णीयादित्याह, द्वाभ्याम्॥ अथवा पञ्चमे स्फूर्त्तिमेधे बुद्धेः परौ मनू सप्तमेऽप्यथ मुण्डात् प्राक् छिन्ने शिरसिदा इति॥ रक्तबिन्दुर्यदेति प्राग्भागिनेयो महाष्टमे। कालरात्रिमहालक्ष्म्यौ विंशादेकादशे परे॥ अथ समुदितसंख्यामाह। विधिभगवन्तौ दूतविशौ देवस्तकण्डजौ शशिद्विशराः नृपदेव्यृषयोऽध्यर्कत्रिंशत्संख्यास्त्रयोदशाध्यायाः॥ १६॥ श्लोका स्युः पञ्चशतानि चतुरशीतिर्नवार्द्धानि नाम्नां षोडशभिः संपुटिता तन्वान्तरोक्तसप्तशती॥१७॥ अथ संग्रह एवावशिष्टाः षट्श्लोकाः। आसु तु तिसृषु प्रथमा प्राच्योदीच्यप्रतीच्यसूरिमता दक्षिणदेश्यैरन्ये आदृतदेश्ये विलुप्तदेश्ये च १८ एवं वाक्यं मन्त्रोऽध्याहृत्यानुषक्तिभिः सुयोज्यापि न पुनर्मन्त्रान्तरगतपदसाकाङ्क्षो विना वचनम् १९ इति मत्वैष परिश्रम इह रचितो मन्त्रलक्षणानुसृतः तदिमं विज्ञाय ज्ञा अज्ञाकलितं विभागसुज्झन्तु॥ इति मन्त्रपरिच्छेदो भास्करसंख्यावदात्मनैव कृतः देव्युक्ति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

परिच्छेदो भास्करसंख्यावदात्मनैव यतः १०१ चण्डीस्तवविभागांशे बालोऽप्युत्कम्पितो यदि। स्यादनेन निबन्धेन शतश्लोकेन पण्डितः॥ इति श्रीधीरगम्भीररायसोमसुतः सुतः। भारत्यधाच्छतश्लोकीं काशीस्थो बह्वृचोऽग्निचित् १०२ आहृतदेश्ये इत्यनयोरीषदपरिसमाप्तौ प्रत्ययः 'विलुप्तदेश्ये' किञ्चिदूनविशेषलोप इत्यल्पादरस्तयोरित्यर्थः 'अज्ञाकलितम्' उक्तमन्त्रस्वरूपानभिज्ञकृतकारिकोक्तम्॥ देव्युक्तिपदेन देवीकर्मकोक्तिरूपश्चण्डीस्तवो देवीकर्तृकोक्तिप्रतिपादको देव्युवाचेति मन्त्रश्च श्लिष्टौ, उभयोरपि मन्त्रत्वादेकत्वपरिच्छेदपदेन विभजनपरा शतश्लोकी, अन्यत्रेयत्तारूपसंख्यया परिच्छेदः भास्करेत्यादेरेकत्र तन्नामकविद्वदात्मा, अन्यत्र द्वादशसंख्याकाभेदः एव कारस्यैकत्वाज्ञकृतविभागस्यासारत्वमन्यत्र देव्युवाचेति भास्करा इति तन्त्रान्तरोक्तवचनार्थे सर्वेषामेककण्ठेन विसंवादराहित्यं च ध्वन्यं, बह्वृच इति विशेषणेन काण्वबुद्धिसिद्धसिद्धवदापातग्राहिबुद्धिमथितेयन्न भवतीति ध्वनितम्। इति गुप्तवत्यां तन्त्रोक्तमन्त्रविभागनिष्कर्षः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ रहस्यम्, समेधसम्प्रति राज्ञः प्रश्नः भगवन्निति उपास्यदेवताया मुख्यरूपमुपासनेति कर्त्तव्यतां च वदेत्यर्थः ॥ १ ॥ २ ॥ भक्तोऽसीति देव्या गुरोश्चेत्यर्थः, ग्रन्थारम्भे वर्णितं धर्म्मरूपं ब्रह्मैव चण्डिकापदवाच्यमुपास्यस्वरूपं, तस्याश्च व्यष्टिरूपाणि त्रीणि महाकाली महालक्ष्मीर्महासरस्वतीति, तेन समष्टिरूपैव चण्डिका तुरीया धर्मिरूपा, निर्गुणान्नित्तु पञ्चमीति स्थितिः, आसु व्यष्टित्रयकथनेनैव तदभिन्नायाः समष्टेस्तुरीयायाः

श्रीजगदम्बायै नमः। अस्य श्रीरहस्यत्रयस्य ब्रह्माच्युतरुद्रा ऋषयः नवदुर्गादेवता अनुष्टुप् छन्दः महालक्ष्मीर्बीजं श्रीं शक्तिः अभीप्सितफलसिध्यर्थे रहस्यत्रयजपे विनियोगः। राजोवाच। भगवन्नवतारा मे चण्डिकायास्त्वयोदिताः। एतेषां प्रकृतिं ब्रह्मन् प्रधानं वक्तुमर्हसि ॥ १ ॥ आराध्यं यन्मया देव्याः स्वरूपं येन च द्विज !। विधिना ब्रूहि सकलं यथावत् प्रणतस्य मे ॥२॥ ऋषिरुवाच। इदं रहस्यं परममनाख्येयं प्रचक्षते। भक्तोऽसीति न मे किञ्चित्तवावाच्यं नराधिप ॥ ३ ॥

कथितप्रायत्वान्नामानिर्दिश्यैव व्यष्टिष्वन्यतमामिव तुरीयासमानयोगक्षेमतयोत्तमत्वेन त्रिगुणेति निराकारित्यवतारत्रयान्तर्गतेति च निर्दिशन् शुद्धसत्वस्वरूपां सगुणतुर्य्यामपहृत्यत्रयान्यतमात एवेतरे द्वे निःसृते इत्यादिरीत्या सृष्टिं कथयितुमारभते ॥ ३ ॥

सर्वस्याद्येत्यादिना 'त्रिगुणा' सात्विकराजसतामसमूर्त्तित्रयसमष्टिरेव सर्वप्रपञ्चादिकारणं, केचित्तु, महालक्ष्मीरिति न व्यष्टित्रयान्यतमा अपि तु तुरीयायास्त्वण्डिकाया एव नामान्तरं 'सदाशिवाङ्कमारूढा शक्तिरित्याख्यया शिवा महालक्ष्मीरिति ख्याता सर्वदेवगुणान्विते'ति शिवपुराणादित्याहुः एतत् न यन्त्रेष्वन्तर्गतमहालक्ष्म्याः पार्थक्येनेह रजो भूयिष्ठतया नाम दर्शकेन चेतरयोरिव कथनाभावात्तदर्थमध्याहारादिक्लेशः

सर्वस्याद्या महालक्ष्मीस्त्रिगुणा परमेश्वरी । लक्ष्यालक्ष्यस्वरूपा सा व्याप्यकृत्स्नं व्यवस्थिता ॥ ४ ॥

तुल्य एव, 'लक्ष्या' सगुणा 'अलक्ष्या' निर्गुणा यस्या ग्रहणं नोपलक्ष्यते तस्मादुच्यतेऽलक्ष्येति देव्यथर्वशीर्षश्रुतेः स्वाविषयकज्ञानस्वरूपेति तदर्थः वृत्तिज्ञाननिरासाय स्वाविषयकेति तेषां घटमहं जानामीत्येवाकारात्, ब्रह्मणश्चरमवृत्तिव्याप्यत्वेऽपि फलव्याप्यत्वानङ्गीकारादिति भावः ॥ ४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लक्ष्म्यां निर्दिशति मातुलिङ्गमितिवीजपूराख्यं फलमित्यर्थः 'खेटं' चर्म्म 'बिभ्रती' करैरिति शेषः नागादित्रयं मूर्द्धनि बिभ्रती, 'लिङ्गं' अत्र पुंचिह्नं रुद्रस्य 'योनिः' स्त्रीचिह्नं विष्णोः,: स्त्रीपुंसात्मकत्वं च विष्णुर्योनिं कल्पय-

त्विति श्रुतेः, परिशेषान्नागोब्रह्मणश्चिह्नं स्यात् तेनास्याः ब्रह्मविष्णुरुद्रात्मकत्वं स्त्रीपुंसात्मकत्वं च प्रदर्शितं भवति

मातुलुङ्गं गदां खेटं पानपात्रञ्च बिभ्रती। नागं लिङ्गञ्च योनिञ्च बिभ्रती नृप-
मूर्द्धनि ॥ ५ ॥ तप्तकाञ्चनवर्णाभा तप्तकाञ्चनभूषणा शून्यं तदखिलं स्वेन पूरया-
मास तेजसा ॥ ६ ॥ शून्यं तदखिलं लोकं विलोक्य परमेश्वरी। बभार रूपमपरं
तमसा केवलेन हि ॥ ७ ॥ सा भिन्नाञ्जनसङ्काशा दंष्ट्राञ्चितवरानना। विशाल-
लोचना नारी बभूव तनुमध्यमा ॥ ८ ॥

॥५॥ अलक्ष्यामाह शून्यमिति, प्रलयकाले स्थूलरूपाभावेन संस्कारात्मनावस्थितं जगत्स्वेन तेजसा चिन्मात्ररूपेण या व्याप्तवतीत्यर्थः ॥ ६ ॥ महालक्ष्मीरेव महाकाल्यात्मकत्वेनापि परिणतेत्याह शून्यमिति ॥ ७ ॥ ८ ॥

For Private and Personal Use Only

'शिरः' दण्डारोपितग्रीवाभागं खट्वाङ्गनामकं 'कबन्धाः' शिरोहीनदेहाः उरसेति शेषः उरसि कबन्धमालां शिरसि शिरोमालां च दधतीत्यर्थः, तां प्रोवाचेति तु प्रथमाद्वितीययोर्व्यत्यासेन तामसीवाक्यमेतदिति केचित् स तु वृथा प्रयासः, तदुत्तरार्द्धस्य नाम कर्म्म च मे मातर्देहि तुभ्यं नमो नम इत्यस्य बहुषु पुस्तकेषु

खड्गपात्रशिरःखेटैरलङ्कृतचतुर्भुजा। कबन्धहारं शिरसा बिभ्राणा शिरसां स्रजम् ॥९॥ तां प्रोवाच महालक्ष्मीस्तामसीं प्रमदोत्तमाम्। ददामि तव नामानि यानि कर्माणि तानि ते ॥ १० ॥ महामाया महाकाली महामारी क्षुधा तृषा। निद्रा तृष्णा चैकवीरा कालरात्रिर्दुरत्यया ॥ ११ ॥

दर्शनेन प्रत्युताऽसमञ्जसता च। एतेन विभक्तिव्यत्यासेनैव केषाञ्चित्पाठोऽपि नादेयः सात्त्विकीप्रश्नमन्तरेणैव तस्यैव नाम प्रधानस्योत्तरत्वकथनाच्च ॥ ९ ॥ ॥ १० ॥ ॥ ११ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

महामायादिनामदशकस्यान्वर्थकत्वमाह इमानीति। उक्तञ्च कालिकापुराणे गर्भान्तर्ज्ञानसम्पन्नं प्रेरितं सूति-
मारुतैः उत्पन्नं ज्ञानरहितं कुरुते या निरन्तरम्। पूर्वातिपूर्वसंस्कारसंघातेन नियोज्य च॥ अहरादौ ततो मोह-
 ममत्वज्ञानसंशयम्। क्रोधोपरोधलोभेषु क्षिप्त्वा क्षिप्त्वा पुनः पुनः॥ पश्चात्कामेन संयोज्य चिन्तायुक्तमहर्निशम्।

इमानि तव नामानि प्रतिपाद्यानि कर्मभिः। एभिः कर्माणि ते ज्ञात्वा योऽधीते सोऽश्नुते सुखम्॥ १२॥ तामित्युक्त्वा महालक्ष्मीः स्वरूपमपरं नृप!। सत्त्वाख्येनातिशुद्धेन गुणेनेन्दुप्रभं दधौ॥ १३॥ अक्षमालाङ्कुशधरा वीणापुस्तकधारिणी। सा बभूव वरा नारी नामान्यस्यै च सा ददौ॥ १४॥

आमोदयुक्तं व्यसनासक्तं जन्तुं करोति या॥ महामायेति संप्रोक्ता तेन सा जगदीश्वरीति। एवं देवीपुराणे नाम-निर्वचनाध्याये अन्यत्र चेतरनामनिर्वचनानि द्रष्टव्यानि। ईदृशार्थज्ञानपुरःसरं नाम कीर्त्तनं फलाय विद्यते एभि-रिति॥ १२॥ महासरस्वतीत्वेनापि सैव परिणतेत्याह तामिति इमानि तवेति श्लोक एतन्नामदशकेऽपि योज्यः॥ १३॥ १४॥

॥ १५ ॥ मिथुने पुत्रः पुत्री चेति भ्रातृभगिनीयुगले ॥ १६ ॥ १७ ॥ १८ ॥१९॥ अत्र स्वयमिति पदं स्वकीय-

महाविद्या महावाणी भारती वाक् सरस्वती । आर्य्या ब्राह्मी महाधेनुर्वेदगर्भा-
सुरेश्वरी ॥ १५ ॥ अथोवाच महालक्ष्मीर्महाकालीं सरस्वतीम् । युवां जनयतां
देव्यौ मिथुने स्वानुरूपतः ॥ १६ ॥ इत्युक्त्वा ते महालक्ष्मीः ससर्ज मिथुनं स्वयम् ।
हिरण्यगर्भौ रुचिरौ स्त्रीपुंसौ कमलासनौ ॥ १७ ॥ ब्रह्मन् विधे विरञ्चेति धात-
रित्याहतं नरम् । श्रीः पद्मे कमले लक्ष्मीत्याह मातास्त्रियञ्च ताम् ॥ १८ ॥
महाकाली भारती च मिथुने सृजतिस्म ह । एतयोरपि रूपाणि नामानि च
वदामि ते ॥ १९ ॥ नीलकण्ठं रक्तबाहुं श्वेताङ्गं चन्द्रशेखरम् । जनयामास पुरुषं
महाकाली सितां स्त्रियम् ॥ २० ॥

मेव श्रीनामकं व्यष्ट्यन्तर्गतं रूपान्तरं धृत्वेत्यर्थकमिति, केचिद् व्याचक्षते, महालक्ष्मीरिति व्यष्ट्या एव नामेति च वदतामस्माकं तु नायं क्लेशः ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥

For Private and Personal Use Only

त्रयीविद्याशास्त्रीयावेत्येकैकं भिन्नमेव वा नामद्वययुगम् ॥२१॥२२॥२३॥ एवं मिथुनत्रयं सृष्ट्वा तेषां विवाहाय कन्यादातृदम्पत्यपेक्षणात् स्वासां पुरुषान्तराभावात् स्वयमेव द्विद्विरूपतां धृतवत्य इत्याह एवमिति पुरुषत्वं

 महालक्ष्मीर्ब्रह्मत्वं महाकालीरुद्रत्वं महासरस्वतीविष्णुत्वं प्रपेदे इत्यर्थः, आसां हि युवतित्वे सत्येव पुरु-

स रुद्रः शङ्करः स्थाणुः कपर्दी च त्रिलोचनः। त्रयी विद्या कामधेनुः सा स्त्री भाषाक्षरा स्वरा ॥२१॥ सरस्वतीं स्त्रियं गौरीं कृष्णां च पुरुषं नृप। जनयामास नामानि तयोरपि वदामि ते ॥२२॥ विष्णुः कृष्णो हृषीकेशो वासुदेवो जनार्दनः। उमा गौरी सती चण्डी सुन्दरी सुभगा शिवा ॥ २३ ॥ एवं युवतयः सद्यः पुरुषत्वं प्रपेदिरे। चक्षुष्मन्तोऽनुपश्यन्ति नेतरोऽतद्विदो जनाः ॥ २४ ॥

षत्वं न तु व्यक्तिभेदेनोभयं वाप्यर्द्धनारीश्वरवदवच्छेदेनाव्याप्यवृत्ति किन्तु शरावस्थजलातपन्यायेनोभयमपि व्याप्यवृत्तीति भावः तदिदं रूपं चर्मचक्षुषामदृश्यमित्याह चक्षुष्मन्त इति ज्ञानस्यैव चक्षुर्गुणपौष्कल्येन मुख्यचक्षुष्ट्वं नवार्थस्येति भावः अतद्विद इति छेदः ॥ २४ ॥

२५॥ अवशिष्टां सृष्टिमाह स्वरयेति त्रयीविद्यया सङ्गम्येत्यर्थः 'तत्' ब्रह्माण्डप्रधानादिमूलप्रकृतिमहदहङ्कारादिक्रमेण सांख्यतन्त्रोक्ततत्त्वसमूहम् ॥२६॥२७॥ महालक्ष्मीरिति निराकारसाकारद्वयमस्या एव नान्ययोः, तेन व्यष्टित्रयान्तर्गतमहालक्ष्म्यास्तमः सत्त्वोपसर्जनकरजोगुणप्राधान्यात् तुरीयाया गुणत्रयसाम्यरूपत्वेन वा रज-

> ब्रह्मणे प्रददौ पत्नीं महालक्ष्मीर्नृप ! त्रयीम्। रुद्राय गौरीं वरदां वासुदेवाय च श्रियम्॥२५॥ स्वरया सह सम्भूय विरिञ्चोऽण्डमजीजनत्। बिभेद भगवान् रुद्रस्तद्गौर्य्या सह वीर्य्यवान्॥ २६ ॥ अण्डमध्ये प्रधानादिकार्य्यजातमभून्नृप !। महाभूतात्मकं सर्वं जगत् स्थावरजङ्गमम्॥ २७ ॥ पुपोष पालयामास तल्लक्ष्म्या सह केशवः। महालक्ष्मीरेव मता राजन् सर्वेश्वरेश्वरी॥ २८ ॥

स्तमोऽसङ्कलितशुद्धसत्त्वरूपत्वेन पुराणान्तरसिद्धत्वेऽपि प्रकृतेः रजः प्राधान्येन तदविरोधिगुणद्वयवत्तया सगुणनिर्गुणरूपद्वयवत्तया च महालक्ष्मीरुपास्येति निगर्वः अतएव व्यष्टिप्राये महालक्ष्मीनामदशकस्य कीर्त्तनाभावप्रयुक्तामाशङ्कां परिहर्त्तुमाह सैवेति तस्या एवान्याभ्यो नामदातृत्वे नानवस्थापत्यादातॄणां दात्रन्तराभाव एवकारार्थः॥ २८॥

For Private and Personal Use Only

नामान्तरैरन्ययोर्व्यष्ट्योर्नामभिरेव, अस्या एव तुरीयात्वे न स्वतन्त्रनामापेक्षणादिति भावः तस्मात् पार्थक्येन तुरीयामपहृत्य व्यष्टित्रयमध्यगा महालक्ष्मीरेव सर्वोत्तमेत्येतदुपासकाभिमान इति ग्रन्थस्य स्वारसिकाशयः

स.टी. अतएव सप्तसत्यां चत्वारि स्तोत्राणि, तेषु देवीसूक्तं महाकाल्यादित्रितयाभेदेन तुर्य्यायाः स्तवनं, इतराणि त्रीणि क्रमेण गुणिमूर्त्तित्रयपराणीति विवेकः। परे तु तुर्य्यैवोपास्या व्यष्टयस्तिस्रोऽप्यवमा एवेति वर्णयन्तो-

१०४ ऽमुं ग्रन्थं क्लेशेन लापयन्तो महाकालीमहालक्ष्मीमहासरस्वत्यश्चरित्रत्रयस्य क्रमाद् देवतास्तुर्य्या तु नवार्णस्य

निराकारा च साकारा सैव नानाविधानभृत्। नामान्तरैर्निरूप्यैषा नाम्ना नान्येन केनचित् ॥ १९ ॥ इति प्राधानिकरहस्यम्।

